त्रे इत्यत्र तु घे द्वित्वे द्वस्य ने नैव संधिनिषेधः। अदसः फिंशस्यत्र। पदार्थव ऊहरणपरिभाषया प्यतद्वा रपितुं शक्यते तत इ
स्यस्मत्रे इति प्रसुद्याहरणं बोध्यम्। अमी रोगः सोस्याप्तीत्यमी॥ अदस एवेति तु वेत्यस्य स्थिततस्यानुवृत्तेः। घ्रिहित्वे
ति। ईकारान्तत्वात् हितं च परिनिष्ठितत्वे सति बोध्यम्। ननु कुमार्यगारं कुमार्यगारं वधूगारमित्यत्रापि संधिनिषेधः प्रा
प्नोति। ईकाराद्यन्तस्य द्वित्वेव नैमानत्वात् तस्य पलन्तरोने तिचेन्न। ईकारादिभिर्द्विवचनस्य विशेषितत्वात्। ईकाराद्यन्तद्वि
वचनमिति निःकर्षात् समासे कृते समुदायस्यैवार्थवत्त्वेन पूर्वोत्तरपदयोरनर्थकत्वात्। नन्वेवमपि अश्रु क्लेवहे अमुले
संपद्येतां शुक्ले [illegible] तावद्धे अत्र प्राप्नोति। अत्राहुः ईकारादिर्द्विवचनान्तं इतत्वं भवति प्रत्ययलक्षणेनेति चेत्स्यम। अत्रा
प्य हते ईभावे लुग्भविष्यति। यौ तत्स्याव्यपत्वेनासत्यत्वादद्वितार्थत्वात्। प्रत्तुमशी वाद्धिवत्तो। मीति परित्वामशी वाधुन्
हतं प्राचा। तत्र मुनित्रयानुक्तत्वाद्धमाराणामिति॥ एवं च मणी वोष्टू स्यलवेते प्रियो वत्सतरो मम इति भारतप्रयोगस्य
र्थना परवार्थे व शब्दो वा शब्दो वा बोध्यः। वदा यथा तथैव वे साम्यरत्यमरग्रन्थव्याख्यावसरे शा चं वं वपपुर्य श इति
कालिदासप्रयोगस्यापि मेघदूते सुन्दरतत्वात काद्वयं व [illegible] तिदलानिवपङ्कं जानिरत्यादिदर्शनाच्चेति भावः। श्रोनिपात इति। अत्र

CC0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स्थितः। वियूर्वाद् घेरौ रागादिके शप्रत्यये मध्यत्वोत्तमस्येतो विरूपाणि त्यादौ पञ्चेति मनोरमायामुक्तं वतां हीति तानां मतेनाद्वि
रोधात क्ङोरह सत्वादि त्य स्याग। तिङ्गतिलेनोपेक्षितत्वात्। चपा हितिकिमग्रतान शेतेऽत्र वे रतिक्किम वाकश्चोत्तति। शः किम्
वाक् साधुः। ननु चपा रत्यनुवृत्त्यर्थं च शादिभक्ति विपरिणामं कृत्वा चपा हितिव्याख्यायां पेत रतिचेत्। तर्हि उत्तरार्थं तत्र
होऽऊभाइ त्यत्र वक्ष्यते। इहार्थं च त्यजतं त्यादिना वा सह पमाश्वीप ततत्राघ ङ्क एवहितीपमा चपमततीति चपातेन सहि
तः कः तस्य शोत्रमे तेन पोश्रत्वी त्यादौ शत्वमावि धेपस्यप वनिर्देशत्वं स्य इहार्थः चपाकुः कु रत्वं लुके संयोगः स्यात्। होऽभी
रति। चपा हित्यनुवृत्तेर्न हम गवन्नहरे हकारस्येति किमतस्य एमा चपानां ऊभानां प एयाक्रमे प्रवृत्तिरित्येतन्नारापदवर्ग
ग इति ननु उद्दिश्यमान विधीयमानयोर्यथाक्रमं प्रवृत्तिर्भवतीति वचनं विना कथं यथाक्रमलभ्यत इति चेन्न। तत्र्यपकादश
नमस्तीतिमनुमानात् ज्ञापकं तुसे यादेरे रतिसूचेतकारात्पर स्य हस्य धकारकरराम। स्तोः श्चुभिः श्चुरिति। सचतुष्ट्ये
स्त्रयनयोः समासः स्तुः त स्यश्तोः एकत्वेद्विगवहु वित्यस्या नित्यत्वान्न लौ वत्वमात्र ज्ञापकं वेदमेव सो सहितराति वा शा वृष्या
र्थ्यि वादिः। सच चवश्च श्चुश्चवः तैः श्चुभिः श्चुना रत्यत्रार्दमात्रागौरवाद् ऊवचनं न्यत्र स्थान्यादेशयोर्यथासंख्य निमित्तकार्यिणो
स्तु। नशादिति ज्ञापकात् तरत्यभिप्रेत्याह। संख्या साम्यरतिसमसूभावः साम्यं संख्यापाः सोम्यं संख्या साम्यं तस्मिन्न। क्रममन
ति क्रमपयाक्रमं यावत्सं संख्याकस्योद्दिश्यमानस्य तावत्संख्याकमेव पतितं निर्दिश्यमानं भवतीत्यर्थः। स्तोः श्चोः श्चुरित्येवसु
वचस्या नच तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानेन पत्वः पाठ्ठारत्यादिन सिद्धे। नशादिति लिङ्गेन तत्स्यान्त्रनुपस्था
नमानिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यं।

CC0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नाम्युपगम्यात। न शात् शात्परस्य सस्य शकारस्य संगेनासित्यतः शात्परस्य तवर्गस्य चवर्गो निषिध्यते। शादिति किम्याञ्ञा।
ष्टुभिः ष्टुरिति। स्तोरित्यनुवर्त्तते समासः पूर्ववत् अत्रापि षो ष्टुरित्येव तु वच्च मन षीति। अत्र तोरित्यनुवर्त्तते। षीति कं
तद्वीकः। षीति सप्तमी निर्देशात् पूर्वस्य षकारस्य योगे ष्टुत्वं स्यादेव कोष्टा। टोरं त्यादिति। स्तोरित्यतोनुवर्त्ततेन तोरिति। टोरि
ति किं। सर्पिष्षमम स्रत्यः भवार्थसत्वः। शितोवतिष्वृद्धिविकल्पात् हृष्यभावः पदांतरत्यनुवृत्तेः पदांतादिति लब्धे अंत्यादिति न
ह्रा रामस्पानि त्यत्वसापनोपेत्यमिप्रेत्याहानवतिनाष्टोर्नेति। षष्मवतिरिति षड्नवतिश्च। षडधिकानवतिरितिवानणा
नवी सत्र नत्र ह्रयोपादानं ष्टुत्वस्यानि त्यत्वसापनार्थमित्याशयेनाह। सुपोनेति सुपः सकारस्य ष्टुत्वं नेत्यर्थः। तोर्लि
लरति अत्र लघुमाष्यमते तोरित्यनुवर्त्तमाने तोर्ग्रहणं सकारनिवृत्त्यर्थमिमिमेके तल। लकारस्य परस्य सकारस्याभावात्
न च कोलुनातीत्यादावतरंगोनविसर्गेणाभाव्यमानत्वाद्वह्रत्वत्रापि परत्वादंतरंगत्वाच्च हत्वे सतेत्लः न चकोलुनातीत्यत्र स्यानि
वडावेनविसर्गस्यसत्वमाश्रित्य तलः स्यादिति वाच्यं। वर्णमात्रविधौ स्यानिवद्भावनिषेधात्। एवं तर्हि ग्रहं तोर्ग्रहणामेव तापप
ति। वर्णमात्रविधौस्यानिवद्भावनिषेधोऽनित्य इति। तेन बृंहिवर्णमात्रविधौप्यस्यानिवद्भवति एतत् ज्ञापनायेत्याहोदृष
भावः तोर्लिरिति हल्कारपाठे ललिचेतिकेहिः एवं सार्द्धमात्रा न्यूना भवति। अत्रेदमवधेयम्। तोर्लिरित्युक्ते लकारस्यरापरला
ततल्लिमिन्तक्रेह्रित्वमाशंकविधेयसंदेहःस्यानिवार्ष्यत्वात् किंचा स्तोः श्चुभिः श्चुरित्यत्र तस्य श्चुरित्यस्य विधेयत्वेनोपन्यासा
द्भिमवोस्त्रिवतिरिति। अत्रानुनासिकोल्लकारः। उदः स्थास्तंभोरिति। उदः परयोः स्थास्तंभोः सलोपः स्यादित्यर्थः। उत्थानम्। उत्तंभन

सा॰ उ॰ ३९ परे। घ्नंतं प्रेरयति घातयति॥ शादेः शातः। शदेरगतौ तः शदादेशो भवति शातयति॥ शदॢ शातने। शीदं प्रेर-
यति। शादयति॥ गतौ औपकं॥ अगताविति स्वधानो गकारं तस्य कज्ञो गुणागमो भवति। ददंतं प्रे-
रयति। दापयति। दधंतं प्रेरयति धापयति। तिष्ठंतं प्रेरयति स्थापयति॥ पांतं प्रेरयति पाययति॥ अ-
गतौ। अर्पयति। इङ् क्रीजीनामात्वे औपरे। क्रीणंतं प्रेरयति। जयंतं प्रेरयति॥ जापयति। इङ् अ-
ध्ययने। अधीयंतं प्रेरयति अध्यापयति॥ पुगंतस्य गुणोऽवत्यपः। ह्रियं तं प्रेरयति ह्रेपयति। ह्री
व्लीरीलीः स्नेते धां रवरतां नान्तां औपुग्वत्यपः। लीङ् विलेपने। लीङो वा। लीङोलातो वा आकारा-
देशो भवति औपरे। लापयति। लेपयति। ह्री जपरतो॥ झपंतं पुरुषं प्रेरयति। झेपयति॥ पारक्षे
गवलत्यपः॥ पालयति। पिबंतं पुरुषं प्रेरयति। प्रीञ् धूञोर्नुक् औ। प्रीणयति। धूनयति। प्रीञ् तर्प-
णे। धूञ् कंपने॥ जानातेर्वा ह्रस्वः। जानातेर्ज्ञातो वा ह्रस्वो भवति औपरे। ज्ञपयति। ज्ञापयति। वेडि-
त्मेरी र्घैता वत्तयेः सेपरे वा ह्रस्वो भवति। स्फाटिरस्य रस्य स्फेरी र्घातवकारान्तस्य लोपः। अने रितिस सा॰ ३९

CC0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

मवतीतत्संनियोगेनचाकारस्यईकारः।आत्मनःपुत्रमिच्छति।पुत्रीयति।।धनीयति।।काम्यच्च।इच्छा
यां।आत्मनःपुत्रमिच्छतिपुत्रकाम्यति।उदकस्यउदन्नादेशोवक्तव्यः।उदकमिच्छति।उदन्यति।करणो
चयः।कंड्वादिभ्यःकरणोर्यग्यः।प्रत्ययोभवति।कंडूञ्गात्रविघर्षणे।कंडूयति।कंडूयांचकार।नमः
करोति।।नमस्तपश्चित्रङःकरोतिनमस्यति।।ओंईङ्करणोनाम्नोतिःप्रत्ययोभवति।करणोर्यभवडितो
नकपोहस्वर्थःउभयपदार्थेच्छा।अतउपधायाइतिवृद्धिः।आमो।मितांह्रस्वः।धातुउपधायामितिर
स्येणपाठेनानाधातूनांह्रस्वोभवति।अपकर्जारि।गुरुणायादेशोः।घटयति।महांतंकरोतीतिम
हयति।हस्वादेः।हस्वादेर्धातोरकारस्यलोपोभवति।औषधैःप्रथयति।मृदुंकोमलेम्रदयति।दृढव
नेदृढंकरोति।द्रढयति।कृशंकरोतिकशयति।कशयते।अजयते।धातोःप्रेरणे।धातोःप्रेरणेप्रयो
जकेव्यापारेर्थेणिप्रत्ययोभवति।कुर्वंतंप्रेरयतिप्रभुःसप्रयोजकः।कारयति।पाचयति।पाठयति
शास्तुअनुशिष्टो।अनुशासयति।हन्तेर्घत्।हन्तेर्धातोर्घत्आदेशोभवतिणौवर्ज्जेन।घातयति।।

59

सा॰उ॰
५०

घटत्या नरितिः। ऋकारांता ह्रस्वो रस्तु क्रं कार्यं न भवति॥ ओह गतौ॥ ओहपति। ओहपेत। ओहयत॥
अओहपत॥ ओहणं वकार। ओवा त। ओहपितम॥ ओहपिष्यति॥ १ ओहपिष्यत॥ अदुओहत॥
अपीपचत॥ वहप्रायणो। धातोः क्ङिः। ओं यव राणांघ्रः संप्रसारण॥ ओहः। तथोईः। बुभिः दुः
ढ्ढिो लोपो दीर्घश्च। जिरिति स्पृशो ऽङितिः। ऊटि इतिना मधा ऽहः। जेरङ्‌ दिश्च। जेरिति जिलोपः॥
दिसाता वहू। स्वरादेः। अङ्‌ पूर्वस्य सजोवा॥ ऊढपति। ऊढपेत। ऊढपत। ओढपत। ऊढपां चका
र। ऊढ्यात॥ ऊढपिता। ऊढपिष्यति। ओढपिष्यत। ओजिढत॥ ओदिढत॥ ओडढत॥ ओजढत॥
पिवते रङ्‌ पूर्वस्येत्। उपधालोपश्च। अपीप्यत। रु इत्यामर्षे। रुपोतिलः। रुपेर्धातोः खपवस्य रका
रस्य लकारादेशो भवति॥ रुन्द्यः। रुलपति। रुलपते। अचीलपत॥ अचीलपतां। अचीलप
त। रुणादि। अपादेशादि शषोरिति रुष्पते॥ दशादेः पश्चादिः। दशादेर्धातोः पशपादिरादेशो भ
वत्पादो विषये॥ दशि रुपेहप्यो। दृशस्य पश्पादेशः पश्यति। दृश्यते। दृश्यत। दृशादसंपाति॥ अविकार

राम
५०

पू १

CC0. Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

णेरणाविलोपः। स्कोरयोश्चेति सलोपः। लापयति व्यमिचनति॥ जिहान्यमिप्रानि॥ लोसाति चुराद्रेर्णिः।
चुरादेर्गणात्। स्वार्थे णिः प्रत्ययो भवति चुर स्तेये। चोरयति। चोरयेत्। चोरयतु। अचोरयत्। चोरयां
चकार। चोर्य्यात्। चोरयिता। चोरयिष्यति। अचोरयिष्यत्। पाल रक्षणे। पालयति। चिती संज्ञा
ने। चेतयति। अर्थ प्रज्ञापने। अर्थयति॥ जिकारानुबन्धः। राजन्ने महमपि। चोरयते॥ णेङ्चि
। णेर्ङ्तानातोर्मध्ये ङ प्रत्ययो भवति। द्विर्वादिपरतः सोपवादः। तस्मिन्सति धातोर्द्विर्वचने।
ङकारो गुणप्रतिषेधार्थः। अचुचुरि अङ् इति स्थिते॥ णेः। इदुन्मिति॥ णिति ङि चिपरे णेर्लोपो
भवति। लघोर्दीर्घः। ङि सति पूर्वस्य लघोर्दीर्घो भवति। अचूचुरत्। अचचर्त्। अचूचुरत्।
ङि लघोरुपधायाः। ङि सति पूर्वसंयोगे नो अकारस्य इकारो भवति। न धोपदेशे उपधायास्त्र
ह्रस्वो भवति। न धुनिषाल्व ह्रस्वे सति। वारयति। वारयेत्। वारयतु। अवारयत्। वारयांचकार। वा
र्यात्। वारयिता। वारयिष्यति। अवारयिष्यत्। अवीवरत्। अपीपठत्। अपीपलत्। अजी

सा॰उ॰
५२

पवर्गाद्भिन्नस्य स्यक्र वर्णस्य उर भवति। यो लिहसेमुत्समर्द्धते। दिदृक्षते॥ संतसंज्ञो श्रेतेरो र्घः। हंशक
थ्यते। सि सोशिषते। क्रमे वृत्तिहारेश्वम अहिंसा रेशत। विवदने। विवदते॥ विवदन्ते॥ वारिनः। श्रृ
वृत्तिभवति। हिंसादेरिति किं। वृत्तिघ्नंति शत्रवः। वाजिनघ्नंति। विप्राः। क्रमुपादविक्षेपे। क्रमः समु
पसर्गस्य दीर्घता च क्रमं वा संक्रामति। क्रमंते॥ व्याङ्परिभ्यो रमः। पाविरमति। आरमति।
परिरमंति॥ उपरमति। वृतादिभ्यः स्यसनोर्वा पंच वृतुवृधुशृधुस्यंदू वृतादय एभ्यः स्यसनोः समय
तयोर्वा परस्मैपदं भवति। न वृद्भ्यश्चतुर्भ्योऽधातुभ्यः परस्मैपदे स्यसनोरिट् न भवति। आत्मने
ते भवतसेवा वर्त्स्यति। वर्त्तिष्यते। विवृत्सति। विवर्त्तिषते॥ वृधु वर्द्धने। वर्त्स्यति॥ वर्द्धिष्यते। विवृत्सति
वर्द्धिषते। विवर्द्धिषते॥ स्यधुश्रृंभिकां शापां गर्द्धसति। जिगर्द्धिषते। जिगृत्सति। कल्पसामर्थ्ये। कल्पति
कल्पिष्यते। विकल्पति। विकल्पिषते। स्यापुद्भ्यो लुङि चारे कुर्वाणः कुचारे गणा। कुंगमो भवस्य वार्ष्णिवढ
द्युद्भ्यो लुङि मुद्योतने। व्यद्युतत्। व्यद्योतिष्ट। मुमोचा विझलाभो विंदति। वेत्ति रूपंवि दस्ता नो। विन्ने। विद्वि चारणे।

61

ति

ए ल
५२

जिगर्द्धिषते ३

मा२

५

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पविभ्यः स्थस्तस्माद्धातोरात्मनेपदं भवति॥ संतिष्ठते। उपतिष्ठते। वितिष्ठते॥ उद्विभ्यां तपः। उद्विभ्यां प
रस्मात्तपो धातोरात्मनेपदं भवति। उत्तपते। वितपते॥ आङो यमहनः। लोपश्चास्तु दानानां। अनुदात्ता
नां तन्नादीनां स्वकर्मकाणां लोपो भवति। दि-ति म्लेपरे। आहते वृकः। स्वांगकर्मकत्वेव। अस्वांगकर्म
गिरिः। शत्रुं हन्ति॥ गमांसुरे। हनो घ। आयच्छते। आघ्नाते॥ आहसे। आपृच्छते। उत्स्वरस्त्यागे। आ
उत्सर्जिच्चरते धातोस्त्यागेर्थे आत्मनेपदं भवति। मन्त्रमुच्चरते। अन्यथा मंत्रमुच्चरति सम स्त्रीपादुका
ना रथेन संचरते। अश्वेन संचरते। स्त्रीपादुकाभिः। अन्यत्र पथि संचरति। अवपरिभ्यः क्रीञः। वि
अवपरिभ्यः परस्य क्रीञः धातोरात्मनेपदं भवति। विक्रीणीते॥ अवक्रीणीते॥ परिक्रीणीते॥ ना
म्नादेः। ईहते। शपउपालंभे। शपश्चकरणोर्थे शपो धातोरात्मनेपदं भवति॥ विस्मोः शपते। अन्यथा
शत्रुं शपति॥ शाश्वस्मरदृशां ज्ञातानामातः। ज्ञास्वप्नबोधने। अश्वपतो। स्मृ दृश स्मरणे। दृशि प्रेक्षणे।
इत्येते धातवः संपन्नानामात्मनेपदं भवति। जिज्ञासते। अश्वत्थवणे। सेदीर्घः। शुश्रूषते। पो॥

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

भावातानचमाद्युक्तामावेपिवचनात्तथारितिवाच्यमयपेरत्यस्यजतिपरत्वेनययजातीयेसंवर्णौ। यमजातीयसवर्णौयमजातीयस्या
नुस्वारसदृशास्यविधानेनक्वचनस्यचरितार्थत्वातयत्तुयमोस्येतिसूत्रेयुक्तेमन्नानुस्वारेणाभावेदृसवितिवान्नेयत्तौयंम्लडुत्वा
रस्यसदृशऊष्महसपोःसवर्णोऽन्यादेशोभवितुमर्हतीतिभावः। यथायपेइति। शषसहेषुनुनातिव्याप्तिःतेषांपयमसर्वर्णा। भावादितितत्रे
दमवधेयं। हसान्नेयगोवर्ततेहन्तेतस्यऊसत्याप्याहोयेतिद्वैध्यकरूसान्नेयस्यव्यर्थत्वात्। किंचान्नगुरुद्विलयुनानुस्वारेणा
हसन्नेयस्याशंकात्वाद्वसान्नेयपयशांतत्याद्नेपाव्ववेतिद्वितापसत्रेयन्यासस्तामर्थ्याद्वतहयशांतविषयमित्याशयेनाह।य
शंतेवर्तमानस्येतिवेति। अवास्थितोविकृत्यरत्यमित्रेत्याह। यवलमनपरेइति। हकारेइतिविशेष्यं। पश्चैवश्चुत्वमश्चनश्चुते
परेपस्यसतथातस्मिन्नकिंत्विति। ह्योऽतीतद्विकिंह्मलयति। ह्मलह्मलचलने। ज्वलह्मलह्मलनमामनुपसर्गाद्वेतिमित्याह्मखव
मह्मः। ह्मापनन्द्वेच्चह्यदिः। ह्मदिसुखेवकुर्वती। तत्रनस्यराप्तत्वतुनवाहिंरंगमंतरंगइत्यस्तिद्धत्वात्। वेतिव्यवस्थितविभाषाश्रय
णात्। शसेचयस्यद्वितीयोवादनात्तस्यवाधुरः। शसेसोः। कुकडुक्लोवा। यकारेयरेनूननकारस्यनस्वासतिसंगहीतमास्योर्वि
सर्गइति। पदान्तेवर्तमानयोः स्योर्विसर्गस्यास्याद्वाव्यवधानतु साधारणा मिहम्ते नश्चाविमः द्वेवः प्रातरित्यस्यपरत्वात्किलुकिमात्र
सपरत्वमपदान्तेकिंकुर्ण्यातयपसौ। नाम्नधुरस्यरयोःहा। विसर्गः स्यात तेनवेद्योस्यांहोः। क्षित्यादितिंद्वेतोतुप्रथमंसिलोपात्परत्वा
द्विसर्गकृतेतस्यहसपरत्वाभावेनसिलोपाभावेनिसवि सर्गदृषयमवर्तप्रसंगः। ष्यवेधाहत्यत्ररयोःसकारयोरुक्तौविसर्गोपि
विष्यतिसत्वजातेरोश्चयणादितिचेत शरात्विपचत्वाः। गीरित्यादौरसयरयोरेकजात्यभावादुक्तदोषतादवस्थ्यमितिकेचितत
्‍दोह श्रीकृ

न.टी.
१२

त्र प्राप्तशोहस्य नामित्तिवचनात् कृद्धित्स्वैरााापिपरबाधः इत्यर्थः । रसेऽकिं वत्वान वक्तेः ॥ क्रिपिन्नु विशिष्टस्यनाम संसत्ता भवति
लुप्ये पिक्किपि एकदेशविकृतन्यायेन नामत्वमस्ति । तेन त्विदोम्यामित्यत्राहोविसर्गः सिध्यति सवर्चहो तपोः अन्तरेफानिर्दिष्टो
नतुरेफभूत सकारः रेफस्थानिकविसर्गस्यारादेशो विधायकस्य र इति सूत्रस्य वैयर्थ्यापतेः कृतकार्यपोरित्यादिनिर्देशास्स
नत्वत्र तत्कारस्य विसर्गो निर्दिष्टः प्रातःपाशमित्यादावुभयथा विसर्गः नाससंज्ञाप्रवृत्तिकालेसतोरेफस्य सुप्येनविसर्गः । व
वर्धितिज्ञापकात्ते नगीर्भ्र रत्याहि सिध्यति । नार्थस्य रस्य नतु बहिरंगापाघृद्धरासिद्धत्वान्नो विसर्गः वर्णेसत्यात्तेन विसर्गः
कर्त्तसाधनयोरिति निर्देशात्हदिकः । उः चराच हो तपोः उःस्य कुरुतास्य दुकरभवति तस्यः वगर्त्वात कुर्वोः क्रः पो वेति
। कुश्च पुश्च ऊप तपोः । अत्रादेशनिमित्तपोर्यथाक्रमम् । आदेशे कपावुच्चारणार्थौ केवलयोस्त्वाररणासंभवात् तकरवर्ये
ः कः पः पोः पः अत्र न्यत्रोतर विधिभिर्वाधनात् ॥ ॥ श्रीविद्यानगरस्थायी पोत्रो रामकृर स्वाहि हलसंधेर्बधाघारख्याप्रहितो
केशव सूनुकः ॥ ॥ इति हलसंधिः ॥ ॥ अथ विसर्गसंधिः ॥ विसर्जनीयस्य स इति आसंधिसमाप्तीहलस्तमधिक्रियते । प
रिशेषात्खसेएवास्यप्रवृत्तिः अस्य त्रत त्रेरसस्त्रेत्तत्र तत्र बाधः विसर्गस्य स इति नो क्रमः । यर्थापशषानां गोरवलाघवपोर न
नपेक्षणात् । यद्गुभ्यां मुपहृतार्थं विसर्गनोपादियहणं प्रोचोलाघवं नजानंनीत्युक्रमः । तत्रैहमवधेपमपांचोनक्त । वि राम
वरणा कर्त्तारः स्त्रकर्त्तानेवाभाद्ये सूत्रस्य गौरवेणातेषामुपहासा संभवात् । यत्पोहरस्तत्वात्तः सूत्रकृतत्वेन तदुपहासे प्रमत्तवापत, ०२

,वव।
नद्दाह श्रीकृष्ण
१

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ओम्
र.प्र.
१

ॐ स्वस्ति श्रीगणेशाय नमः अथ रमलेंदुप्रकाशो लिख्यते जेयाजेयान्जयति दितिजान्यत्प्रसादेन विष्णु-
र्जिष्णुर्लोकानवति सकलान्यस्य दाक्ष्यप्रसादात् सद्यःसंहारमपि च हरः प्रांतकाले वसांतानाविघ्नेशा।
म्बाहरजेंदुरितं मे सुसिद्धिं विधत्ताम् १ गौडत्रिपाठी भगवत्सुतोऽभूद्वाल्मीकिनामा मुनिवत्कविरा-
जराजः श्रीमच्छिवाचरणलब्धवरप्रसादः २ प्राचि प्रागधिवेलां वरुणदिशि तथा पश्चिमांभोधि-
वेलां याम्यायां याम्यशैलं तुहिनगिरिशिखिं यावदन्योन नागः सर्वज्ञेन्द्रस्तनेनखगगणगणस-
मोरुद्रमणयाख्यसूनुः श्रीमद्वाल्मीकिनाम्ना स्वजनिसमुदितेनैव दीपेन दीपः ३ ज्योतिर्विदां सुबो-
धाय रमलांभोधिसारतः रमलेंदुप्रकाशोयं शाकीलैस्लेनतन्यते ४ स्वरांतापारसीशब्दाः हसा।
नाश्चत्रिपुस्तनाः अथ प्रथमोल्लासो मंत्रपरीक्षादिसंज्ञा नेतत्र मंत्रः ॐ नमो भगवति कूष्मां।
डिनि सर्वकार्यप्रसाधिनि सर्वनिमित्तप्रकाशिनि एहि २ त्वर २ वरदे २ हिलि २ मातंगिनि सत्यं
ब्रूहि २ स्वाहा १ तत्रकालादिपरीक्षा सन्मुहूर्ते सहितेन खहर्म्युस्वेदुर्दिनादिरहिते हिते दिने नि-
ष्पापस्वमनवाग्विभूषितस्वेष्टदेवपदरम्यभूषितः १ सप्तघस्त्ररमलैकवीक्षकश्चोकघस्त्ररमल
धिवीदिकः मंत्रयेत्कुरमपोचढालयेदेकवर्णविधिनाप्रकल्पयेत् २ हजरहूतुपालोदेवव।
शाद्भवनधर्मपद्धतिमाचरमाणः पित्रा तज्ञिनवनं श्राप्य हाकादरेइतिशब्दमकरोत्तनदाह

श्रीकृ:
१

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

67

दत्तेनाद्यं तत्समन्वितम् ॥ अर्घ्यं ॥ सुगंधद्रव्यसंयुक्तैः शुद्धैः स्वादुसरिज्जलैः आचम्यतां नि
शानाथ शशिनंदन प्रीतये ॥ आचमनम् ॥ पयोदधिघृतैश्चैव मधुशार्करसंयुतैः पंचामृतै
र्मया देव स्नानं तत्स्वीकुरु प्रभो ॥ पंचामृतं ॥ वासितं गंधकर्पूरैर्जलं निर्मलमुत्तमं स्नानार्थं तेम
या भक्त्या दीयते ज्ञानसिद्धये ॥ ततो देवाधिकैः पद्भिः स्नापयीत ततो बुधं पौरुषेयेण सूक्ते
नो बुध्यस्वेत्यृचैकया ॥ स्नानम् ॥ तदग्ने त्वेति प्रतिष्ठाप्य पीतवस्त्रद्वयं देवराजवंशकर प्रभो
उर्वशीनाथजनक गृहाण प्रीतये सदा ॥ वस्त्रम् ॥ यज्ञोपवीतकं सूत्रं त्रिगुणं त्रिदशप्रिय म
सर्वपापनुत्सर्वं गृहाण प्रीतये बुध ॥ यज्ञोपवीतम् ॥ हरिचंदनकस्तूरीकर्पूरादिसमन्वितम्
गंधं भगवते तुभ्यं निशानाथ नमोऽस्तु ते ॥ गंधं ॥ अक्षतान् ॥ अथांगपूजा ॥ बुधाय नमः पादौ पूजयामि
सोमपुत्राय जानुनी पूजयामि तारासुताय कटिं पूजयामि राजपुत्राय उदरं पूजयामि इला ११२
प्रियाय हृदयं पूजयामि कुमाराय वक्षसि पूरूरवःपित्रे बाहू पूजयामि ज्ञानाय नेत्रे बुधा

२ २

सोमसुताय ग्रं सौ· पीतव
र्णाय मस्तकम् १४

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

अथ व्रतविधिः मासपक्षाद्युल्लिख्य इह जन्मनि जन्मांतरे वाल्यादिआरभ्य कर्मणा मनसा वा
चाज्ञानतोंस्वर्णाद्यपहृतदोषनिरासार्थं पुत्रपौत्रादिसकलमनोरथप्राप्त्यर्थं च श्रीपरमेश्वर
प्रीत्यर्थं बुधाष्टमीव्रतमहं करिष्ये इति संकल्प्य बुधं षोडशोपचारैः कलशोपरि पूजये
त् चतुर्बाहुं ग्रहपतिं सुप्रसन्नमुखांबुजं ध्यायेतं शंखचक्रासियाशहस्तं मिलाश्रियं मात्स्ये
बुधस्वरूपं पीतमाल्यांवरधरः । कर्णिकारसमद्युतिः खड्गचर्मगदापाणिः सिंहस्थो वरदो बु
३४ धेति ध्यानम् ताराम्रुत नमस्तेस्तु नक्षत्राधीश्वरप्रिय गृहाण पूजां भगवन्समागत्य ग्रहेश्व
र आवाहनम् अधिदेवताप्रत्यधिदेवताच सहस्रशीर्षेदं विष्णुर्मामावास इलापतेनमस्ते
स्तुनिशेशप्रियसूनवे हेमसिंहासनं देव गृहाण प्रीतये मम आसनम् शीतलोदकमानी
तं स्तु पुण्यसरिदुद्भवम् पाद्यं गृहाण भगवन्मम माघ्यपरिष्कृद्ये पाद्यं ताराम्रुत नमस्तेस्तु
सततं भगवत्प्रिय गृहाणार्घ्यं ग्रहपते नानाफलसमन्वितम् अर्घ्यं गृहाणार्घ्यं ग्रह

CC0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

व्र.र्के. यः पूजयेत मां भक्त्या तस्याहं पुत्रतां व्रजे । एवं चोभयसप्तम्यां मासि मासि सुरोत्तम यस्तु मां पूजये
११८ द्भक्त्या स्वमेकमेकमादरात् स्वमेकं संवत्सरं यद्यथाशक्ति तस्य स्यात्तनोत्संगसंभवं वित्तं यश
स्तथा पुत्रमारोग्यमपरं सदा माघमासे तयोश्च स्तन् शुक्लपक्षे जितेंद्रियः पार्वं त्रामतितान
स्यात् अजत्सन्विजितेंद्रियः उपोष्य विधिवत्सप्तम्यां श्वेतमाल्यविलेपनैः पूजयित्वा तु मां भक्त्या
निशि भूमौ स्वपेद्बुधः पुनरू.. यसंप्राप्यां कृत्वा स्नानादिकां क्रियाः पूजयित्वा तु मां व्रतमन्वी
स्या ५ रहोमं समाचरेत् प्राणायित्वा हरिं भक्त्या तावि घायच्च लोचनेन वीरहोमं अग्निहोत्रहोमं हरि
रन्नादिस्य दध्योदनेन च पायसेन द्विजांस्तथा तस्मैव रूक्मपत्न्य एयां सम्यग्ध्योषितः
तस्यै वेति मासस्यैरकोत्पलैः सुगंधाद्यैः रक्तपुष्पैश्च पूजयेत् एवं यः पूजयेद्भक्त्या नरो मावि
धिवत्सदा उभयोरपि देवेंद्र स पुत्रं लभते वरम् इति पुत्रसप्तमी ॥ इति श्री भट्टनीलकंठात्मज ११८
भट्टशंकरकृते व्रतार्के सप्तमीव्रतानि अथाष्टमीव्रतानि तत्र बुधयुक्ताष्टम्यां बुधाष्टमीव्रतम्
मांशुक्ला १

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स्थानं गच्छ तामिति विसर्जिते सहस्रांशौ समागम्य स्वमालयं ताम्रपात्रे यथाशक्त्या मन्मये वाप्य
शक्तिमान् स्थापयेत्तिलपिष्टं च सघृतं सगुडं तथा कांचनं तालकं कृत्वा यथाशक्त्या तिलपिष्टकं
संछाद्य रक्तवस्त्रेण पुष्पैर्धूपैर्यथार्चयेत् ततस्तं चालयेद्विप्रे दद्यान्मंत्रेण तालकम् आदित्य
प्रसादेन प्रातःस्नानफलेन च दुष्टदौर्भाग्यदुःखघ्नं मयादत्तं तु तालकं तालकं तालपत्रैः प्र
ज्ञापयित्वा पदे द्वारं द्विजान्नांश्च प्रतनयेत् ततो दिनं समग्रं च भास्करध्यानतत्परः ता एव च कथाः
शृण्वन्मांश्च धर्मसंहिताः पाखंडादिभिरालापदर्शनस्पर्शनादिकान् वर्जयेत्तत्पयेश्राजस्त
तो वंधुजनैः सह एतन्ने कार्पितं पार्थ रूपसौभाग्यकारकं अचलासप्तमीस्नानं सर्वकामफलप्रदम्
इति पवार्ति कर्थयेयः स्पृशेतिघसंगात कलिकल्मषविनाशं सप्तमीस्नानमेतत्त मतिमपि च जनानां
यो ररापति प्रयत्नात् स्वरसदनगतोसौ सेव्यते चाप्सरोभिः इत्यचलासप्तमीव्रतं अथास्यामेव सप्त
म सप्तमीव्रतम् मदनरत्ने आदित्यपुराणे अदितिं संवाच माघमासे तु शुक्लायां सप्तम्यां समुपोषितः

विते उ

व्र॰ र्क॰ सूत उवाच एकभक्तेन संतिष्ठेत् षष्ठ्यां संपूज्य भास्करं सप्तम्यां तु व्रती प्रातः सुगंभीरं जलाश
११७ यं सरित्सरस्तडागं वा देवखातमथापि वा स्नात्वावगाह्य सत्त्वेष्टं दुष्टसत्त्वैरदूषितं स्नात्वा
वृषलिप्तमिश्रैर्वा जलगोमयस्य कषायैः नकेन चाप्लवनेयावत्तावत्स्नानं समाचरेत् सौवर्णेरा
जते पात्रे भक्त्या लाबुमये यथवा तैलस्य वर्तिर्दीप्त्या महारंजनरंजिता महारंजनं कुसुंभं
समाहितमनाः कृत्वा दत्वा शिरसि दीपकम् भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत् नमस्ते
रुद्ररूपाय रसानां पतये नमः वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते गत्वोपरि हरेर्दीपं स्था त
लि॰ त्वा संतर्प्य देवताः चंदनेन लिखेत् पद्मम् अष्टपत्रं सकर्णिकं मध्ये शिवं सपत्नीकं प्रणवेनाभिसंयु
तम् शाक्रे दले रविः पूज्यो भानुश्चैवानले तथा याम्ये विवस्वान्नैर्ऋत्ये भास्करं पूजयेत्ततः पश्चि
मे सविता पूज्यः पूज्योर्कश्चानिलेदले सौम्ये सहस्रकिरणं शैवे सर्वात्ममेव च पूज्यो प्रणवपू ११७
र्वोस्तु नमस्कारांतयोजिना पुष्पैः सुगंधधूपैश्च नैवेद्यपक्वान्नेन युधिष्ठिर वितस्त्रवस्त्रसंवीतस्य

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

मासीनेप्रणम्यानतकंधरा कृतांजलिपुटीभूत्वा प्राहेदं जगतोहितम् मयानदत्तंनहुतंनोप
वासःकृतंव्रतम् भक्त्या पूजितःशंभुःस्वामिन्त्वांगेधरोनवा सांप्रतंतप्यमानायाव्रतंकिंचि
त्वदस्वमे येनदुःखात्पंकोद्धारत्तरामिभवार्णवं एतत्तस्याःसुवहुशःश्रुत्वातिकरुणंवचः का
रुण्यात्कथयामासवसिष्ठोमुनिपुंगवः माघस्यसितसप्तम्यां सर्वकामफलप्रदम् रूपसौभाग्य
जननंस्नानंकुरुवरानने कृत्वाषष्ठ्यामेकभक्तंसप्तम्यांनिश्चलेजले रात्र्यंतेचालयेद्यास्तुदत्त्वा
शिरसिदीपकं घस्यांसितसप्तम्यांश्चलनेचलितेचयत् गतेमलानांसर्वेषांस्नानेप्रक्षालनंत
तः वसिष्ठवचनंश्रुत्वातस्मिन्नेहनिभारत चक्रेंदुमती स्नानंदानंसम्यग्यथाविधि स्नान
स्यास्यप्रभावेनभुक्त्वाभोगान्यथेप्सितान् इंद्रलोकेप्सरोमध्ये नायकत्वमवापसाऽचला
सप्तमीस्नानेकथितंतेविशांपते सर्वपापप्रशमनंसुखसौभाग्यवर्द्धनं युधिष्ठिरउवाच
सप्तमीस्नानमाहात्म्यंश्रुतंनिरवशेषतः सांप्रतंश्रोतुमिच्छामिविधिमंत्रसमन्वितम् श्रीकृ

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

श्रे.क.
११६ कुर्यात्स्नानार्घदानाभ्यामायुरारोग्यसंपदः शते सप्तार्कपर्णानि सप्तबदरीपत्राणि शिरसि निधाय
कर्तव्यमिति मदनः तत्र मंत्रः यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु तन्मे रोगं च शोकं च मा
करी हंतु सप्तमी स्नानांतरमर्घ्यदानं च कर्तव्यं तन्मंत्रश्च सप्तसप्तिवहप्रीत सप्तलोकप्रदी
पन सप्तम्या सहितो देव गृहाणार्घ्यं दिवाकर इति ततः प्रार्थना जननी सर्वभूतानां सप्तमी
सप्तसप्तिके सप्तव्याहृतिके देवि नमस्ते सूर्यमंडले इति भविष्योत्तरोक्तः स्नानादिविधिः
अथाचैवाचला सप्तमीव्रतम् युधिष्ठिर उवाच कथं स्त्रियः सुरूपाः स्युः सुभगाः सुप्रजास्त
था पुरुषश्च भरतश्रेष्ठ सर्वमेतत्फलं यतः अल्पायासेन सुमहद्येन पुण्यमवाप्यते स्त्रीभि
र्यथेष्टं मे शंहलानमेकं जगद्गुरो श्रीकृष्ण उवाच शृणु ते भरतश्रेष्ठ रहस्यं मुनिभाषितम्
यन्न याकस्यचिन्नोक्तमचलासप्तमीव्रतं वेश्या वैंदुमती नाम रूपौदार्यगुणान्विता आसी
त्कुरुकुलश्रेष्ठ नगरस्य विलासिनी सा वासिष्ठाश्रमे पुण्ये जगाम गजगामिनी वसिष्ठमथि ११६

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

74

रस्य च भविष्यति महातेजा महाबलपराक्रमः भोगान्सु विपुलान्भुक्त्वा कृत्वा राज्यमकंटकं
हत्वा सौरथसप्तम्यां मृते त्वपि महाभुज उत्पाद्य पुत्रान्सो ज्योऽप्य सूर्यलोकं स यास्यति तत्र स्थित्वा
कल्पमेकं चक्रवर्ती भविष्यति श्रीकृष्ण उवाच इति सर्वं समाख्याय विनीतो द्विजसत्तमः य म ३
यागतं जगामासौ नृपः सर्वं चकार ह यथादिष्टं द्विजेंद्रेण ततः सर्वं बभूव ह एवं स चक्र
वर्तित्वं प्राप्तवान्नृपनंदन श्रूयते यस्त्विमां धातापुराणेषु परं नृप यद्दं शृणुयाद्भक्त्या यो वा
पि परिकीर्तयेत् न सौ वसुष्यते भानुर्यच्छते वायुपुष्पसदा एवंविधं रथवरं रथवाजियुक्तं
हैमं च हेमशतरीचितिनासमेतम् रथाश्चमाघसितसप्तमिवासरेयः सोऽभ गच्चक्रग
तिरेव महीं भुनक्ति इति रथसप्तमीव्रतम् अथ षष्ठ्यामेव स्नानविधिः तत्रारुणोदयव्या
पिन्यां स्नानं कार्यं तदुक्तं मदनरत्ने स्मृतिसंग्रहे सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी
अरुणोदयवेलायां स्नानं माघे महत्फलम् माघे मासि सिते पक्षे सप्तमी कोटिभास्करी

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

75

भ.कं.
११५

विष्णो हे सादिभूते शम्भ्वादिमध्यांतकारक भक्तिहीनं क्रियाहीनं मंत्रहीनं जगत्पते प्रसादात्तव संपूर्णम
चीर्णं यदिहात्मने एवं संपूज्य देवेशं प्रार्थयेत्सुमनोगतं ददाति प्रार्थितो भानुर्भक्त्या संतोषितो नरैः
वित्तहीनोपि विधिना सर्वमेतत्प्रकल्पयेत् एवं संस्कारयित्वा सा स्वर्णकैर्भिन्नलेखितं सौवर्णं चैत
प्यामानं यथाशक्त्या विनिर्मितम् प्रागुक्तेन विधानेन पूजयित्वा सुविस्तरम् जागरं कारयेद्रात्रौ
गीतवादित्रनिःस्वनैः प्रेक्षणीयैर्विचित्रैश्च पुण्याख्यानकथादिभिः रथयात्रां प्रपश्येत भानो
रायतनं श्रिया अलिमीलितनेत्रस्तु नयेत्तां रजनीं बुधः प्रभाते विमले स्नातः कृतकृत्यस्ततो द्वि
जान् तर्पयेद्विविधैः कामैर्दीनैर्वासोविभूषणैः अश्वमेधेन तुल्येन दिद्यंश्च पदविदो विदुः अ
तोदेयानि दानानि यथाशक्त्या विचक्षणैः एवं तद्गुरवे देयं सर्वोपस्कर संयुतं एकवस्त्रं च यु
गलं रक्तधेनुसमन्वितम् एवं चीर्णं व्रतो राजन् किं नाप्नोति जगत्त्रये तस्मात्सर्वप्रयत्नेन कु ११५
र्वंत रथसप्तमी येनारोग्यो भवेत्पुत्रस्त्वद्दीपोन्वयसत्तम व्रतस्यास्य प्रभावेन प्रभावात्तभास्क

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

येत्तन्निसिपेत ततोविसृज्यतंविप्रंस्वपेत भूमौजितेंद्रियः ततः प्रातःसमुत्थायकृत्वावश्यंशुचिर्नरः
कारयित्वारथंदिव्यंकिंकिणीजालमंडितं सर्वोपस्करसंयुक्तंरत्नैःसर्वांगचित्रितम् कांचनंराजतं
चापिहयसारथिसंयुतम् ततोमध्याह्नसमयेकृत्वास्नानादिकंव्रती गतिर्यग्वीक्षमाणस्तुपाखं
डालापवर्जितः सौरसूक्तंजपन्मंत्रंमागच्छेतस्वमालयं निर्वर्त्यनित्यकार्याणिकृत्वाब्राह्मणवाच
नम् वस्त्रमंडपिकामध्येस्थापयेत्तंरथोत्तमम् कुंकुमेनसुगंधेनचर्चयित्वासमंततः मालाभिःपु
ष्पदीपानांसमंतात्परिवेष्टयेत धूपेनागरुमिश्रेणधूपयित्वातथोपरि रथेसंस्थापयेद्भानुंसर्व
संपूर्णलक्षणं वित्तानुरूपंहेमंवावित्तशाठ्यविवर्जितः शाठ्यात्प्रजायतेवैकल्यंवैकल्याद्विफलंफ
लं ततोदेवंसमभ्यर्च्यसहस्रारश्मिं पुष्पधूपैस्तथागंधैर्वस्त्रालंकारभूषणैः फलैर्नानावि
धैर्भक्ष्यैर्नैवेद्यैर्धृतपाचितैः पूजयेद्भास्करंभक्त्या मंत्रैरेभिस्त्रिभिःक्रमात् भानोदिवाकरादित्य
मार्तंडजगतांपते अपांनिधेजगद्वंद्यसंभूतभावनभास्कर अणतार्तिहराचिंत्याविश्वचिंतामणेविभो

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

77

व्र.कौ. दद्दर्श रथसप्तम्याः क्रियमाणं व्रतं नृप । व्रतदर्शनमाहात्म्यादुत्पन्नो जवरे तव श्रद्धा तावि भवेद्य
११४ स्मात्तेन च व्याधितो भवत् ततः स राजा पप्रच्छ किमेतस्य विधीयताम् यस्य संदर्शनात्प्राप्तो लोभी
ष्टनिकेतनम् तदैव क्रियतां राजन् रथसप्तमिसंज्ञितम् व्रतं पापहरं येन चक्रवर्तित्वमाप्य
कृत्ते= ते राजोवाच ब्रूहि विप्र व्रतं तस्य सविधानं समंत्रकं ईश्वराणां दरिद्राणां सर्वसंपत्प्रदायकं
द्विज उवाच शुक्लपक्षे तु माघस्य षष्ठ्यामामंत्रये हरिं स्नानं शुक्लतिलैः कार्यं न य भावेत्कुत्र
चित् विमले सलिले राजन् विधिवद्धर्मितः देवादीन् र्जयित्वा तु गत्वा सूर्यालयं ततः
सूर्यं सम्यक् नमस्कृत्य पुष्पधूपाक्षतैः शुभैः आगस्त्य भवने पश्चात्तपं च यज्ञोऽग्निर्वेप्यत
संभोज्यातिथिभ्यः स्वां च बालभ्रस्ताश्रितान्स्वयं विद्यमाने दिने यावत्तावत्प्रतस्कोलवर्जितं रा
त्रौ विप्रं समाहूय विधिज्ञं वेदपारगं स पृष्ट्वा नियमं कुर्यात् सूर्यमाधाय चेतसि सप्तम्यां तु निरा ११४
हारो भूत्वा भोगविवर्जितः भोऽस्य देवं यां जगन्नाथ पान्निर्विघ्नं तत्र मे कुरु इत्युच्चार्य नृपश्रेष्ठ तोयं तो

श्रीमान् ४२

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तमाख्यानंव्रतमुत्तमं कुरु देवकि यत्नेन जीवपुत्रा भविष्यसि श्रीकृष्ण उवाच इत्युक्त्वा तु मु
निश्रेष्ठस्तस्यै वांतरधीयत चकार सर्वं यत्नेन यदुक्तं तेन धीमता व्रतस्यास्य प्रभावेन देवकी
सामजीजनत् तस्मात्पार्थ नरैः कार्यं स्त्रीभिः कार्यं विशेषतः व्रतं पापप्रशमनं सुखसंतति
वर्धनं एवं यः शृणुयाद्भक्त्या यश्चैतत्संप्रतिपादयेत् व्रतमाख्यानसहितं सोपि पापैः प्रमुच्यते
साख्यानकं व्रतमिदं सुतसौख्यकामा या स्त्री करिष्यति शिवं हृदये निधाय दुःखं विहाय च
दुःशोगतकल्मषौघा सा स्त्री व्रतात्भवति शोनकजीववत्सा इति श्रीभविष्योत्तरे मुक्ताभर
माघ णसप्तमीव्रतम् अथ शुक्लसप्तम्यां रथसप्तमीव्रतं हेमाद्रौ भविष्योत्तरे युधिष्ठिर उवाच
कथं सा क्रियते कृष्ण मनुष्यैः रथसप्तमी चक्रवर्त्तित्वफलदा या विख्याता त्वया मम श्रीकृष्ण
उवाच आसीत्कांबोजविषये यशोवर्मा नराधिपः वृद्धे वयसि तस्यासीत्सर्वव्याधियुतः सु
तः तत्कर्मपाकं सोपृछत्ताविनीतं द्विजपुंगवं स प्राह राजन्वैश्यो यं कृपणः पूर्वजन्मनि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

कुप५   79

व्र.कं. प्रजामवाप्स्यसि देव्युवाच अलन्नाख्याहि मेसम्यक्व्रतमेतत्सुखप्रदं संतानवृद्धिकरणं
११२ शिवलोकस्थितिप्रदं लोमश उवाच भद्रे भाद्रपदे मासि सप्तम्यां सलिलाशये स्नात्वा शि
वंमंडलके लेखयित्वा सहाविकं तत्र संपूज्य सप्तम्यं कुर्याद्दधाकरेणं यावज्जीवं म
यात्मानु शिवस्याविनिवेदितः इत्येवं समयं कृत्वा ततः प्रभृति दोरकं सौवर्णं राजतं
वटकानू: वापि सौत्रं वा धारयेत्करे मंडकान्वाष्टिकौ दद्यात्मासे यथाशेषवाद्विजे स्वयं तान्भक्षयेभोक्
व्याव्रतभंगभयाच्छुभे प्रतिमासं तत्सप्तम्यां पूजयेद्विशेषतः कुर्यादेवं व्रतं भद्रे वर्षां
ते पितृदेवांकि कारितां मुद्रिकां बध्नीत हैमीं रूप्यां स्वशक्तितः ताम्रपात्रोपरि स्थाप्य शील
शोभ्यां निवेदयेत् आचार्याय विशेषेण सुवर्णस्यांगुलीयकं पुष्पकुंकुमसंयुक्तैर्लाक
लाजनसूत्रकैः सहार्पयेत्ततीया एवं तस्याः पित्वानुव्रतं संततिवर्द्धनं सर्वपापविनि ११३
र्हिंताम्मुक्तासो रत्नस नामयं संतानं वर्धयित्वा च शिवलोके महीयते एतत्ते सर्वमाख्या

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

त्वाविष्टा राज्ञी सा नयवल्लभा ॥ इति तथ्यं महाभागे किं त्वया सुकृतं कृतं दानं व्रतं तपो वा
वा पुष्कलं पुण्यमुपोषणं येन ते निहताः पुत्राः पुनर्जीवंत्यनामयाः ॥ तथा हि वद पुत्रं च
जीवद्वत्सा प्रभानना ॥ प्रमुक्ताभरणा नित्यं भर्त्तृश्चैतस्य वांछिता ॥ सतीव शोभते भद्रे विद्यु
८ द्दाम्नीमये यथा ॥ भवत्युवाच ॥ शृणु देवि प्रवक्ष्यामि जन्मांतरविचेष्टितं किंचिद्विस्मरणं स या
वीमया ध्यायं कृतं हितं ॥ भवाभ्यां व्रतवैकल्यं प्रमत्ताभ्यां वरानने ॥ येन त्वं लवगी जाता
जाताहं कुक्कुटी तथा ॥ तथापि व्रतवैकल्यं त्वया चापल्यतः कृतं ॥ मया तु सर्वभावेन चैत
त्साध्यायशंकरं ॥ तिर्यग्योन्यनुसारेण मनोवृत्ताद्यनुष्ठितम् ॥ एतद्धि कारणं भद्रे नान्यत्कि
चित्करोम्यहं ॥ लोमश उवाच ॥ इत्याकर्ण्य च संस्मृत्य पूर्वजन्मविचेष्टितं ॥ ईश्वरी च तया सार्द्धं
पुनः सम्यक्चकार ह ॥ व्रतस्यास्य प्रभावेन पुत्रपौत्रादिसंभवं ॥ भुक्त्वा च सौख्यमतुलं मृता
शिवपुरं गता ॥ तस्मात्त्वमपि कल्याणि व्रतमेतत्समाचर ॥ आरभ्यो मासि नत्रते दिव्ये जीव

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

उ.की.
११२

श्रिया भूषिता भूषणावरै रूपेणालंकृतास्त्वयं तस्यां बभूवुरष्टौ च पुत्राः सर्वे गुणान्विताः मा
त्वद्रूपसंपन्नाः पितृवद्धर्मशीलिनः सर्वे ते ते न तत्र जाते जातिस्मरे किल पुनर्निरं
तराश्रीतिस्तयोरासीद्यथा पुरा कालेन बहुतिथे जाते त्यक्ताशा त्यक्तयौवना मध्ये वयसे राज्ञी
च पुत्रमेकमजीजनत् ईश्वरो रोगिणं मूकं प्रज्ञाहीनं च वाविस्वरं तादृशोपि महाभागे सतो
सौ नववार्षिकः ततस्तां भूषणा दुष्टुमी स्वशीपुत्रदुःखितां सखीभावादतिस्नेहात्सुचेतःसे:
परिचारिता अल्पकाभरणा भद्रा स्वरूपेणैव भूषिता सा हि भद्रा द्विजस्या भार्या भूषण
नामिका पुरोहितस्य कालेन कुक्कुटी बहुपुत्रिणी तां दृष्ट्वा तादृशीं भर्यां प्रजज्वालेर्ष्य
शी रुषा ततो गृहे प्रेषयित्वा ज्वालिनी तीव्रमत्सरं चिंतयामास सा शीघ्रं तस्याः पुत्रवधं प्र
ति निश्चित्य चेतसा क्रूरा घातयामास ततस्तु तान् हताहतास्ते पुत्राः पुनर्जीवंत्य नामयाः ११२
तदद्भुततरं दृष्ट्वा सा चीमाहूय भूषणां उपविश्य मनेश्रेष्ठे बहुमानपुरःसरं सपृच्छदिस्म
त्तु=

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

विधिं लेखयित्वाशिवं शांतं सुमया सह शंकरं गंधपुष्पादिभिर्भक्त्या पूजयित्वा यथाविधि
प्रणम्य गंतुकामास्ते पप्रच्छुर्वै रविप्रियः ता ऊचुः शंकरो ऽस्माभिः पार्वत्या सह पूजितः बध्वा
सूत्रमयं तंतुं शिवस्यात्मा निवेदितः धारणीयमिदं तावद्यावत्प्राणविधारणं तासां तद्
वचनं श्रुत्वा सख्यौ चैते तापि देवकि कृत्वा तु सममयं तत्र बबंधादोर्मूले तु दोरकं ततस्ताः स्वगृ
हं जग्मुः स्वसखीभिः समावृताः कालेन महता तस्यास्तद्व्रतं विस्मृतं शुभं चंद्रमुख्याः त
प्रमत्ताया विस्मृतः स तु दोरकः भद्रमुख्यास्तथा भद्रे विस्मृतं सर्वमेव तत् सताकेऽपि
दृढो राज्ञैः सा वभूव वभूवं गमी भद्रास्या कुक्कुटी जाता त्वं तमंगाश्रुमानने संभूय भूयसमयं
प्राग्व्रतं च कृतं सदा कालेन पंचतां प्राप्ते सखीभावात्सहैव ते प्रदेवमात्रके देवि जातेऽपि
कुले संयुगे ज्ञा... जाता यासीच्चंद्रमुखी पुरा नाम्ना भद्रमुखी यासील्लक्ष्मणा ना
म सा भवत् अग्निमीलस्य सा दत्ता पित्रा तस्य पुरोधसः सती व वत्सभावासील्लक्ष्मणा लक्ष्मणा

83

इतिपूजनम्

व्र॰ कौ॰ सर्वान्कामानवाप्नोति पुत्रैः पौत्रैश्च मोदते ॥ अथ कथा ॥ हेमाद्रौ भविष्योत्तरे श्रीकृष्ण उवाच ॥ मुनीन्द्रो

१११ लो... मशो नाम मथुरायां गतः पुरा ॥ सोर्चितो वसुदेवेन देवक्या च युधिष्ठिर ॥ उपविष्टः कथाः पुण्याः

कथयित्वा मनोरमाः ॥ ततः कथयिते भूप कथामेतां प्रचक्रमे ॥ कंसेन ते हताः पुत्रा जाता जाताः पुनः पु पु

नः ॥ मृतवत्सासि देवकि त्वं पुत्रदुःखेन दुःखिता ॥ यथा चंद्रमुखी दीना वभूव नहुषप्रिया ॥ पश्चा

च्चीर्णव्रता चैव वभूवाजीवत्सका ॥ त्वमपि देवकि तथा भविष्यति न संशयः ॥ देवक्युवाच ॥

कासौ चंद्रमुखी ब्रह्मन्वभूव नहुषप्रिया ॥ किं चीर्णं हि व्रतं दिव्यं तया संततिवर्द्धनं ॥ सपत्न्यादर्पद

मनं सौभाग्यारोग्यदं विभो ॥ लोमश उवाच ॥ अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः ॥ तस्या

सीद्रूपसंपन्ना देवी चंद्रमुखी प्रिया ॥ तथा तत्रैव नगरे विष्णुगुप्तो भवद्द्विजः ॥ आसीत्पुण्यवतां त

स्य पत्नी भद्रमुखी तथा ॥ तयोरासीद्रतिः प्रीतिः स्पृहणीया परस्परं ॥ अथ ते द्वे पि सख्यौ वै स्नाना १११

र्थं शरयूजले ॥ प्राप्ते माघाश्च तत्रैव सर्वा वै नगरांगनाः ॥ तां स्नात्वा मंडलं चक्रुस्तन्मध्ये चोक्तरू

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ति ×२

84

रुपेण कृपया त्वं गृहाण चै कस्तूरिकासमायुक्तं मलयाचलसंयुतं गृहाण चंदनं सोम करोद्वर्तन
हेतवे करोद्वर्तने नारिकेलफलं जंबूफलं नारंगमुत्तमं कूष्मांडं पुरतो भक्त्या कल्पितं प्रतिगृह्य
तामिति फलं पूगीफलं महद्दिव्यं मिलितो रलं समास्यासन्नहिरण्यगर्भं दक्षिणा भक्त्यादीयमिति
पुष्पांजलि नीराजनम् यानि कानि चेति प्रदक्षिणा महादेव महाराज मम्याप साम्रनाशन अस्माकं कुर्वतां प
:४४ जां साधुर्वा साधुर्यो ज्ञितो ज्ञानतो ज्ञानतो वापि भवतो विहितो चया संपूर्णेय तु विश्वेशो विमलः
ल को मस्तु तां यावो हमिति प्रार्थना देवदेव जगन्नाथ सर्वसौभाग्यदायक गृहीयां दोररूपं त्वां पुत्र
पौत्रप्रवर्द्धनं दोरकग्रहणम् सप्तसामोपगीतं त्वां धारयामि जगद्गुरो सूत्रग्रंथिस्थितं नित्यं धारया नृ ३
मि स्थिरो भव इति वयनं मंत्रकांत्र रक्षानृपर्ण घृतान्नं दक्षिणायुतान् एकादश शानकृतं ब्राह्म
णाय कुटुंबिने वेदशास्त्रप्रवीणाय स्याल्लोमस्य लक्ष्ये शंकरं प्रतिगृह्णाति शंकरो वै ददाति च शं
करस्तारको स्माकं शंकराय नमो नमः इति वायनम् एवं याप्रजनं कुर्यात्सोमस्यैव रसमच

हर पापानि सर्वाणि शिवं कुरु दयानिधे प्रस । २
न्नः सन्नुमां कांत दीर्घायुः पुत्रदो भव ×३
श्रीरामदेवको गौरखं अथ ×३

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ग्रा०दे० ४२

ग्र०कं० मध्वाज्यशर्करासिद्धम्धयापरिकल्पितं शंकरप्रीतयेचेदंमधुपर्कंनिवेदये मधुपर्कं पंचा
११ मृतस्नानं पञ्चामृतेनवारिणांस्नानेंकुरुमहादेवविजयाकांतयासह पंचामृतेणे तिस्नानं स्ना
नार्थमहादेवसीतापापप्रनाशनं वस्त्रयुग्मंमयादत्तमहतंप्रतिगृह्यताम् तेयज्ञंवस्त्रं उप
वीतंसोत्तरीयंनानाभरणभूषितं गृहाणसोमविमलंमयादत्तमिदंशुभं तस्मायज्ञात्सर्व
हुतः यज्ञोपवीतं मलयाचलसंभूतंस्तगंधियनसारकं चंदनंदेववरदनगृहाणवनितायुतं
गंधं नातीचंपकपुन्नागवकुलैः पारिजातकैः शतपत्रैस्रकहारैरर्चयेहंउमापतिं तस्मादश्वां
श्वांपुष्पाणि त्रैलोक्यपावनानेतपरमात्मंजगद्गुरो चंदनागरुकर्पूरंधूपंदास्यामिशंकर
धूपं शुभवर्त्तियुतंसर्पिर्लोलितेवह्निनायुतं दीपमेकंनेकार्कप्रतिमाकल्ययान्वितमिति दीपं
पायसापूपकशर्करादुग्धान्नंसगुडोदनम् दिव्यान्नंषड्रसोपेतंसुधारससमन्वितम् समर्प ११
यामिदेवेशकिंकरःशंकरायते नैवेद्यं पुनराचमनंशुद्धंकुरुसोमावुनामुना मुखशुद्धिक

नू म२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

सर्वतोविस्मयं जगज्जीवनीयाति रक्षणात् ज्वालिनी हर्षिता वरदा प्राणिपत्य पातिव्रता याचेमा
तन्ने भूयो नो वैधव्यं च वियोगता अन्यापि शीतलायास्तु व्रतं नारी करिष्यति अवैधव्यम
दारिद्र्यमवियोगः सम्भवेत्ता इत्युक्तान्तर्दधे देवी शीतला कामरूपिणी शीतलायाव्रतं लब्ध्वा
जगामालीपवेश्मनि पद्मानिवासप्रभृति विश्ववंद्य समहेलो साधितसर्वमंगला प्रसाद
मासाद्य च शीतलाया नित्योत्सवा या वर्तितव्रतभव इमाखोभविष्ये शीतलाव्रतम् अथ ध्या इति
नम्त्कमसमन्वां मुक्ताभरणभूषितप्रजा देवदेव महेशान परमात्मन् जगद्गुरो प्रतिपादितया
सोमपूजया पूजयाम्यहं इत्यावाहनं अनेकरत्नखचितं सौवर्णमणिसंयुतं मुक्तान्वितं महा
देव सर्वविद्यापरायण [illegible]नं ध्यानगम्य सतां शंभो सर्वेश्वर नमोस्तु ते इति पाद्यं इदमर्घ्य
मनर्घ्यत्वममराधीश शंकर किंकरीभूतया सोमया दत्तं गृहाण वै इत्यर्घ्यं गंगादिस
र्वतीर्थेभ्यः समानीतं सुशीतलं जलमाचमनीयार्थं गृहाणेश सोमयाहृतं इत्याचमनम्
गृहाणासनमुत्तमम् इत्यासनम् पाद्यं गृहाण देवेश ४३

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ब्र.की. तोषयामास शीतलां पूजयित्वा च तां देवी स्वपदं गंतुमुद्यता शीतलाया वरं गृह्य सह सख्या च
१.९ प्रस्थिता यथा च देहं श्वशुरस्य स्वभर्त्ता किं नु वसति सरोवरे समायाता तोन्वेषयं शीतविग्रहः श्री
तलाणो निद्रया सुप्तः पूर्वकर्मप्रभावतः दष्टो भुजंगरूपेण संयुक्तः पूर्वकर्मणा विज्ञाय तं पतिं
दृष्ट्वा शीतलायाः पतिव्रता वरं संगृह्य बालाया रुरोद करुणं बहु तयोस्तु रुणं दयसोर्या
ग्य सौभाग्यदर्शनात् रुदंती करुणं बाला शोचयामास तं द्रुतम् यावन्न परलोकस्थं जनं सं
गत्य तत्क्षणे कुशलेन सहैवाद्य अनुगच्छामि वह्निना तस्मात्संसाधयिष्यामि पावकं पति
ना सह अर्जयित्वा दिवं दिव्यं संक्षयं च भवांतरे शीतलाउवाच वत्से किमिदमित्युक्तं नश्रु
तं वरं वर्णिनि शीतला व्रतचारिण्या वैधव्यं नैव जायते स्वयमुक्त्वा पाकल्याणि यतिं सुप्त
गृहे तदा बोधयाद्य त्वया चीर्णं व्रतं वैधव्यनाशनं इत्युक्त्वा बोधयामास भर्त्तारं सा पतिव्र १.९
ता भर्त्तापि मुदितो दृष्ट्वा स्वां प्रियां व्रतकर्मणा दृष्ट्वा तु महदाश्चर्यं तत्र ग्रामस्थापि नो जनाः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

श्रीमोचः 88

चारुहासिनी तस्यै श्रीमन्नं यामास जामाता कृतविग्रहः रथमारुह्य हे स्वामिन् यास्यामि स्वपु
रे गृहे तस्याः पिता त्वुवाचेदं दंपत्योः शुभहेतवे पुत्रि त्वं सुस्थिरा भूत्वा वारमेकं क्षमस्व मे
सीतलासप्तमीनामव्रतं चरस्व ते शुभे सौभाग्यारोग्यजनकं श्रवैधव्यप्रदं तथा कन्योवाच
तात तत्र परिज्ञातं यदुक्तं यद्य योनिना पतिव्रतासमो धर्म्मो नास्ती ह भुवनत्रये ततस्ताकार
यामास शीतलाव्रतमुत्तमं पुत्रीं संप्रेषयामास ब्राह्मणो ब्रह्मपारगः व्रतोपकरणं पुत्री मार्गे
पृच्छ्य सरोवरे मार्गे पथ्यानि संगृह्य व्रतोपकर[illegible]शुभा शीत
लापूजने हेतो गत्वा साध्वी सरोवरं तत्र दृष्ट्वा तया मोहात्तडागे विधिसाधने वभ्राम सा वने भ्रान्त्वा
स्मरंती शीतलाव्रते भ्रांतिश्रांता यया मोहात्त भयेन करुणं वहु स्मरंती शीतलां नारी वृद्धरूपा द
दर्शसा स्ववासरे विज्ञानी हि साध्वी सा वरवर्णिनी भविष्यति चिरं जीवी भर्त्ता ते भक्तवत्सले श्रागः
छ पूजनार्थाय दर्शयामि सरोवरं तया सह गता साध्वी तडागे विधिपूर्वकं पूजयामास शर्वाणी

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

89

ब्र·कं· मस्तकामिति कुंभे संस्थाप्य येद्देवीं पूजयेन्नाममंत्रतः। शीतले दह्र मे पापं पुत्रसौख्यफलप्रदे
१०८ धनधान्यप्रदे देवि पूजां गृह्ण नमोस्तु ते इति प्रार्थना पूजां विधाय शीतले शीतलाकारे सर्वैश्वर्य
सुतप्रदे श्रावणस्यासिते पक्षे अर्घ्यं गृह्ण नमोस्तु ते इत्यर्घ्यं दद्यात् शीतलेन्नानि पक्वानि दध्यासमन्वि
तानि च नैवेद्यं च प्रकुर्वीत घृतमिश्रं च सुंदरि गोश्रेणां भोजयेत्सम्यक् पूजनीयाः प्रयत्नतः इति पूजावि
धिः अथ कथा हेमाद्रौ भविष्यत्पुराणे कृष्ण उवाच प्रसिद्धं श्रूयतां रम्यं नगरं हास्तिनापुरं इंद्रप्र
स्थेश्वरो राजा भूत्तत्र नृपतिर्लोकपालकः धर्मशर्म द्विजो नाम यस्य भार्या यशस्विनी क्रियानाम्नी च साध्वी
च दानशीला प्रियंवदा बभूव प्रथमं पुत्रो महाधर्मेति नामतः। बभूव पितुर्गृहे सर्वा गुणगणसुं
दरी नानारूपेण सा बाला सर्वापि सद्गुणाधिका सामुद्रिकगुणोपेता पद्महस्ता प्रियंवदा व कृशोदरा = धि
रोहिदेहमानेन लक्ष्मीवान् रूपवान् गुणैः समाययौ च जयाहपाणिग्रहणपूर्वकं कदाचित्सा पितु १०८
र्गृहे जामाता नयनाय च आजगाम परिजनैः तस्यागमनोत्सुकः श्रवणस्य च पितुः पादोत्वरितं
नंदते पितृवाक्सत्या कालेन्यस्मिन् ततो जनतु द्वितीया च तथा पुत्री तस्य जाता तत्र सौनामा पुत्री लक्ष्
णसंपन्ना शुभकारीति नामतः ४४

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तत्र वैशाखशुक्लसप्तम्यां गंगोत्पत्तिस्तज्जातोक्ता पृथ्वीचंद्रोदये ब्राह्मे वैशाखशुक्लसप्तम्यां ज
ह्नुना जाह्नवी स्वयं क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् तां तत्र पूजयेद्देवीं गंगां गगनमे
खलेति हरिवंशपुराणोक्तव्रतं तत्र प्रातः स्नानमभिधाय गंगायाव्रतकं तत्रैवोक्तं यशस्करं स्त्रीणा
नमप्यधिकं कार्यं प्रसवस्य महोत्सवे जले अथ वा जले स्नानं शुक्लपक्षे हरिप्रिये एतद्गंगाव्रतं नाम स
र्वकामप्रदं शुभे सप्तसप्त च सप्ताथ कुलानि हरिवल्लभे स्त्री तारयति धर्मज्ञे गंगाव्रतकचारिणी
देयं कुंभसहस्रं तु गंगाया व्रतके शुभे तारणे पारणे चैव तद्व्रतं सर्वकामिकमिति गंगाव्रतम् ॥
अथ शुक्लादिश्रावणकृष्णसप्तम्यां शीतलाव्रतं तत्र मध्याह्नव्यापिन्यां कार्यं तथा च माधवीये सारी
तः प्रजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति अथ तद्विधिः मासपक्षाद्युल्लिख्य ममावैधव्यादा
रिपुत्रपौत्रयोगक्षेमसौख्यधनधान्यप्राप्तये शीतलाव्रतं करिष्य इति संकल्प्य कुंभं संस्थाप्य तदुपरि शीत ६
लां पूजयेत् तत्र तद्ध्यानम् वंदेहं शीतलां देवीं रासभस्थां दिगंबरां मार्जनीकलशोपेतां सूर्पालंकृत

त्रै ४२

व्य इति संकल्प्य यथामिलितोपचारैः शीत
लां पूजयि ४२

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

९१

व्र.कं. मार्गवीं लक्ष्मीं दत्वार्घ्यं कार्त्तिकेयाय यास्थितो वै दक्षिणामुखः । रक्ताक्षतोदकैः पुष्पैः मंत्रेणानेन सु
१७ व्रत सप्तर्षिदारज स्कंद सेनाधिप महाबल रुद्रोमाग्निज षड्वक्त्र गंगागर्भ नमोस्तु ते प्रीयतां देव
सेनानीः संपादयतु हृद्गतं दत्वा विप्राय चामान्नं यच्चान्यदपि वर्त्तते पश्चाद्भुंक्ते तु सो रात्रौ भूमिं
कृत्वा तु भाजनं एवं षष्ठीव्रतस्यास्य उक्तं स्कंदेन यत्फलं तन्निबोध महाराज प्रोच्यमानं मयाखिलं
षष्ठ्यां फलाशनो यस्तु नक्ताहारो भविष्यति शुक्लायामथ कृष्णायां ब्रह्मचारी समाहितः । तस्य सिद्धि
र्धृतिः पुष्टिः राज्यमायुरनामयं पारत्रिकं चैहिकं च दद्यात्स्कंदो न संशयः यं शक्तो नोपवासस्य
स नक्तेन व्रती भवेत् तैलं षष्ठ्यां न भुंजीत न दिवा कुरुनेदनं यस्तु षष्ठ्यां नरो नक्तं कुर्यान्नरनसत्त
मः सर्वपापैर्विनिर्मुक्तो गांगेयस्य प्रसादतः स्वर्गे च नियतं वासो लभते नात्र संशयः इह चागत्य का
लेन यथोक्तफलभाग्भवेत् देवानामपि वंद्योसौ राजराजो भविष्यति इति श्रीस्कंदषष्ठीव्रतं ० १७
इति श्रीमद्भट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के षष्ठीव्रतानि अथ सप्तमीव्रतानि ।।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

आदित्यं पूजयेद्देवं नामभिः स्वैर्यथोदितैः आदित्य भास्कर रवे भानो सूर्य दिवाकर । प्रभाकर
नमस्तुभ्यं संसारान्मां समुद्धर । भुक्तिमुक्तिप्रदो यस्मात्तस्माच्छांतिं प्रयच्छ मे प्रार्थनामंत्रः नमो
नमस्ते वरद ऋक्सामयजुषां पते नमोस्तु विश्वरूपाय विश्वधात्रे नमोस्तु ते एवं संपूज्य विधि
वद्देवदेवं दिवाकरं पूजयेत्कपिलां धेनुं वस्त्रमाल्यानुलेपनैः दानमंत्रः दिव्यमूर्त्तिर्जगच्चक्षुर्द्वा
दशात्मा दिवाकरः कपिलासहितो देवो मम मुक्तिं प्रयच्छतु तस्मात्त्वं कादिह्या सर्वलोकस्य पावनी
प्रदत्ता सहसूर्येण मम मुक्तिप्रदा भव इति श्रीहेमाद्रौ स्कांदे कपिलषष्ठीव्रतं अथ सर्वासु षष्ठी
षु स्कंदषष्ठीव्रतं हेमाद्रौ भविष्ये श्रीकृष्ण उवाच षष्ठ्यां फलाशनो राजन्विशेषात्कार्त्तिके नृप
राज्यच्युतो विशेषेण स्वराज्यं लभतेऽचिरात् षष्ठी तिथिर्महाराज सर्वदा सर्वकामदा उपोष्या सा प्रय
त्नेन सर्वकालं जयार्थिना कार्त्तिके यस्य दायिता एषा षष्ठी महातिथिः देवसेनाधिपत्यं हि प्राप्तमस्मा
महात्मना अस्यां हि श्रीसमायुक्तो यस्मात्स्कंदोऽभवत्पुरा तस्मात्षष्ठ्यां न भुंजीत प्राप्नुयाद्भार्गवीं सदा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ब्र.कै.
१.६

ततः प्रदक्षिणां कृत्वा दत्वा ब्राह्मणे पुंगवान् आशीर्वादान्वदेयुस्ते पुत्रपौत्रधनागमान् आरो
ग्यं रूपसौभाग्यं सर्वदुःखविवर्जितः अंते गोलोकमासाद्य चिरायुः सुखवान्भवेत् यदा स्वर्गात्प्रच्य
ततो राजा भवति धार्मिकः सप्तद्वीपवतीं भुंक्ते भुक्त्वा राज्यमकंटकं अतो व्रतमिदं पुण्यं सर्वदुःखप्र
णाशनं अतः परं प्रवक्ष्यामि दानस्य फलमुत्तमं तदा देवमयं पात्रं महत्तेजास्वयं भवेत् व्रतेन सर्वे व्रत
श्रेष्ठमिदमग्र्यं महाफलं उद्धरिष्यति दातारं नूनमक्षयमव्ययं एते देवगणाः सर्वे भूतसंघातदर्शि
लेप ताः आकाशस्थांबुजं अंतिके सिद्दिवसागमे पात्रभूताय यज्ञपये श्रोत्रियाय कुटुंबिने एवं यः कापि
लोटपात्रविधिं दृष्टेन कर्मणा सयाति परमं स्थानं यावन्नच्यवते पुनः स्कांदे पु भाद्रखंडे तद्विशेषः
ऽपाल्ले मसु भे देशे पुष्पास्तराविभाषिते स्थापयेत्कलशं कुंभं चंदनोदकपूरितं पंचरत्नसमायुक्तं
दूर्वापुष्पास्तरान्विते वस्त्रयुग्मच्छन्नं ताम्रपात्रेण संयुतं रूप्यो रौप्यपलस्यैव चतुरष्टकः सुविचि
त्रितः सौवर्णपलसंयुक्तां मूर्तिं सूर्यस्य कारयेत् कुंभस्योपरि संस्थाप्य गंधपुष्पैः समर्चयेत् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पूजयेत्तत्र शान्त्यां च देवीं स्वविधिवत् गुरुः होमोऽर्कस्य समिद्भिश्च घृतात्सिद्धो तिलैस्तथा संसिद्धं चरु
रुद्रं च घृतं तेन च जुहुयाद्द्विजः आकृष्णेनेति मंत्रेण शतमष्टोत्तरं क्रमात् होमो व्याहृतिभिर्वा पास्त्विष्टकृ
त्तदनंतरं कपिलां पूजयेद्देवीं सवत्सां पापनाशिनीं वस्त्रयुग्मं सघंटां च स्वर्णशृंगां विभूषितां सुवर्णास्यां
रौप्यखुरां कांस्यदोहनकान्वितां मंत्रेणानेन दद्यात्तु ब्राह्मणायेति शक्तितः कपिले सर्वदेवानां पूजनी
यासि रोहिणि सर्वतीर्थमयी यस्मादतः शांतिं प्रयच्छ मे आचार्यस्य ततो भक्त्या सर्वं पाणौ विनिक्षिपेत
गोमूत्रं हिरण्यं वा ताम्रं क्षीरं यवो लवणं तिलाः एतत्सर्वं प्रदत्वा च कपिलां प्रार्थयेत्ततः कपिले पुण्यक
र्मासि निष्पापे पुण्यकर्मणि मां समुद्धर दीनं च दत्तोऽक्षयं कुरु दिवि वादित्रशब्दैश्च पूज्यसे कपि
लासदा तथा विद्याधरैः सिद्धैश्च मनागगणैर्वृता कपिलारोमसंख्यातास्तत्र देवाः प्रतिष्ठिताः पुच्छ च
स्थं प्रमं चेति नित्यमाकाशसंस्थिताः उत्पन्ना त्वादिता देवी अग्निकुंडात्समुद्भवा नमस्ते कपिले पुण्ये
सर्वदेवनमस्कृते जगन्निवासे महीसत्वे सर्वतीर्थादिमंगले दातारं यजमानोपि तेन तल्लोकं नयस्व वै

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

95

पा.मा. २७३ स्ववेश्मनः आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैरि
ति अत्रापरो विशेषः शंखेन दर्शितः दूर्वाप्रवालमग्निं वृषभं चालभ्य गृहद्वारे प्रेताय पिंडं दत्वाप
श्चात्प्रविशेयुरिति आशौचे नियमा दर्शिताः अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहं मांसा
शनं च नाश्नीयुः शयीरंश्च पृथक्क्षिताविति मार्कंडेयेनापि क्रीतलब्धाशनाश्चैव भवेयुः
सुसमाहिताः न चैव मांसमश्नीयुः शेरेयुर्न च योषितमिति गौतमेनापि अधःशय्यासनं ब्र
ह्मचारिणः सर्वे समासीरन् मांसं न भक्षयेयुराप्रदानात् प्रथमतृतीयसप्तमनवमेषूदकक
र्म नवमे वाससां त्यागः अंते त्वन्त्यानामिति प्रदानमिहैकोद्दिष्टश्राद्धं वाससां त्यागस्तु प्रक्षा
लनार्थं रजकार्पणं अंत्यं दशममहः तत्रान्त्यानामन्त्यजपरिग्राह्याणां वाससां त्याग इत्यर्थः
प्रथमेऽहनि प्रेतमुद्दिश्य जलं क्षीरं वा काष्ठशिक्याद्यैः पात्रे ह्युपस्थापनीयं तदाह याज्ञवल्क्यः
जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृण्मये इति प्रथमतृतीयसप्तमनवमदिवसानामन्य
तमस्मिन्नस्थिसंचयनं कार्यं तदाह संवर्तः प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा अस्थि
संचयनं कार्यं दिने तद्गोत्रजैः सहेति चतुर्थे दिवसेऽस्थिसंचयनमाह विष्णुः चतुर्थे दिवसे पा.म. २७३
ऽस्थिसंचयनं कुर्यात् तेषां गंगांभसि प्रक्षेप इति अस्थिसंचयने वारनक्षत्रनिषेधो यमेनोक्तः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

मापयेत् तद्देवोत्तरं तंत्रं दर्शे समापयेत् नार्वाग्दर्शाद्यानि इदमनोरसकृत्त्वविषयमिति केचित् य
त्तु गौतमेनोक्तं ऊर्ध्वं दशाहाद्दर्शेऽप्येतन्नत्र सर्वं समापयेत् पित्रोस्तु यावच्छौचं दद्यात्पिंडान्
जलांजलीनिति तत्त्रिरात्रादर्वाग्दर्शाद्यानि वेदितव्यं महान्तरमिति गालवेन विशेषितत्वा
त् पिंडोदकदानानंतरं बांधवैः शान्त्यर्थं भाषणं कार्यं तथाच याज्ञवल्क्यः कृतोदकान्समुत्ती
र्णान्मृदुशाद्वलसंस्थितान् स्नातानपवदेयुस्तानितिहासैः पुरातनैरिति इतिहासस्वरूपं ते
नैव दर्शितः मनुष्ये कदलीस्तंभनिःसारे सारमार्गणं करोति यः स संमूढो जलबुद्बुदस
न्निभे पंचधा संभृतः कायो यदि पंचत्वमागतः कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेव
ना गंत्री वसुमती नाशमुदधिर्दैवतानि च फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यतीति
कात्यायनोऽपि एवं कृतोदकान्सम्यक् शुद्धशाद्वलसंस्थितान् आप्लुतान्नराचांतांश्च
देयुस्ते तु याचिनः माशोकं कुरुत नानित्ये सर्वस्मिन्प्राणधर्मिणि धर्मं कुरुत यत्नेन यो
वः सह मरिष्यतीति शोके दोषो याज्ञवल्क्येन दर्शितः श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुं
क्ते यतोऽवशः अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नत इति आप्लुतानामाचमनानंतरकृत्यं
याज्ञवल्क्येनोक्तं इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः विदश्य निंबपत्राणि नियता द्वा

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰मा॰ २७२ एवं पिंडं दद्यात् तथाच मरीचिः सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं द्रव्येण चाविभक्तेन सर्वै
रेव कृतं भवेदिति यदा तु पुत्रासन्निधानादिनान्यः पिंडदानं करोति तदा दशाहमध्ये पुत्रसा
न्निध्येपि स एव दशाहांतं पिंडं दद्यात् तदुक्तं गृह्यपरिशिष्टे असगोत्रः सगोत्रो वा यदि स्त्री य
दि वा पुमान् प्रथमेहनि यः कुर्यात्स दशाहं समापयेदिति यथा दशाहं पिंडदाने कर्तृनियमः
तथा द्रव्यनियमोपि तदाह शुनःपुच्छः शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत् प्रथ
मेहनि यद्द्रव्यं तदेव स्याद्दशाहिकमिति यदा तु दशाहमध्ये दर्शपातस्तदा दर्श एवोत्तरतं
त्रं पिंडोदकदानं तत्समापयेदिति तदाह ऋष्यशृंगः आशौचमंतरा दर्शो यदि स्यात्तत्र वै
ल्लिनः समाप्तिं प्रेततंत्रस्य कुर्यादित्याह गौतम इति भविष्यपुराणेपि प्रवृत्ताशौचतंत्र
स्तु यदि दर्शः प्रपद्यते समाप्य चोदकं पिंडान् स्नानमात्रं समाचरेदिति पैठीनसिरपि आ
द्येदेवच कर्तव्या प्रेतपिंडोदकक्रिया छिद्रेदवे तु कुर्वाणः पुनः शावं समश्नुत इति
मातापितृविषये तु विशेषो गालवेनोक्तः पित्रोराशौचमध्ये तु यदि दर्शः समापतेत् राम २७२
तावदेवोत्तरं तंत्रं पर्यवस्येदहान्यरमिति पित्रोराशौचमध्ये त्रिरात्रात्परं यदि दर्शः स

नाऽऽहितन्भगिन्यादिः स्वस्त्रीयो मातुलेयः अत्र दौहित्रानां मातामहादीनां सपिंडवदुदकदा
नं नित्यं कार्यं सख्यादीनां तु कामेन नित्यत्वं तथाऽकरणे प्रत्यवायाभावादिति उदकदाना
नंतरं पिंडदानमधिकं तेषां तथा चाविष्णुः प्रेतस्योदकनिर्वपणं कृत्वा एकं च पिंडं कुशेषु
कार्यं दद्युरिति पिंडोदकदानं च यावदाशौचं तदाह मरीचः यावदाशौचं तावत्प्रेतस्योदकं पिंड
च दद्युरिति वर्णानुक्रमेण पिंडसंख्यानियमः पारस्करेणोक्तः ब्राह्मणे दशपिंडास्तु क्ष
त्रिये द्वादश स्मृताः वैश्ये पंचदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिता इति आशौचह्रासे यथा
वदाशौचमिति विष्णुवचनात् पिंडसंकोचप्राप्तौ शातातपः अशौचस्य च ह्रासे पिं
डान्दद्याद्दशैव त्विति त्रिरात्राशौचपक्षे दशपिंडदानप्रकारः पारस्करेणादर्शितः प्रथ
मेऽह्नि देयास्त्रयः पिंडाः समाहितैः द्वितीये चतुरो दद्यादस्थिसंचयनं तथा त्रींस्तु द
द्यात्तृतीयेऽह्नि वस्त्रादीन्क्षालयेत्तथेति उदकदानवत्पिंडदानं न सर्वैः कर्तव्यं स्वपितुः
पुत्रेणैव तदभावे सन्निहितेन सपिंडेन तदभावे मातृसपिंडादिना तदाह गौतमः पुत्रा
भावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्याविति पुत्रेष्वपि ज्येष्ठ

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

रमा

९९

पा॰मा॰
२७१

वं दक्षिणाग्रान्कुशान्कृत्वा सतिलं तत्र पृथक् सकृदिति पैठीनसिरपि प्रेतं मनसा ध्यायन्
दक्षिणामुखस्तिलोदकांजलीन्निनयेदिति एतच्चायुग्मतिथिषु कार्यं प्रथम
तृतीयपंचमसप्तमनवमेषूदकक्रियेति गौतमस्मरणात् प्रेतोपकारविशेषापे
क्षया तु यावदाशौचदिनानि तावदुदकदानावृत्तिः कार्या तथा च प्रचेताः दिने
दिनेंजलीन्पूर्णान्प्रदद्यात्प्रेतकारणात् तावद्वृद्धिश्च कर्तव्या यावत्पिंडः समाप्य
त इति यावद्दशमः पिंडः समाप्यते तावदंजलिवृद्धिः कार्येत्यर्थः अत्रापरो विशे
षस्तेनैवोक्तः नदीकूलं ततो गत्वा शौचं कृत्वा यथार्थवत् वस्त्रं संशोधयेत्पादौ
ततः स्नानं समाचरेत् सचैलस्तु ततः स्नात्वा शुचिः प्रयतमानसः पाषाणं ततस्त्वा
दाय विप्रे दद्याद्दशांजलीन् द्वादश क्षत्रिये दद्याद्वैश्ये पंचदश स्मृताः त्रिंशच्छूद्रा
य दातव्यास्ततः संप्रविशेद्गृहं ततः स्नानं पुनः कार्यं गृहशौचं च कारयेदिति अत्रा
तिभिरपि कैश्चिदुदकदानं कर्तव्यं तदाह याज्ञवल्क्यः पूर्वं मातामहाचार्यप्रेता
नामुदकक्रिया कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजामिति प्रत्तापरिणी

राम
२७१

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तु श्रौताग्निना दग्धव्यः अनाहिताग्निर्गृह्याग्निना इतरो लौकिकेन तथाह वृद्धयाज्ञवल्क्यः
आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः अनाहिताग्निरेकेन लौकिके केनेतरो जन
इति एकेन गृह्याग्निना दाहः अन्नमपनाद्यनन्तरं कार्यः तथा च कात्यायनः दुर्बलं स्नाप
यित्वा च शुद्धचैलाभिसंवृतं दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत् घृतेनाभ्य
क्तमाप्लुत्य सवस्त्रं चोपवीतिनं चंदनोक्षितसर्वांगं सुमनोभिर्विभूषयेत् हिरण्य
शकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु मुखेष्वथ स्वेति धायेनं निहरेयुः सुतादयः आ
मपात्रेन्नमादाय प्रेतमग्निपुरःसरम् एकोनुगच्छेत्तस्यार्द्धमर्द्धपथ्युत्सृजे
द्भुवि अर्द्धमादहनं प्राप्य आसीनो दक्षिणामुखः सव्यं जान्वाच्य शनकैः सतिलं पिण्ड
दानवदिति पिंडदानविधिना आदहनं श्मशानपर्यंतमानीतमन्नं प्रक्षिपेद
इत्यर्थः दाहानंतरं चितिमनवेक्षमाणो ज्ञातयो जलसमीपं गत्वा स्नात्वोदकं
सकृत्त्रिर्वा दद्युः तथा च कात्यायनः अपानवेक्ष्य चैनमापः सर्वे एव शवस्पृशः
स्नात्वा सचैलमाचम्य दद्युरस्योदकं स्थले गोत्रनामपदांते च तर्पयामीत्यनंत

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰मा॰ अननुगमादिविषयस्तु याज्ञवल्क्येन दर्शितः आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः यम
२७० सूक्तं तथा गाथां जपद्भिर्लौकिकाग्निना स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवदिति
ऊनद्विवर्षादितरः स पूर्णद्विवर्षो मृतो ज्ञातिभिः सपिण्डैः श्मशानभूमिं यावदनुगन्तव्यः
तथा यमसूक्तं परेयिवांसमिति षोडशर्चं तथा यमदेवत्या गाथाश्च जपद्भिर्लौकिका
७ ग्निना स दग्धव्यश्च उपेतः उपनीतश्चेत्ततः तदाहिताग्निसंस्कारप्रकारेणार्थवत्प्र
योजनं यद्यथा भवति तथा दग्धव्यः अयमभिप्रायः येषां भूशोधनप्रोक्षणादीनामाहि
ताग्निविहितसंस्काराणां द्वारं कार्यरूपं प्रयोजनमस्ति तान्यनुष्ठेयानि यानि तु मार्थानि ना
पात्रप्रयोजनादीनि नानुष्ठेयानि यथा कृष्णलेष्वतिदेशप्राप्तस्यावघातप्रोक्षणा
दिषु द्वारलोपादवघातादीनामननुष्ठानं प्रोक्षणादीनां त्वनुष्ठानमिति अत्र लौ
किकाग्निगृह्यसंज्ञानान्तराग्निरभावेन तत्सद्भावे तु तन्मध्ये नोऽग्निर्ग्राह्यः ननु लौकिको
ऽग्निः तस्याग्निसंपाद्यकार्यमात्रार्थत्वेनोपपत्तेः लौकिकाग्निश्चाण्डालाग्न्यादिव्य राम
तिरिक्तो ग्राह्यः तेषां निषिद्धत्वात् तथा च देवलः चण्डालाग्निरमेध्याग्निः सूतका २७०
ग्निश्च कर्हिचित् पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचिताः इति आहिताग्नि

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

शेषास्त्रवर्णेऽपि बालानां समसमवर्णं तत्र क्षत्रियस्य मरणे विप्रयान्तरव्यंजने यदाशौचं क्षिवदि
तं तदेवात्रेति न्यायतो ज्ञावगम्यते अदन्तमरणे विप्रयान्तरव्यंजने स्थिसंचयनात्प्राक्
ब्राह्मणस्य त्रिरात्रमाशौचं क्षत्रियवैश्ययोर्द्विरात्रं तत ऊर्ध्वं द्विजातीनामेकरात्रमेव अ
दन्तस्य स्पर्शविनान्तरव्यंजने स्थिसंचयनादर्वागेकरात्रमाशौचं तत ऊर्ध्वं सद्योतिराशौच
मिति तथाच पारस्करः अस्थिसंचयनादर्वाग्यदि विप्रोऽभ्युपातयेत् मृते शूद्रे गृहं ग
त्वा त्रिरात्रेण विशुध्यति अस्थिसंचयनादूर्ध्वं मासं यावद्द्विजातयः अहोरात्रेण शुद्ध्यं
दाः ति वाससः क्षालनेन च स्नानेर्दिवसेनैव क्षत्रियवैश्ययोः स्पर्शविनानुगम
ने शूद्रे नक्तेन शुध्यतीति अत्राभ्युपातग्रान्तरव्यंजनमात्रोपलक्षणार्थः स्नानेः
अदन्तस्यास्थिसंचयनादर्वाक्स्पर्शविनानुगमने ग्रान्तरव्यंजने दिवसेनाहोरात्रे
णा शुद्धिः तत ऊर्ध्वं नक्तेन रात्रौ चेदुदयात्प्राक् निवेदनाच्छुद्धिरिति एतच्च शवनिर्हरणा
नुगमनसहान्तरव्यंजनादिनिमित्तमाशौचमसपिंडानां सपिंडानां तु विहितत्वान्ना
स्ति तथाच हारीतः विहितं हि सपिंडस्य प्रेतनिर्हरणादिकं दोषः स्यादसपिंडस्य तत्रा
नाथक्रियास्थिनेनेति प्रेतनिर्हरणादिकमित्यत्रादिशब्देन दाहोदकदानादिकमुच्यते

102

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा.मा. ते तस्यागतः समाप्तिः तां निर्वर्त्याशौचं परिसमाप्य यदा स्थितास्तदा द्विजैरनुगंतव्या गच्छंत
२६९ स्नात्वाइति एवं ब्राह्मणस्य क्षत्रियवैश्यानुसरणे क्षत्रियस्याप्यानुरवैश्यानुसरण
माशौचानंतरमेवानुष्ठेयम् ग्राशौचमध्येप्यानुरव्यंजने त्वाशौचमस्ति तत्र ब्राह्म
णमरणविषयानुरव्यंजने पारस्करः अस्थिसंचयनादर्वाग्ब्राह्मणाः क्षत्रियादि
वीनुरव्यंजनं कृत्वा स्नानमाचरेत् तत ऊर्ध्वमाचमनमाचरेदिति क्षत्रियमरणविष
यानुरव्यंजने क्षत्रियादीनां वैश्यमरणविषयानुरव्यंजने वैश्यशूद्रयोश्च प्रागस्थिसं
चयनात्सचैलं स्नानमात्रमेव तत्सर्वं ब्रह्मपुराणेभिहितं मृतस्य यावदस्थीनि ब्राह्म
णस्य हतानि तु तावद्यो वांधवस्तत्र रोदिति तद्वांधवैः सह तस्य स्नानाद्भवेच्छुद्धिस्ततस्त्वा
चमनं स्मृतं मम सचैलं स्नानमन्यथा अकृते त्वस्थिसंचये कृते तु केवलं स्नानं द्वच वि
दृश्य इज्जनानामिति ब्राह्मणस्य क्षत्रियवैश्यमरणविषयानुरव्यंजने अस्थिसंचयना
दर्वागेकाहमाशौचं सचैलं स्नानं च तत ऊर्ध्वं सचैलस्नानमात्रं तथा च ब्रह्मपुराणे अ राम
स्थिसंचयने विप्रो रोदिति चेत्तथा वैश्ययोः तदा स्नातः सचैलस्तु द्वितीयेहनि शुध्यति कृ २६९
ते तु संचये विप्रः स्नानेनैव शुचिर्भवेदिति क्षत्रियस्य वैश्यमरणविषयानुरव्यंजने वि

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ईज्ञाल्लोभाज्ञानदुर्बलः अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ४५ त्रि
रात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् प्राणायामशतं कृत्वा घृतं प्राश्य वि
शुध्यति ४६
त्वणः अज्ञानान्मोहाद्वा क्षत्रियं पूर्वमनुगच्छति स एकाहमाशौचं कृत्वा पंचगव्येन शु
ध्यति ब्राह्मणो वैश्यशवानुगमनं कृत्वा द्विरात्राशौचानंतरं षड्भिः प्राणायामैः शुध्य
ति शूद्रशवानुगमनं कृत्वा त्रिरात्रमाशौचं समाप्य सततं नदीं गत्वा शतं प्राणायामा
न्कृत्वा घृतप्राशनेन शुध्यति उपक्रमोपसंहारपर्यालोचनया क्षत्रियादिशवानु
गमनेपि सचैलं स्नात्वाग्निस्पर्श घृतप्राशनान्यनुसंधेयानि एवं च सति क्षत्रियस्य
वैश्यशवानुगमने एकाहं शूद्रशवानुगमने घ्यहं वैश्यस्य शूद्रशवानुगमने एका
हमाशौचमित्यूहनीयम् तथा च कूर्मे एकाहात्क्षत्रिये शुद्धिर्वैश्ये स्याद्द्व्यहेन तु
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनरिति हि ज्ञानी शूद्रशवानुगमनं निषेध
कवाक्यैः शूद्रानुसत्तव्या इत्यनंतरमाह विनिवर्त्येति उदकशब्देनोदकक्रियोच्य
विनिवर्त्य यदा शूद्रा उदकांतमुपस्थिताः द्विजैस्तदनुगंतव्या एष धर्मः सनातनः ४७

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰मा॰ २६८

शौचमाह अनुगम्येति ज्ञातिं सपिंडव्यतिरिक्तं बंधुं सपिंडानुगमनस्य विहितत्वात् अ
ज्ञातिमबंधुं वा समानोत्कृष्टजातिं प्रेतं कामतोयानुगम्य सचैलं स्नात्वाग्निं स्पृष्ट्वा
घृतं प्राश्य शुध्यतीत्यर्थः तथा च याज्ञवल्क्यः अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभु
क् शुचिरिति कूर्मेपि प्रेतीभूतं द्विजं विप्रो योनुगच्छेत कामतः स्नात्वा सचैलं स्पृ
ष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति अत्र च विशेषः कथवेगोक्तः अनुगम्य शवं बुद्ध्या
स्नात्वा स्पृष्ट्वा हुताशनम् सर्पिः प्राश्य पुनः स्नात्वा प्राणायामैर्विशुध्यतीति न च प्र
नष्टाशनस्य भोजनकार्यविधानाद्भोजननिवृत्तिरिति वाच्यं तस्य प्रायश्चित्तत्वेन वि
धानात् प्राणायामैरिति बहुवचनस्य कपिंजलन्यायेन त्रित्वे पर्यवसानात् त्रिभिः
प्राणायामैः शुध्यतीत्यर्थः निकृष्टजात्यनुगमनाशौचमाह क्षत्रियमिति योनु

क्षत्रियं मृतमज्ञानाद्ब्राह्मणो योनुगच्छति एकाहमशुचिर्भूत्वा पंच
गव्येन शुध्यति ४३ शवं च वैश्यमज्ञानाद्ब्राह्मणो योनुगच्छति कृ
त्वाशौचं द्विरात्रं च प्राणायामान्षडाचरेत् ४४ प्रेतीभूतं तु यः शू

राम २६८

तद्व्रतार्थः ब्रह्मचारी आचार्यं वा उपाध्यायं गुरुं वा पितरं वा मातरं वा स्वयं दग्ध्वा व्र
तस्य तत्र भोजनं कृत्वा पतति नो तस्मात्प्रेतान्नं न तु भक्षयेत् अन्यत्र भोजनं कुर्यान्न
चैतैः सह संवसेत् एकाहमशुचिर्भूत्वा द्वितीयेऽह्नि शुध्यतीति ब्राह्मणशववहना
दौ शूद्रं न नियोजयेत् तथा च मनुः न विप्रः स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् अस्व
सा र्ग्या ह्याहुतिः स्यात्सा शूद्रसंस्पर्शदूषितेति अत्र स्वेषु तिष्ठत्स्विति विवक्षितं अस्व
र्ग्यत्वदोषश्रवणात् विप्रस्यापि मृतं द्विजं न शूद्रेण निर्हारयेत् शूद्रं द्विजेनेति य
मोऽपि न शूद्रो यजमानैर्वै प्रेतो भूतं समुद्वहेत् यस्मान्नयति शूद्रोऽग्निं तृणं काष्ठं ह
वींषि च प्रेतत्वे हि सदा तस्य स चाधर्मेण लिप्यत इति ब्राह्मणादिशवनिर्हारे दिङ्नि
यमो दर्शितो मनुना दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् पश्चिमोत्तरपूर्वैस्तु य
थायोगं द्विजन्मन इति हारीतोऽपि न ग्रामाभिमुखं प्रेतं हरेयुरिति अनुगमना
अनुगमनेच्छया प्रेतं ज्ञातिमज्ञातिमेव वा स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं
प्राश्य विशुध्यतीति ४२ ॥

107

पा॰मा॰
२६७

नादेशस्यजातस्य क्रमाशौचं कार्यं तथाच कूर्मे यदि निर्हरति प्रेतं प्रलोभाक्रांतमानसः दशाहे
न द्विजः शुध्येद्द्वादशाहेन भूमिपः अर्द्धमासेन वैश्यस्तु शूद्रो मासेन शुध्यतीति यस्तु सपि
ण्ड एव प्रेतं निर्हरति न तस्याशौचाधिक्यं प्रेतनिर्हरणस्य विहितत्वात् तदाह देवलः विहि
तेनु सपिंडानां प्रेतनिर्हरणादिकं तेषां करोति यः कश्चिन्नस्याधिक्यं न विद्यत इति आ
धिक्यमाशौचाधिक्यमित्यर्थः समानोदकप्रेतनिर्हरणे दशाहं तदाह स एव यः स
मानोदकं प्रेतं वहेद्वाथ दहेत्तथा तस्याशौचं दशाहं तु अन्येषां तु त्र्यहं विदुरिति ब्रह्म
चारिणः प्रेतवहनकरणे व्रतलोपः तदाह देवलः ब्रह्मचारी न कुर्वीत शववाहादि
काः क्रियाः यदि कुर्याच्चरेत्कृच्छ्रं पुनः संस्कारमेव चेति पित्रादिशवदहने तु न दोषः
तथाच मनुर्देवलौ आचार्यस्वमुपाध्यायं पितरं मातरं गुरुं निर्हृत्य तु व्रती प्रेतान्न व्र
तेन वियुज्यत इति वसिष्ठोपि ब्रह्मचारिणः शवकर्मणा व्रतनिवृत्तिरन्यत्र मातापि
त्रोर्गुरोर्वेति याज्ञवल्क्योपि आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती सकटा
न्नं च नाश्नीयान्न च तैः सह संविशेदिति व्रती ब्रह्मचारी पित्रादीनां निर्हरणादिकं
कृत्वा यथाशौचिभिः सहवासं तदन्नं च परित्यजति तदा व्रती व्रतचर्यातो न वियुज्य

राम
२६७

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

सचैलं स्नात्वाग्निं तस्मिन्नेवाह्नि वैश्य विशति स्नेहादिना प्रेतनिर्हरणं कुर्वतो ऽसपिंडस्याशौचमस्ति
तथा च मनुः असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत् विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवा
न् यद्यन्नमत्ति तेषां यः स दशाहेन शुध्यति अनदन्नन्नमह्नैव न च तस्मिन्गृहे वसे
दिति यस्तु प्रेतनिर्हरणं कृत्वा न गृहे वसति न च तदन्नमश्नाति तस्य त्रिरात्रमाशौचं यस्तु
न गृहे वसन् तदन्नमश्नाति तस्य दशरात्रं यः पुनः प्रेतं निर्हृत्य न गृहे वासं न तदन्नं च परिग्र
ह्णाति तस्यैकाहमित्यर्थः एतत्सवर्णविषयं असवर्णस्य च निर्हारे तज्जातीयमाशौचं का
र्यं तथा च गौतमः अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत् पूर्वो वापरं तच्छवोक्तमाशौचमि
ति उपस्पर्शनं निर्हरणं ब्राह्मणस्य क्षत्रशवनिर्हारे मासमाशौचं क्षत्रस्य ब्राह्मणशव
निर्हारे दशाहमाशौचं भवतीत्यर्थः यस्तु पुनर्लोभात्सवर्णशवनिर्हरणं करोति तस्य
त्रिरात्रमाशौचं भवति तथा च माधुः अवरश्च वरवर्णं वरो वाप्यवरं यदि वहेच्छवं त
दाशौचं दृष्ट्वा त्रिरात्रं भवेदिति असवर्णप्रेतनिर्हारे यदुक्तमाशौचं तत्प्रेतनाभ्यय
ले त्रिरात्रमाशौचं भवतीत्यर्थः यस्तु विप्रः ... यो सवर्णं तु मूल्येन नीत्वा चैव दहेन्न
रः आशौचं तु भवेत्तस्य प्रेतजातिसमं तदेति तथापदि द्रष्टव्यं अर्थलोभात्सवर्णशववह

पा॰ मा॰ अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजातयः पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते ३९
२६६ न तेषामशुभं किंचित्पापं वा शुभकर्मणां जलावगाहनात्तेषां सद्यः शौचं विधीयते ४०
रहितमसपिंडं ब्राह्मणमदृष्टार्थं ये द्विजातयो वहंति स्पृशंति दहंति च ते पदे पदे यज्ञफलानि
क्रमेण प्राप्नुवंति तथा तेषामशुभादिकमपि नास्ति तेषां स्नानादेव सद्यः शुद्धिर्विधीयत
इत्यर्थः तथा च वृद्धपराशरः प्रेतस्पर्शनसंस्कारे ब्राह्मणो नैव दुष्यति वोढा चैवाग्निदा
ता च सद्यः स्नात्वा विशुध्यतीति यत्तु हारीतेनोक्तं प्रेतस्पर्शी ग्रामं न विशेदानक्षत्रदर्श
नाद्रात्रौ चेदादित्यस्येति यच्च देवलेनोक्तं अग्निदो दहनं कुर्यादूर्द्ध्वमस्तमयाद्रवेः स्नात्वा
गृहं विशेद्द्विजो रात्रौ चेदुदयाद्रवेरिति तत्स्नेहादिकरणीयनिर्हारकरणे वेदितव्यं किं
तु प्राणायामोपि कर्त्तव्य इत्याह असगोत्रमिति असगोत्रमसपिंडमबंधुं बंधुरहितं
असगोत्रमबंधुं च प्रेतीभूतं द्विजोत्तमं वहित्वा च दहित्वा च प्राणायामेन शुध्यति ४१ राम
प्रेतं ब्राह्मणं ये वहंति दहंति तेषां प्राणायामेन शुद्धिरित्यर्थः न केवलं स्नानप्राणायामो अ २६६
ग्निस्पर्शोपि कर्त्तव्यः तदुक्तं मत्स्ये यः कश्चिन्निर्हरेत्प्रेतमसपिंडः कथंचन स्नात्वा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

110

ग्रंतस्य केवलमवशिष्यते कायक्लेशमवधानं चिरं जीवति तस्य कर्मसमापितप्रायमवशावर्त्ति
त्वेन तत्पूरणं प्रायश्चित्तमिति समभावत्वात् अत्यंतनिषिद्धमपि रुधिरपानं यत्र निरतिशयसुकृतत्वे
न परिणमते तत्र पूरणं लोकद्वयोत्कृष्टौ कौ विस्मय इत्याह ललाटेति संग्रामयज्ञप्रतिपाद

ललाटदेशाद्रुधिरं स्रवेद्यस्याहवे तु प्रविशेच्च वक्त्रम् तत्सोमपानेन
किलास्य तुल्यं संग्रामयज्ञे विधिवच्च दृष्टम् ३८

केनीतिशास्त्रादौ पुरोभागे प्रहारो वीरत्वहरणत्वेनोपवर्णित इति विवक्षितत्वात् विधिव
द्दृष्टमित्युक्तं तदेवं नवभिः श्लोकै राशौचविधिस्तावकत्वेन युद्धमरणस्य प्रशंसा कृ
ता यस्माद्रणहतो यं तत्पुण्यात्मा तस्मात्तन्मृतो परिव्राजकमरणाद्वाधिकाशौचा
भावउपपद्यते अथ वानरा तेन वक्ष्यमाणाः प्रकरणादुत्कृष्य राजधर्मेषु स्थापनीयाः
युद्धस्य तत्क्षत्रियधर्मत्वात् यथा दर्शपूर्णमासप्रकरणे ऽध्ययमारोरजस्वलाव्रतकला
पं प्रकरणादुत्कृष्य क्रत्वर्थत्वपरिहारेण पुरुषार्थतयोपवर्णितं तद्वत् धर्मार्थत्वा
त्तेणाशावदहनादौ प्रशंसापूर्वकं सद्यः शौचं विदधाति अनाथमिति अनाथं वंधु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰भा॰
२६५

नेति यद्यपि यज्ञसंघादिकं युद्धमरणं चोभयमप्येकविधस्य फलस्य समानं साधनं तः
थापि युद्धमरणस्यात्यल्पकालयाप्यत्वेन वैकल्यासंभवादुत्तमसाधनत्वमित्याह य

यं यज्ञसंघैस्तपसा च विप्राः स्वर्गैषिणो वात्र यथैव यांति क्षणेन यांत्येव
हि तत्र वीराः प्राणान्सुयुद्धेन परित्यजंतः ३६

इति विप्रशब्देन निष्कामा विवक्षिताः तथा च स्वर्गैषिणो वेति कल्पनोपपद्यते अत्र
पुण्यलोके यं यं लोकविशेषं यथैव येन प्रकारविशेषेणादेवकन्यावरणादिना युक्ताः
संतो यांति तत्र तेषु पुण्यलोकेषु तमेव लोकविशेषं तेनैव प्रकारेण युद्धे हता वीरा
अयांति क्षणेनेत्युक्तं कालाल्पत्वमेतेन ध्वनिताशयः ननु कालस्याल्पत्वे प्राणाभीते दुःख
रिहरत्वात्पूर्वोक्तं युद्धधैर्यं दुर्लभमित्याशंक्य विचारवतः सुलभमनन्तफलमित्यतो
विचारं दर्शयति जितेनेति जितेनेति कर्त्तरि निष्ठा ततो जयभाजो लक्ष्मीलाभः
जितेन लभ्यते लक्ष्मीर्मृतेनापि सुरांगनाः क्षणध्वंसिनि काये स्मिन्का चिंता मरणे रणे
यदि काय जीवनलोभात्स्त्लक्ष्मीर्देवांगनालाभौन पर्यालोच्येते तथापि लाभपरित्यागमा

राम
२६५

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

घ्नतस्य भास्करचलनसोपन्यासाद्योगिनो यथोक्तफलं दृष्टीकृतं भवति रणे चाभिमु
खो हत इति द्वाभ्यां तिकेभिहितं तच्च हतत्वधैर्यातिशयस्यापलब्धया श्रमस्यापि स्ववधे
परत्राणाप्रवृत्तस्य धीरस्य यथोक्तफलसद्भावादित्याह यस्त्विति क्रतुरत्राश्वमेधः त्र

यस्तु भग्नेषु सैन्येषु विद्रवत्सु समंततः परित्राता यदा
गच्छेत्स च क्रतुफलं लभेत् २३ ॥ ७ ॥

त्रलोक[illegible]प्राप्तिफलत्वात् अश्वमेधस्य च तत्फलत्वं वाजसनेयिशाखायां तेन तु
व्रालरोकस्याश्वमेधयाजिनो गच्छंतीत्यादि प्रजापतिवचनयोर्विस्पष्टमवगम्यते य
त्परित्राणार्थं प्रवृत्तस्य प्रवृत्तिमात्रेण क्रतुफलमुक्तं प्रवृत्तस्य गात्रच्छेदे सति हतत्वा
भावेपि फलातिशयोस्तीत्याह यस्येति गात्रं शरीरं छेदक्षतं हस्तपाद्यवयवच्छेदे

यस्य छेदक्षतं गात्रं शरशक्त्यृष्टितोमरैः देवकन्यास्तु तं वीरं हरंति रमयंति च २४

नोपद्रुतं परत्राणाय प्रवृत्तस्य गात्रच्छेदे यत्फलं ततोप्यतिशयं मरणो दर्शयति देवांग

देवांगनासहस्राणि शूरमायोधने हतं त्वरमाणाः प्रधावंति मम भर्ता ममेति च २५

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

113

पा.मा. नायामीनेरियन्नेव नास्ति नादृशी भीतिं सोटाव्रतिमदाभिमुखं वगच्छतः शूरस्य धैर्य्ययोगि धैर्या
२६५ द्यप्यधिकं नहि योगिनो यमनियमादिषु कांचित्कारा भीतिः संभाविता ततो यथा जागर
णे वकुषु वत्सरेषु अनुभवनीयस्य भोगस्य मुहूर्त्तमात्रवर्त्तिनि स्वप्ने साकल्यं दृश्यते तेन तथा
चिरभावियोगसाम्परायेण धैर्यवतः किं न स्यात् धैर्यातिशयेन साम्यमत्र विवक्षितमिति
दर्शयितुं क्लीवं न भाषत इत्युक्तं क्लीवं नपुंसकत्वं विकलतातस्य चकं भीत्याविष्कारि
वाक्यं यदि न भाषेत तत्तदानीं योगिसाम्याददयान्न्यूनलोकावान रविशेषान् सालोक्या
दीन् लभेत परिव्राजकदृष्टान्ते सूर्यमंडलभेदित्वं संभावयति संन्यस्तमिति यदपि
संन्यस्तं व्रालरां दृष्ट्वा स्थानाच्चलति भास्करः एष मे मंडलं भित्वा परं स्थानं प्रयास्यति
मंडलस्याचेतनत्वरश्मिसमूहरूपत्वात्तद्दैपि नास्ति काचिदादित्यस्य वेदनात् तथापि पूर्व
मन्यतनीचपदेवर्त्तमानस्येदानीमुच्चपदप्राप्तिः क्रियते के शाहेतुर्भवति अतएव भित्वा प
रंस्थानं यास्यतीत्युक्तं एतदेवाभिप्रेत्याह क्रियावाडाईकौन्तेयदेवलोकः स राम
माबृतः न चैनदिष्टं देवानामनंतपरिवर्त्तनमिति अतएव परिव्राजकदर्शनमात्रेणानि २६४

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नः परिव्राजकोऽर्चिरादिमार्गेण ब्रह्मलोकं गच्छन् मार्गमध्ये वाय्वादित्यचंद्राणां मंडलानि क्रमे

द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ३०

ण भित्त्वा नक्षत्रेभ्य उत्तरोत्तराधिकेभ्यः छिद्रेभ्यो निर्गत्य क्रमेण विद्युदादिलोकान् संचरन् ब्र
ह्मलोकं प्राप्नोति छिद्रनिर्गमनं वाजसनेयिब्राह्मणे श्रुतं स वायुमागच्छति तस्मै स तत्र विजि
हीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा
डंबरस्य खं तेन स ऊर्ध्वमाक्रमते स चंद्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुंदुभेः
खं तेन स ऊर्ध्वमाक्रमत इति तत्र चिरकालं महता प्रयासेन योगमभ्यस्यता परिव्राजकेन
सह समानगतित्वं रणे हतस्योक्तं तस्मादल्पकालप्रयासत्वादित्याशंक्य कालाल्पत्वे
पि धैर्यातिशयेन प्रयाससाम्यं सूचयितुमभिमुख इत्युक्तं तमेव सूचितमर्थं विशदीक
रोति यत्रेति लोकशास्त्रधारिणामेकमपि हत्वा महतीं प्रायणभीतिर्जायते युद्धकाले तु

यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः अक्षयांल्लभते लोकान्यदि क्लीबं न भाषते

प्रतिसैन्यगताः सर्वेऽपि शत्रवः शस्त्रधारिणो मारणोद्यता राजानं परिवेष्टयंति तदानीमप्यपरा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

मा॰क॰ ॐस्वस्तिश्रीगणेशायनमः श्रीदुर्गायैनमः वागीशाद्याःसुमनसःसर्वार्थानामु 115
१ पक्रमे यन्नत्वाकृतकृत्याःस्युस्तंनमामिगजाननम् १ सोहंप्राप्यविवेकती
र्थपदवीमाम्नायतीर्थेपरं मज्जन्सज्जनतीर्थसंगनिपुणःसद्वृत्ततीर्थंश्रयन्
लब्ध्वामाकलयन्प्रभावलहरींश्रीभारतीतीर्थतोविद्यातीर्थमुपाश्रयन्हृ
दिभजेश्रीकण्ठमव्याहतम् २ सत्यैकव्रतपालकोद्विगुणधीस्त्र्यर्थीचतु
र्वेदिता पंचस्कंधकृतीषडन्वयदृढस्सप्तांगसर्वसहः अष्टव्यक्तिकलाध
रोनवनिधिःपुष्यद्दशप्रत्ययःस्मार्तैकाश्रयधुरंधरोविजयतांश्रीबुक्कणक्ष्मा
पतिः ३ इंदुस्तंगिरिशोनलंसमसुमतिःशेषस्समेधातिथिर्धौम्योधर्मसुत
स्यवैन्यनृपतेःस्वौजानिमेगौतमिः प्रत्यग्दृष्टिररुंधतीसहचरोरामस्यपु
ण्यात्मनो यद्वत्तस्यविभोरभूत्किलगुरुर्मंत्रीतथामाधवः ४ प्रज्ञामूलम राम
१

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

116

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

118

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ब्रतसंयमतपस्विनां ५ चित्तमंतर्गतं दुष्टं तीर्थस्नानैर्न शुध्यति शतशो
पि जलैर्धौतं मद्यभांडमिवाशुचिः ६ हृदि प्रवर्त्तते पापं नवस्थं तत्र
लपिवेत सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत ७ जलेन जनितं
पंकं जलेन परिशुध्यति चित्तेन जायते पापं चित्तेन परिशुध्यति ८ स
त्यं तीर्थं तपस्तीर्थं तीर्थमिंद्रियसंग्रहः सर्वजीवदया तीर्थमेतत्तीर्थ
स्य लक्षणं ९ इति ज्ञानपद्धतिः जोरत्नं प्राप्य तेद्दानान्न तु द्रव्यस्यसं
ग्रहात् स्थितिरुच्चैः पयोदानां पयोधीनामधः पुनः १० कवापीज
लयं भूमिःक्षौमधुरां तां व्रजेत् निंबे कटुकतां याति पात्रापात्रनाम
भोजनं २ सत्पात्रोपगतं दानं सुक्षेत्रे गतबीजवत् कुपात्रोपगतं
दानं कुक्षेत्रे गतबीजवत् ३ तद्भोजनं यन्मुनिभुक्तशेषं सबुद्धिमा
न्योन करोति पापं तत्सौहृदं यत्क्रियते परोक्षे दंभैर्विनायः क्रियते
स धर्मः ४ मातृवत्परदाराश्च परद्रव्याणि लोष्ठवत् आत्मवत्सर्व
सत्वानि यः पश्यति स वैष्णवः ६ यद्विवहसि त्रिदंडे नग्नमुंडे जटां

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वायद्विवसेसि गृहाणां च सम्यक् लेखितानां परिपठसि पुराणं वेद
सिद्धांत तत्वं यदि हृदयमध्ये सर्वमेतन्न किंचित् ८ इति विचारप
द्धतिः कवित्वमारोग्यमतीव मेधा स्त्रीणां प्रियत्वं कनकस्य लाभः
स्वप्नेषु तथ्यं स्वजनेषु पूजा स्वर्गाच्युतानां किल चिह्नमेतत्
स्वर्गस्थितानामिह जीवलोके चत्वारि नि संहृदये वसंति दानप्र
संगो मधुरा च वाणी देवार्चनं धार्मिक तर्पणं च १ नास्ति लोभो
विनीतश्च दयादानरुचिः मृदुः प्रसन्नवदनश्चैव मानुषाद्वागतो
नरः २ वक्राक्षी नैव संतुष्टो मायावी च क्रोधाधिकः स्वप्रसूतो
लसश्चैव तिर्यग्योन्यागतो नरः ४ विरोधिता बंधुजनेषु नित्यं
सरोगता मूर्खजनेषु संगः अतीव रोषी कटुका च वाणी नरस्य
चिह्नं नरकागतस्य ५ इति चतुर्विंशाति लक्षणपद्धतिः न मंत्रा
न तपो दानं न मित्राणि न बांधवाः शक्नुवंति परित्रातुं नरं काले
न पीडितं १ स्वयं कर्म करोत्यात्मा स्वयं तत्फलमश्नुते स्वयं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

खिलासकठिनोहृतनवृद्धिश्रेष्ठितैर्वेदविधेरपियुक्तः दंभदृत्तच नरोपिनरः स्यात्कर्केगामिनिरिमैत्रधदृष्टे २२ द्वै
त्रपुत्रगृहगेहिकोधनैरत्नवाहननुविभूषलोलोपि संयुतोभवतिमानवोजनोजीवदृष्टिपुजिककर्कगेशनौ २३
उपरमागोरखवाहमानैस्सौंदर्यवथ्यामलवाग्विलासैः नूनंविहीनामनुजाभवेयुः शुक्रेक्षितेकर्कग
तेर्कसूनौ २४ धनेनधान्येनववाहनेनसद्वृत्तसत्योत्तमवेष्टितैश्च भवेद्धितीनोमनुजः प्रसन्नौहिंदृस्थिते
भानुसुतेकर्कदृष्टे २५ सद्वृत्तहेसावरचारुकीर्तिकलत्रमित्रात्मजसौख्ययुक्तिः प्रसन्नमूर्तिकर्कस्थितेर्कसूतेन
नरहरिस्थोहरिणांकदृष्टः २६ संग्रामकर्मण्यप्रतिनैपुण्यांस्यात्कारुण्यहीनोमनुजः सकोपः क्रूरस्वभा
वोनरोभानुसूनोपेचाननस्थेवनिसूनुदृष्टे २७ धनांगनासूनुसुखेनहीनं दीनंचनीचव्यसनाभिभू
तं करोतिजातंतपनस्यसूनुः सिंहस्थितःसोमसुतेक्षितेनश्च २८ तन्मित्रपुत्रादिविरोधरूपेतंरव्यातसु
हृत्सुतंसंविनीतं नरंपुरग्रामपतिंकरोति सौरिर्हरिस्थोगुरुणाप्रदृष्टः २९ धनैश्चधान्यैरपिवाहनैश्च
सुरेवरूपेतंवनिताप्रतप्तं कुर्यान्ननंयनंपतंगसूनुः पंचाननस्थोभृगुसूनुदृष्टः ३० ख्यातिंधनानिंव
दुगौरवाद्रिस्नेहप्रवृत्तिपरंनदनेषु लभेन्नरोदेवगुरोरगारे शनेश्चरेदृष्टिसूर्यदृष्टे ३१ सत्वत्रशान्ती
जननीवियुक्तोनामवयास्तंकरणप्रयातः सुतार्थभार्यासुखभाङ्नरःस्यान्नारेसुरेज्यालयगेजदृष्टे ३२
वानान्विजनलोकविरुद्धचेष्टप्रवासिनदीननरंकरोति नरंधरासूनुनिरीक्ष्यमाणोमार्तंडपुत्रःसुरसं

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ व्रांगमन्नत्रिलोमे ३३ गुणाभिरामो धनवान्सुकामं नराधिराजाप्रमहाधिकारः नरः सदाचारविराजमानः शनौ
३१ सुहृद्गृहे गुरुमंदिरस्थे ३४ नृपप्रधानः प्रजनापतिर्वा सर्वाधिशाली बलवान्सुशीलः स्यान्मानवो भानु
सुते प्रसूनो जीवे हि तेजी वगृहं प्रयाते ३५ विदेशकारी वकुकार्यसक्तो हिमानपुत्रः सुतरां पवित्रः स्या
न्मानवो [illegible] दानवमंत्रिदृष्टे मंदे मरुचार्यगृहं प्रयाते ३६
कुरूपभार्यश्च परान्नभोक्ता नानाप्रयासाभयसंयुतश्च विदेशवासी प्रभवेन्मनुष्यो मंदे निजागारग
ते केंद्रदृष्टे ३७ धनांगनाद्यैः हि जिनानुयातः चलस्वभावं जननीविरुद्धः कामातुरश्चापि नरः कुर्वीतः
स्वभस्थो मनुरश्मिदृष्टः ३८ शूरः क्रूरः साहसी सद्गुणाढ्यः सर्वोत्कृष्टः सर्वदा हृष्टचित्तः ख्यातो मर्त्यः स्या
न्मंदस्थे र्कपुत्रे धात्रीपुत्रप्रेक्षणांतं प्रयाते ३९ सद्वाहनान्ताः हसितकान्तमत्त्वान्विधीरांस्तनानाधिकार्य वि
सक्तान्करोति मर्त्यान्नृभानुपुत्रः स्वक्षेत्रसंस्थः शशिपुत्रदृष्टः ४० गुणान्वितं क्षोणिपतिप्रधानं नि
रामयं चारुशरीरयष्टिं कुर्यान्नरं देवगुरुप्रदृष्टः वक्रंगमस्तन्निजवेश्मसंस्थः ४१ कामातुरस्त्वानिय
मनहीनं भाग्योपपन्नं सुखिनं धनाढ्यं भोक्तारमीशं कुरुते स्वभस्थारवेः सुतो भार्गवदृष्टियुक्तः ४२ इति
ढुंढिराजविरचिते ग्रहदृष्टिफलाध्यायः॥ अथ राशिफलानि भवन्ति साहसकर्मकरो रुधिरपित्तवि नरो
कारिकलेवरः क्षितिपतेर्मतिमान्त हितस्सदा सुमहसा महसामधिपेक्रिये १ पदि मत्ते विमलैः कुसुमाशनैः
मानकामरतो ३१

CC0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

123

ॐ जा॰ भ॰ नो द्युमनी सर्वजनप्रियश्च मंदे स्थिते वै गुरुणा च दृष्टे ११ रत्नादिलाभं वनिताविलासं जलाधिकत्वं नृपगोरवाणि
३० कुर्यान्नराणां तरणेस्तनूजः कुजे क्षितेः कुजगृहं प्रयातः १२ मूर्खोतिनीचो वचनु सकोपमधर्मकं द्रोहकरं
सुधीः कुर्यान्नरं तिग्मकरस्य सूनुर्भौमेन दृष्टो वृषधर्मदिस्थः १३ प्रसन्नमूर्तिर्नृपतिप्रसादप्राप्ताधिका
रोन्नतिरार्यवृत्तः कान्ताधिकारो यदि वा नरः स्यान्मंदे हि दृष्टे मस्ये च नरश्चिदृष्टे १४ प्रकृष्टबुद्धिं सुतराविबोध
चेरस्यातं गभीरं च नरं करोति सोमात्मजो देवगतो र्कसूनौ भौमेन दृष्टः परिसूतिकाले १५ धनान्वितं
चारुमतिं विनीतं गीतप्रियं सद्गुरुभक्तमेतं शिल्पे त्वभिज्ञं मनुजं प्रकुर्यात् सौम्ये स्थितः सौम्यगृहस्य
मंदः १६ राजाश्रितश्चारुगुणैः समेतः प्रियः सतां प्राज्ञधनो मनस्वी भवेन्नरो मंदहरो यदि स्यादुरो
शिसंस्थो सुरपूज्यदृष्टः १७ योषाविभूषाकरणप्रवीणं सत्कर्मधर्मे निरतं नितांतं स्त्रीसक्तचित्तं प्रक
रोति मंदो सिते स्थितो भानुसुतो न्नमस्यः १८ प्रानंदपौराद्दविरोधहीनः सदान्नभोगैरपि चोक्षित
श्च मातृमहत्क्लेशकरो नरः स्यान्मंदे कुलीरोपगते के दृष्टे १९ निपीडनं बंधुजने जनन्या नूनं धनाना
मभिवर्द्धनं च कुर्यान्नराणां द्युमणेस्तनूजः कुलीरसंस्थो द्विजराजदृष्टः २० गलग्रहः [illegible] कले
वरश्च नृपापितार्थौ ज्ञ मवैभवोपि स्यान्मानवो भानुसुते प्रदृष्टे कर्कस्थिते शौरि सुतेन दृष्टे २१ वा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

यगोजाविसमृद्धिभाजं कृषिक्रियायां निरतं सदैव सत्कर्मसक्तं जनयेन्मनुष्यं भौमालयस्थः शनिरर्कदृष्टः
१ नीचानुजातं चपलं सुशीलं स्ववल्लसुखार्थैः परिवर्जितं च कुर्यादवश्यं रविजो मनुष्यं शशीक्षितो भूसुत
वेश्मसंस्थः २ अनल्पजल्पं गतसत्यवित्तं परार्थकार्ये रतिजातचित्तं करोति जातं त्वनुभानुसूनुः
ज्ञेन दृष्टः कुजवेश्मसंस्थः ३ चौर्यकर्मकलहादिनित्यं कामिनीजनगतोत्सवं नरं ज्ञोक्षितो हि कु
रुते कनं यतो भूमिसूनुभवनाधिसंस्थितः ४ सुखधनैः सहितं नृपमंत्रिणं नृपसमाश्रितमख्यात
वीक्षित यान्वितं सुरपुरोहितभानुजो वनिजवेश्मगतः कुरुते नरं ५ बहुप्रयासाभिरतं विकांतिं चान्यांगना
सक्तमतिं विचित्रं करोति मर्त्यं क्षितिजालयस्थो भानोस्तनूजो भृगुजेन दृष्टः ६ विद्याविचारप्रचुरोक्ति
वक्तापरान्नभोक्ता विधनश्च शांतः भवेन्नरस्तिग्मकरेण दृष्टे सूर्यात्मजे भार्गववेश्मसंस्थे ७ नृपप्रसा
दान्नमहाधिकारं योषाविभूषां वरजातसौख्यं बलान्वितं संजनयेन्मनुष्यं मंदः सितर्क्षे हरिणांकदृ
ष्टः ८ संग्रामकार्याभिरतं नितांतं समनल्पजल्पं च महाप्रयासं कुर्यान्नरं तिग्मकरस्य सूनुर्भसूनुदृष्टो
भृगुजालयस्थः ९ कांतारतो नीचजनानुयातो विनोदहास्याभिरतो गतार्थः स्त्रीवादसक्तश्च भ
वेन्मनुष्यः शनौ स्थितेदेशशिसूनुदृष्टे १० परोपकारे कृतचित्तवृत्तिः परस्य दुःखेन सुदुःखितश्च दा

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

हिनं करोति भृगुर्गृहस्थोत्रगतोऽत्र दृष्टः ३० द्विषामसंधनितं प्रसन्नं कांताकृतप्रेमभरं सपुत्रं सद्वाहना
ढ्यं कुरुते मनुष्यं भौमे स्थिते ज्यात्रयगामिभिः क्रः ३१ सद्वाहनाद्यैर्वरभूषणानां लाभं सदन्नादिसुखाभि
वृत्तं कुर्यान्नराणां गृहमंदिरस्थो दैत्याचितः सोमसुतेन दृष्टः ३२ तुरंगहेमांबरभूषणानां महांगनानां
वनितासुखानां करोत्यवाप्तिं भृगुजः प्रसूतौ जीवस्थितो जीवगृहाश्रितश्च ३३ सद्भोगसौख्योन्नमक
र्मभाजं नित्योत्सवोत्कर्षयुतं मनुष्यं करोति मर्त्यं गृहगेहजातो दैत्याचितो भानुसुतेक्षितश्च ३४ स्थि
रस्वभावं विभवोपपन्नं महाधनं सारविराजमानं कांताविलासैः सहितं प्रकुर्याद्भृगुः शनिक्षेत्रगतोऽर्क
दृष्टः ३५ ओजस्वितं चारुशरीरयष्टिं प्रकृष्टसत्वं धनवाहनाढ्यं करोति मर्त्यं शनिगेहयातो भृगोः सु
तः शीतकरेण दृष्टः ३६ क्षमामयाभ्यामतितप्तमूर्तिं मनर्थतोऽर्थव्ययतिसंयुतं च कुर्यान्नरं दानवराज
पूज्यः कुजेक्षितः सूर्यसुतालयस्थः ३७ विद्वद्विधिज्ञं धनिनं सुवृत्तं प्राज्ञं सुसत्त्वं बहुलप्रपंचं सदारा
विलासं मनुजं प्रकुर्याद्भृगुः शनिक्षेत्रगतोऽत्र दृष्टः ३८ सद्बंधनात्म्यांबरचारुवाद्यसंगीतसंजातरुचिः
प्रचिश्च सान्मानवो दानवराजपूज्ये गुरेज्यदृष्टे शनिमंदिरस्थे ३९ प्रसन्नगात्रं च विचित्रलाभं धनां
गनावाहनसूनुसौख्यं कुर्यान्नरं दानववंद्यवंद्यो मंदस्थितो मंदगृहे धिसंस्थः ४० इति शुक्रः तुला

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

जनाभिभूतः दैत्यार्चिते कर्कटराशियाते निरीक्षिते सूर्यतनाप्रसूतौ १७ कन्याप्रजापूर्वकपुत्रलाभं मंवासपत्नीव
कुगोत्रवाणिं कुर्यान्नराणां हरिणांकदृष्टः कुलीरगो भौमवनामधेयः १८ कलामुदन्तोहतशत्रुपक्षो बुध्याचसौख्येन
युतो मनुष्यः पराङ्गनाकांतारक्तचित्ते यान्ती सोमेक्षिते कर्कटगे सिते स्यात् १९ विद्याप्रवीणं गुणिनं गुणाढ्यं कलत्रपुत्रोद्
वदुःखतप्तं धरोक्षितं चापिकरोति मीनांकाव्यः कुलीरोपगतो नृदृष्टः २० प्रांसिचनुरंगे दारंचारुवृत्तिं विनीतं बहुवि
भवसमेतं कामिनीसूनुसौख्यं प्रियवचनविलासं मानवं संविधत्ते सुरपतिगुरुदृष्टो भार्गवः कर्कसंस्थः २१ सद्वृत्त
सौख्यापहतं गनार्थं व्यर्थप्रयत्नं वनिताजितं च स्यान्नचभुतं हि जनं येन मनुष्यं मंदेक्षितः कर्कगतः सिताख्यः २२ समृद्धि
संवर्द्धितचित्तवृत्तिः कांतासमायोत्पन्नधनो मनुष्यः क्रमेलकाद्यैः यदि वाप्रतः स्यादर्केक्षिते सिंहगते सि[illegible]ताख्ये
२३ नूनं जननन्याश्रमवेत्सपुत्रीपत्नीविरोधो विभवो द्रुवक्ष्म यस्य प्रसूतौ दनुजेंद्रमंत्री चंद्रेक्षितः सिंहगतो यदि।
स्यात् २४ राज्याश्रितं धान्यधनेरूपेतं कंदर्पयातं व्यसनाभिभूतं करोति मर्त्यं मृगराजसंस्थो भृगोस्तनूजो वनिजे
नदृष्टः २५ धनान्वितं संग्रहचित्तवृ[illegible]त्तिं लब्धं स्मराधिक्यविकारनिंद्यं दैत्येंद्रमंत्री कुरुते मनुष्यं सिंहस्थितः सो
मसुतेन दृष्टः २६ नरेंद्रमंत्री धनवाहनाढ्यो वहूंगनानंदनभृत्यसौख्यः विख्यातकर्मा च भृगोस्तनूजे जीवेक्षिते
सिंहगतेनरः स्यात् २७ नृपोपमं सर्वसमृद्धि[illegible]युक्तं भाजं दंडाधिकारेय्यप्रवानियुक्तं करोति मर्त्यं मृगराजवर्त्तीदै
त्यार्चितः सूर्यसुतेन दृष्टः २८ रौद्रं प्राज्ञं भागपैर्भाग्यभाजं सत्वोपेतं वित्तवंतं विशेषात् नानादेशभ्रमणयानं
मनुष्यं कुर्याच्छुक्रो जीवभे भानुदृष्टः २९ सद्भ्राजमानेन विराजमानं ख्यातं विनीतं बहुभोगयुक्तं धीरं ससारं।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ज्यो० जा० भ० नूनं धरित्रीतनयालयस्थः प्रकोपधरित्रीतनयेन दृष्टः ३ अनार्यमर्त्यात्मजनैर्विहीनं स्वबुद्धिसामर्थ्यपराक्रमं च नूनं परा
 र्थोपहरं न शं हि करोति भौमः कुजभे ज्ञदृष्टः ४ कलत्रपुत्रादिसुखैः समेतं सत्कार्यकांतं सुतरां विनीतं उदारचित्तं प्रकरो
ति मर्त्यं जीवेक्षितो दैत्यगुरुः कुजर्क्षे ५ सुगात्रचित्ताभिमतं प्रशांतं मान्यं वदान्यं स्वजनानुयातं करोति ज्ञातं क्षितिपुत्र
गेहे संस्थः सितेनाभानुसुतेन दृष्टः ६ वरांगनाभ्यो धनवाहनेभ्यः सुखानि नूनं लभते मनुष्यः प्रसूतिकाले निजवेश्मया
ते सितेपतंगेन निरीक्षिते च ७ विलासिनीकेलिविलाससक्तः कुलाधिपालो मलबुद्धिशाली नरः सुशीलः प्रभा
वाग्विलासैः स्त्रीयालयस्थास्फुजितौ दृष्टे ८ गृहादिसौख्योपहतं नितांतं कलिप्रसंगाभिभवोपलब्धिं कुर्यान्नराणां
स्तुजैः प्रमंत्री स्वदेत्र संस्थः क्षितिपुत्रदृष्टः ९ सद्वाहनानां गृहिणीगृहाणां सुमित्रपुत्रद्रविणादिकानां करोति ला
भं निजवेश्मयातः सितः सुराचार्यनिरीक्षितश्चेत् १० गदाभिभूतो हतसाधुवृत्तः सौख्यार्थहीनो मनुजोतिदीनः भ
वेत्प्रसूतौ निजवेश्मयाते भृगोः सुते भानुसुतेन दृष्टे ११ नृपाविरोधाधिकृते विनीतं गुणान्वितं शास्त्रकृतप्रवेशं कु
र्यान्नरं दैत्यगुरुः प्रसूतौ सौम्यर्क्षसंस्थो रविणाप्रदृष्टः १२ सदन्नवस्त्रादिसुखोपपन्नं नीलोत्पलश्यामलचारुने
त्रं सुकेशपाशं प्ररूपं प्रकुर्यात्सौम्यर्क्षसंस्थो भृगुरिंदुदृष्टः १३ भाग्यान्वितः कामविधिप्रवीणः कांतानिमित्तं द्र
विणव्ययः स्यात् नरो हि नीहारकरात्मजर्क्षे स्थिते सिते भूमिसुतेन दृष्टे १४ सद्बुद्धिवृद्धिर्विबुधैर्भवान्यः प्रसन्नचेताः
सुतरां विनीतः मर्त्यो भवेत्सौम्यगृहोपयाते दृष्टे सिते देवपुरोहितेन १५ पराभिभूतं चपलं विचित्रं सदुःखितं सर्वज
नोज्झितं च मर्त्यं करोत्येव भृगोस्तनूजः सौमात्मजर्क्षे रविजेन दृष्टे १६ सरोषयोषाकृतहर्षनाशः सास्नरुषः शत्रु

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

विशेषान् करोति ज्ञातं सुखिनं विनीतं चंद्रक्षितौ देवगुरुः स्वभस्थः ३२ दुर्गांकितं संगरकर्मदक्षं हिंसापरं क्रूरतरस्वभावं प
रोपकाराभिरतं प्रकुर्याद्गुरुः स्वभस्थः क्षितिजेन दृष्टः ३३ नृपाश्रयप्राप्तमहाधिकारो दाराधनैश्वर्यसुखोपपन्नः परोप
कारादरतैकचित्तो ज्ञानरोगरोस्वर्क्षगते ज्ञदृष्टे ३४ सुखोपपन्नं धनिनं प्रपन्नं प्राज्ञं सदैश्वर्यविराजमानं नूनं प्रकुर्या
न्मतजं सुरेज्यो दैत्येज्यदृष्टो निजमंदिरस्थः ३५ पदच्युतं भोगसुखैर्विहीनं संग्रामसंजातपराभवं च करोति दीनं स्व
गृहे सुरेज्यः सूर्यात्मजेन प्रविलोक्यमानः ३६ प्रसन्नकांतिं प्रभवाग्विलासं परोपकारादरता समेतं कुलेन पालं
कुरुते सुरेज्यो मंदालयस्थो यदि भानुदृष्टः ३७ कुलोद्भवस्तीव्रमतिः सुशीलो धर्मक्रियायां सुतरामुदारः नरोऽभि
मानी पितृमातृभक्तो जीवे शनिक्षेत्रगते ज्ञदृष्टे ३८ स्यादर्थसिद्धिर्नृपतिप्रसादात्कीर्तेः सुखानामुपलब्धिरेव सूते
सुरेज्ये शनिमंदिरस्थे निरीक्ष्यमाणे धरणीसुतेन ३९ शांतं नितांतं वनिताभिभूतं धर्मक्रियायां निरतं विनीतं करो
ति मर्त्यं मरुतां पुरोधा बुधेन दृष्टः शनिमंदिरस्थः ४० विद्याविवेकार्थगुणैः समेतः पृथ्वीपतिप्राप्तमनोऽभिलाषः
स्यान्नूरूषः सूर्यसुतर्क्षसंस्थे जीवे प्रसूतौ भृगुजेन दृष्टे ४१ कामं सुकामं सुगुणाभि[रा]मं चार्थसवाहनधान्ययुक्तं ख्या
तं विनीतं कुरुते मनुष्यं मंदक्षितो मंदगृहस्थजीवः ४२ इति गुरुः कृपाविशेषं नृपतेर्नितांतं मनीषिताया जनितव्यली
कं कुर्यान्नराणां तरणिप्रदृष्टः शुक्रो हि वक्रस्य गृहं प्रयातः ॥ १ ॥ श्रेष्ठप्रतिष्ठं चलचित्तवृत्तिं कामातुरं चापि कृतिप्र
याणं करोति मर्त्यं कुजगेहयातो मृगोत्तमः शीतकरेण दृष्टः २ धनेन मानेन सुखेन हीनं दीनं विशोभान्मलिनं करोति

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ जा० भ०
२७

भिरामं नरं पुरग्रामपतिं करोति गुरुर्हि गेहे शशिना प्रदृष्टः १८ दारात्मजार्थैर्भवतो व्ययहानिः पूर्वं च पश्चात्खलु ता-
त्सुखानि कुर्यान्नराणां हि गुरुः सुराणां कुलीरसंस्थो रविणा प्रदृष्टः १९ नरेंद्रकोशाधिकृतं सुकांतिं सवाहनार्था-
दिसुखोपपन्नं सहृत्तचित्तं जनयेन्मनुष्यं गुरुः कुलीरे हरिणांकदृष्टः २० कुमारदारांबरचारुभूषाविशेषभा-
जं गुणिनं च शूरं प्राज्ञं दतांगं कुरुते मनुष्यं कर्के स्थितो ज्यो वनिजेन दृष्टः २१ मित्राश्रयो न्यादित सर्वसिद्धिः
सहृत्तबुद्धिर्विलसत्प्रतापः मंत्री नरः कर्कटराशिसंस्थे गीर्वाणवंद्ये शशिसूनुदृष्टे २२ वकंगनावाहनमंडना-
नां नाना सुखानामुपलब्धयः स्युः कुलीरयाते वचसामधीशे निरीक्षिते दैत्यपुरोहितेन २३ सन्मानभूषागुण-
चारुशीलः सेनापुरग्रामपतिर्नरः स्यात् अनल्पजल्पः खलु कर्कटस्थे वाचस्पतौ सूर्यसुतेन दृष्टे २४ चयान्वि-
तं ख्यातमतीव धूर्तं नृपाप्तवित्तं क्रमकर्मचित्तं नरं प्रकुर्यात्सुरराजपूज्यः सूर्येण दृष्टो मृगराजसंस्थः २५ प्र-
सन्नमूर्त्तिं गतचित्तशुद्धिं सुहेतुसत्पात्रधनं वदान्यं कुर्यान्मनुष्यं वचसामधीशः शशांकदृष्टः केरिवेरिसं-
स्थः २६ मान्यो गुरूणां गणगौरवेण सत्कर्मनिर्माणविधौ प्रवीणः प्राणी भवेत्केसरिणि स्थिते स्मिन्गीर्वा-
णवंद्ये वनिजेन दृष्टे २७ गृहादिनिर्माणविधौ प्रवीणो गणाग्रणीः स्यात्सचिवो नृपाणां वाणीविलासप्रचु-
रो नरः स्यात्सिंहस्थिते देवगुरौ ज्ञदृष्टे २८ भूमीपतिप्राप्तमहत्पदः स्यः कांताजनप्रीतिकरो गुणज्ञः भवेन्नरो दे-
वगुरौ हरिस्थे निरीक्षिते चासुरपूजितेन २९ सुखेन हीनं मलिनं कुवाचं कृशांगयष्टिं विगतोत्सवं च करोति।
मर्त्यं गुरुस्ताममा न्यः सिंहस्थितः सूर्यसुतेन दृष्टः ३० राजाविरुद्धत्वमतीव नूनं सुहृज्जनेनापि च वैमनस्-
शत्रुद्भमः स्यान्नियतं नराणां जीवे कर्कदृष्टे खगरं प्रयाते ३१ सुगर्वितं भाग्यधनाभिवृद्धा प्रियाप्रियत्वाभिमते

२०

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स्यात्तौ भौमगृहे ज्ञदृष्टे ४ गंधमाल्यशयनाशनभूषायोषिदंबरनिकेतनसौख्यं संप्रयच्छति नृणां भृगुणा चेद्वीक्षितः सुर
गुरुः कुजभस्थः ५ लुब्धरौद्रसाहसैः संयुतं च मित्रापत्योद्भवसौख्योज्झितं च कुर्यान्मित्रं निष्ठुरं देवमंत्री धात्रीपुत्रक्षेत्र।
गोमंदहष्टः ६ संगतं प्रविजयंततगात्रं सामयं च बहुवाहनभृत्यं मंत्रिणां हि कुरुते सुरमंत्री देत्यमंत्रिगृहगो रवि
दृष्टः ७ सत्येनयुक्तं सततं विनीतं परोपकाराभिरतं सुचित्रं सद्भाग्यभाजं कुरुते मनुष्यं जीवः सितर्क्षे सितरश्मिदृ
ष्टः ८ भाग्योपपन्नं सुतसौख्यभाजं प्रियंवदं भूपतिलब्धमानं नरं सदाचारपरं करोति भौमे क्षितौ ज्यो भृगुजालय
स्थः ९ सन्मंत्रविद्यानिरतं नितांतं भाग्यान्वितं भूपतिलब्धवित्तं चंचत्कलात्मं प्रसवं प्रकुर्याद्गुरुर्भृगुक्षेत्रगतो
ज्ञदृष्टः १० धनान्वितं चारुविभूषणाढ्यं सच्छत्रचित्रं विभवैः समेतं करोति जातं सुरराजमंत्री शुक्रालयस्थो
भृगुसूनुदृष्टः ११ सन्मुत्रदारादिसुखैवरूपैः प्राप्तं पुरग्रामभवोत्सवाढ्यं नरं प्रकुर्याच्च गुरुः सुरेज्यो देत्येज्यभ
स्थोर्कसुतेन दृष्टः १२ सन्मित्रदाराधनपुत्रसौख्यश्रेष्ठप्रतिष्ठाभिर्विराजमानं नरं प्रकुर्यात्सुरराजमंत्री रविपु
दृष्टो बुधवेश्मसंस्थः १३ गुणान्वितं ग्रामपुरोपकारं विराजमानं बहुगोरवेला कुर्यान्नरं देवगुरुर्बुधर्क्षे संस्था
निशानाथनिरीक्ष्यमाणः १४ संग्रामसंप्राप्तजयं यशस्तं गंधनेन सारेण समन्वितं च करोति जातं विबुधेंद्र
मंत्री बुधालयस्थः क्षितिसूनुदृष्टः १५ सन्मित्रदारात्मजवित्तसौख्योदितो भवेज्ज्योतिषशास्त्रवित्ता स्याच्चारु
भाषी पुरुषः प्रकामं जीवे बुधर्क्षे च बुधेन दृष्टे १६ धनांगनासूनुसुखैरुपेतः प्रासादवापीकृषिकर्मचित्रः
भवेत्प्रसन्नः पुरुषः सुरेज्ये देत्येज्यदृष्टे बुध-वेश्मसंस्थे १७ नरेंद्रसद्मोरवसंप्रयुक्तं नित्योत्सवं पूर्णगुणं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

131

ॐ ओंम॰श्रा॰भं॰जन्मसौम्ये जीवे दिते जीवगृहं प्रयाते ३५ नृपार्थभृत्यापत्यलेखाधिकारं चौर्योऽसक्तं सौकुमार्येण युक्तं द्रव्यो

२६ पेतं मानवं सौम्यसूनोर्जीवर्दे स्यात् शुक्रदृष्टः करोति ३५ वक्ता भोक्ता मलिनः कुदृष्टः कान्तारे दुर्गाचल

वासशीलः कार्योपयुक्तो न भवेन्मनुष्यो जीवर्क्षगे ज्ञेऽर्कसुतेन दृष्टे ३६ प्रारब्धकार्याकलितप्रलापः स

मल्लविद्याकुशलं कुशीलं कुटुंबिनं सज्जनयेन्मनुष्यं बुधः शानि क्षेत्रगतोऽर्कदृष्टः ३७ जलोपजीवी धन

वांश्च भीरुः प्रसूनकंदाद्युमतत्परश्च प्रमान्भवेद्भानुसुतालयस्थे बुधे सुधारश्मिनिरीक्ष्यमाणे ३८ व्री

डालसत्त्वयुतस्वभावः सौम्यः सुखी वाक्चपलो विरक्तः ध्यात्मानवो भानुसुतर्क्षसंस्थे दृष्टे कुजेन सौ॰

म्ये तिनंदनेन ३९ धान्यवाहनधनान्वितः सुखी ग्रामपत्तनमतिर्महामतिः भानुसूनुभवने ज्ञनंदने

देवदेवसविवेक्षिते नरः ४० बहुप्रजासंजनकं कुरूपं प्रज्ञोज्झितं नीचजनानुयातं कामाधिकं सज्ज

नयेन्मनुष्यं शक्रेक्षितो ज्ञः शनिगेहसंस्थः ४१ सुखोज्झितं पापरतं च दीनमकिंचनं हीनजनानुयातं

करोति मर्त्यं शनिधामगामी सौम्यस्तमोहंतृसुतेन दृष्टः ४२ इति बुधः ग्रस्तभीरुर्बहुधर्मकर्मा

ख्यातश्च सद्भाग्ययुतो विनीतः भवेन्नरो देवगुरौ प्रयाते भौमस्य गेहे रविदृष्टदेहे १ ख्यातो विहीनो

गुरु वनिताप्रतः सतां मतो धर्मरतः प्रशान्तः जातो भवेद्भूमिसुतर्क्षयाते वाचोपतौ शीतकरेण दृष्टे २ क्रो

धोति धूर्तः परगर्वहर्ता नृपाश्रयाज्जीवनवृत्तिकर्ता भर्ता बहूनां न नमेत् मानवः स्याज्जीवे कुजर्क्षे च कुजे

न दृष्टे ३ स दृप्तसत्यो नमवाग्विहीनः छिद्रप्रतीतीप्रयतानुयातः मर्त्यो भवेत्केतनव सप्रयुक्तो वाच स्पतम॰:।

२६

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

विधिनाधिशालीसदाविलासोवनिपालमान्यः स्यान्मानवो जन्मनि सोमसूनौ कुलीरगामिन्यमरेज्यदृष्टे २२ प्रियंव
दश्चारुशरीरभारः सद्गीतवाद्यादिविधौ प्रवीणः स्यान्मानवो दानववंद्यदृष्टे कर्कोटकस्थेऽमृतभानुसूनौ २३
गुणैर्विहीनं स्वजनैर्विमुक्तं मलीकदंभानुरतं कृतघ्नं करोति मर्त्यं परिसूतिकाले कुलीरगो ज्ञो रविसूनुदृ
ष्टः २४ क्रियाविहीनं च चलस्वभावं सेर्ष्यं च हिंसाभिरतं च रौद्रं तुंडं प्रकुर्यान्मनुजं प्रसूतौ बुधार्कदृष्टे
मृगराजसंस्थः २५ कृपान्वितं चारुमतिं विनीतं संगीतनृत्याभिरतं नितांतं सद्वृत्तवृत्तं कुरुते हि मर्त्यं चं
द्रेक्षितः सिंहगतो बुधाख्यः २६ कंदर्पसंतोषितभक्तवृंतं कितं हीनमतिं विचित्रं सुदुःखितं संजनये
त्सुमांसं सोमे क्षितो सिंहगतो यदि ज्ञः २७ कोमलनामलसूचिः कुलवर्यश्चारुलोचनयुतश्च समर्थः वाह
नोत्तमधनो मनुजः स्यादिंदुजे हरिगते गुरुदृष्टे २८ सद्रूपशाली प्रियवाग्विलासो नृपप्रियो वाहनवि
त्तयुक्तः भवेन्नरः सोमसुते प्रसूतौ सिंहस्थिते दानववंद्यदृष्टे २९ खेदाद्भुतोद्भूतमहोग्रगंधं विसीर्ण
गात्रं च कुरूपमुग्रं सुखेन हीनं मनुजं प्रकुर्यात्संदेक्षितः सिंहगतो यदि ज्ञः ३० श्लाघ्यमरोमहतिनिपी
डितांगो नगोक्षितः शांतिमुपागतश्च स्यात्ससुबोगीष्यतिवेश्मसंस्थो निशापीयिनीस्वामिसुतो केंद्रदृष्टः
३१ लेखक्रियायां सुतरां प्रवीणः सुसंमतः साधुसुहृज्जनानां नरः सुखी शीनमयूखपुत्रे चंद्रेक्षिते जीवगृ
होपयाते ३२ परप्रवाचोरवनस्थितानां सुलेखका धान्यधनैर्विहीनः नरस्तु नीहारकरस्य सूनौ जी
वालयेमंगलदृष्टदेहे ३३ विज्ञानशाली सुकलावनं सो नृपालकोशालयलेखकर्ता भर्त्तो बहूनां सु

ज्यो० २ २५

ज्यो० जा० भ० गात्रं गुणान्वितं सुशीलं कुर्यान्नरं चंद्रसुतः सितर्क्षे संस्थः सुराचार्यनिरीक्ष्यमाणः १० अतिसुललितवंशं व
स्त्रभावाविशेषैर्युवतिजनमनोज्ञं मन्मथोत्कर्षहर्षं अतिचतुरमुदारं चारुमार्ग्यं च कुर्याद्भृगुगृहगतसौ
म्यो भार्गवेण प्रदृष्टः ११ कलत्रमित्रात्मजयानपीडासंतप्तचित्तं मुखवित्तहीनं कुर्यान्नरं शात्रुजनाभि
भूतं मदक्षितिनोक्षः सितधामगामी १२ सत्योपेतं चारुलीलाविलासं भूमीपालप्राप्तमानोन्नतं च चंच।
च्छीलं चापि कुर्यान्मनुष्यं स्वक्षेत्रस्थः सोमपुत्रोऽर्कदृष्टः १३ अनल्पजल्पो मतनुल्पभाषी कलिप्रियो राज
समीपवर्ती भवेन्नरः सोमसुतास्वगेहे निरीक्ष्यमाणे मृगलांछनेन १४ प्रसन्नगात्रं रुचिरं कलाज्ञं न
रेंद्रकृत्ये सुतरां प्रवीणं जनप्रियं संजनयेन्मनुष्यं सौम्येक्षितो ज्ञः स्वगृहे प्रसंस्थः १५ वरूचर्यसामर्थ्य
विराजमानं सद्राजमानात्रपदाधिकारं भूरिप्रकुर्यान्निजमंदिरस्थः सौम्यः प्रदृष्टः सुरपूजितेन १६
नरेंद्रदूतो विजितारिवर्गः संधिक्रियामार्गविधिप्रगल्भः नीचांगनासक्तमनोभिलाषः अर्केक्षिते ज्ञे नि
जभे नरः स्यात् १७ प्रारंभसिद्धिं विनयं विशेषात्सहस्रभूषादिसमृद्धिमज्ञे: कुर्यान्नराणामनृतां भुज
ङ्गमास्वमंदिरस्थो रविसूनुदृष्टः १८ वस्त्रादिभूषामणिसंग्रहे च गतादिनिर्माणविधौ प्रवीणः प्रसून
मालाग्रथने पि मर्त्यः कुलीरगे ज्ञे नलिनीशदृष्टे १९ कोलानिमित्तान्समहत्तलीको द्रव्यव्ययात्संतकृ
शांगयष्टिः बहुप्रसंगोऽपि भवेन्मनुष्यः कुलीरगे ज्ञे शनिनाप्रदृष्टे २० स्वल्पश्रुतं चौर्यरतं च भूरिप्रिय
वदं कूटविधौ प्रवीणं कुर्यान्नरं शीतकरस्य सूनुः कुलीरसंस्थोऽवनिसूनुदृष्टः २१ प्राज्ञो विधिज्ञो। रामायनमो

२५

133

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ

कैतवसंयुतनश्च ग्रभीर्नरो मंदगृहं प्रयाते रविसुतेन चंद्रसुतेन दृष्टे ३ दीर्घायुषं भूपकृपागुणाढ्यं बंधुप्रियं चारुशरीरकां 134
तिं कार्यप्रलापं जनयेन्मनुष्यं जीवेक्षितो मंदगृहे महीजः ४ सद्भाग्यसौभाग्ययुतैरवेः समेतः कांताव शोत्पन्नकलि
प्रियश्च त्वौलीसुते मंद गृहं प्रयाते निरीक्ष्यमाणे भृगुजेन नरः स्यात् ५ नृपाश्च वित्तो वनिता विवादो बहुश्रुतो
त्पन्नमतिः सकंपः रणप्रियः स्यात्कुरणीननूनं मंदेक्षिते मंदगृहं प्रयाते ६ इति भौमः बंधुप्रियं सत्यवचो वि
लासं नृपालसङ्गेरवसंयुतं च करोति जातं क्षितिसूनुगेहे संस्थो बुधो भानुमता प्रदृष्टः १ सुशीलनृत्यादि सुचिः
प्रकामं कांतारति विहीनं मृत्युयुक्तः कौटिल्यभाक्स्यात्तनुजः कुजक्षे सोमात्मजे शीतकरेण दृष्टे २ नृपप्रियं
सुशीलं चं चश्चरं कलाप्रवीणं कुलहीनतं च प्रधानतं सज्जनयेन्मनुष्यं सौम्यः कुजक्षे कुसुतेन दृष्टः ३ सुखो
पपन्नं च नरं सुवाक्यं कांतासुतोद्भैः सहितं प्रसन्नं करोति मर्त्यं कुजगेहगामी सोमात्मजो वाक्पतिना प्रदृष्टः ४
कांताविलासं गुणगौरवाढ्यं सुहृत्प्रियं चारुमतिं विनीतं करोति जातं शशिजः कुजक्षे संस्थश्च शुक्रेण निरीक्ष्य
माणः ५ सुसाहसं चौर्यरतस्वभावं कुलोत्कलिप्रीतिमसाधुवृत्तं करोति मर्त्यं हरिणांकसूनुर्भौमर्क्षसं
स्थः शनिना प्रदृष्टः ६ दारिद्र्यदुःखामयतप्तदेहं परोपकाराभिरतं नितांतं शांतं सुचित्रं पुरुषं प्रकुर्यात्
सौम्यो भृगुक्षेत्रगतोऽर्कदृष्टः ७ बहुप्रपंचं धनधान्ययुक्तं कं दृढव्रतं भूमिपतिप्रधानं ख्यातं प्रकुर्यात्मनुजं
हि सौम्यः शुक्रर्क्षसंस्थः शशिना प्रदृष्टः ८ राजापमानादिगदप्रतप्तं संतप्तकं सुहृद्भिर्विपक्षपक्षनूनम्
कुर्यान्नरं सोमसुतः सितर्क्षसंस्थो धरापुत्रनिरीक्ष्यमाणः ९ देशोत्तमग्रामपुराधिराजं प्राज्ञं गुणाढ्यं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ज्यो॰जा॰भ॰॥ सुमर्त्यो द्विषज्जनानामहितप्रदाता वनाद्रिकुंजेषु कृतप्रचारः सिंहे महीजे [illegible] यदि [illegible] णाप्रदृष्टे १ प्रचण्डमूर्तिः कठिन
२४ स्वभावश्चक्रोधयाविरूढोतिपुणः स्वकार्ये तीव्रः पुमान्स्याद्रुमतिः प्रसूतो सिंहे महीजे द्विजराजदृष्टे २ सत्काव्यशिल्पा
दिकलाकलापेभिरतोतिलुब्धस्त्वलचित्तवृत्तिः स्वकार्यसिद्धौ निपुणो नरः स्यात्सिंहे महीजे शशिजेनदृष्टे ३ प्रधानतु
द्धिर्नृपतेः सदूतः सेनाधिनाथोभिमतो वहूनां विद्याप्रवीणो हि नरः प्रसूतो जीवेक्षिते सिंहगते महीजे ४ गवेन्द्रतोत्थ
नशरीरकांतिर्नीनांगनाभोगयुतः समृद्धः भूमीसुते सिंहगते प्रसूतो निरीक्षिते दैत्यपुरोहितेन ५ भवेन्निवासोन्यगृ
हेतिचिन्ताकृत्कृतिस्त्वद्गविरोधिक्षितनंच भवेन्नराणां धरणीतनूजे सिंहस्थिते भानुसुतेन दृष्टे ६ वनाद्रिदुर्गेषु कृता
धिवासं क्रूरं सभाग्यं धनपूजितंच करोतिजातं धरणीतनूजो जीवर्क्षयातस्तरणिप्रदृष्टः १ विद्धिधिज्ञं नृपतेरसस्नेक
लिप्रियं सत्वनिराकृतंच प्राज्ञं प्रकुर्यात्मनुजं धरात्मजो जीववर्गगः शीतकरप्रदृष्टः २ प्राज्ञंचशिल्पेनिपुणंसुशीलं।
समस्तविद्याकुशलंविनीतं करोतिजातं कुलोहितांगः सौम्येनदृष्टोगुरुगेहयातः ३ कांतातिचिंतासहितंनितां
तमरातिवर्गैः कलहातुरंञ्च स्थानच्युतं भूमिसुतः प्रकुर्याज्जीवेक्षितोजीवगृहाधिसंस्थः ४ उदारचेताविषयानुरक्तो।
विचित्रभूषापरिभूषितश्च भाग्योदितः स्यान्नृपबोवनीजेजीवर्क्षगे दानवपूज्यदृष्टे ५ कायकांतिरहितश्चनितांतं।
स्थानसंचलनतोपिचदुःखी अन्यकर्मनिरतश्चनरः स्याज्जीवधाम्निकुसुतेर्कजदृष्टे ६ कलत्रपुत्रार्थसुखैःसमेतं
श्यामंसुनीत्यांसुतरांचसूरं कुर्यात्नरंभूतनयोर्कदृष्टः स्वोर्कात्मजागारगतःप्रसूतो १ सद्भूषणंमातृसुखेनहीनंस्या
नच्युतंचंचलसौहृदंच उदारचित्तंप्रकरोतिजातंकुजोर्कजर्क्षे शशिनाप्रदृष्टः २ प्रियोक्तियुक्तो टनलब्धवित्तः सत्वान्वितः [illegible]

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नाप्रसूतौ ४ सुश्लाघ्यनामा क्षितिपालमंत्री सेनापतिर्वा बहुसौख्ययुक्तः स्यान्मानवः शुक्रगृहोपयाते निरीक्षिते भूमि
सुतेसितेन ५ ख्यातो विनीतो धनवान्सुमित्रः पवित्रबुद्धिः कृतशास्त्रयुक्तः नरः पुरग्रामपतिः सितर्क्षे भूनंदने भानु
सुतेन दृष्टे ६ विद्याधनैश्वर्ययुतं सुसत्त्वमरण्यदुर्गाचलकेलिशीलं कुर्यान्नरं सोमसुतालयस्थः क्षोणीसुतः सूर्य
निरीक्ष्यमाणः १ संरक्षणो भूपतिना नियुक्तः कांतारनिसत्त्वयुतेसनोपि भूमीसुतः संजनयेन्मनुष्यं बुधर्क्षसंस्थः श
शिनाप्रदृष्टः २ अनल्पजल्पं गणितप्रगल्भं काव्यप्रियं [illegible] चानृतचारुवाक्यं दौत्ये प्रयासैः सहितं प्रकुर्याद्गुरान
न्सेज्ञगृहे ज्ञदृष्टः ३ अन्यदेशगमनव्यसनाद्यैः संयुतं हि कुरुते नरमुच्चैः सोमसूनुभवने वनिसूनुर्हीनवाशिस
च चिवेन दृष्टः ४ वस्त्रान्नपानीयसुखैः समेतं कांताप्रसक्तं सततं समृद्धं कुर्यान्नरं भूमिसुतो बुधर्क्षे संस्थः प्रहृष्टो भृगु
नंदनेन ५ अतीवशूरो मलिनोलसश्च दुर्गाचलारण्यनिवासशीलः भवेन्नरो भास्करसूनुदृष्टे धरासुते सोमसुता
लयस्थे ६ पित्तप्रकोपार्त्तियुतो निधीशो दंडाधिकारः सुतरोमहौजाः भवेन्नरः कर्कगते महीजे निरीक्ष्यमाणे रविणाप्रसू
तौ ७ गदाभिभूतो गतवस्तुशोको विहीनवेशो गतसाधुवृत्तः भवेन्नरः कर्कटगे महीजे सोमेन सूनौ च निरीक्ष्यमाणे ८
मित्रैर्विमुक्तोऽलसकुटुंबभारः पापप्रचारः खलचित्तवृत्तिः बुधेन दृष्टे सति कर्कटस्थे भौमेन नरः स्याद्युमनाभूतः ९ नरेंद्र
मंत्रीगुणगौरवाढ्यो मान्यो वदान्यो मनुजः प्रसिद्धः कुलीरसंस्थे तनये धरित्र्या निरीक्षिते चित्रशिखंडिजेन १० अर्थव्य
याद्व्यसनेन नूनं निरंतरानर्थसमुद्भवः स्यात् भवेन्नराणां भृगुणा प्रदृष्टे त्वंगारके कर्कटराशिसंस्थे ११ कीलालधारा
दिधनः सुकांतिर्महीपतिप्राप्तधनो मनुष्यः महीसुते कर्कटराशियाते निरीक्षिते सूर्यसुतेन सूतौ १२ हितप्रकर्त्ताभिमते

CC0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

विलासिनीकेलिविलासशीलं करोतिमर्त्यंतिमिपुष्मसंस्थः शीतद्युतिर्जन्मनिभूक्कदृष्टः ७१ कामातुरं
दारसुतैर्विहीनंनीचांगनासक्तमविक्रमंच नीहारररश्मिःश॰ फलप्रपन्नोनरंविदध्याद्द्रविसूनुदृष्टः
७२ इतिमेषादिराशिगेचंद्रेप्रत्येकंग्रहदृष्टयः॥ प्राप्तः सुविख्यातिमानमक्तो धनीबुधानोतिनरा
सुदारो नरोभवेदात्मगृहेमहीजेसरोजिनीराजनिरीक्ष्यमाणे १ अन्यांगनासक्तमनोवसूरंकृपा
विहीनंहतचौरवर्गे नरःप्रकुर्यान्निजधामगामीभूमीतनूजोद्विजराजदृष्टः २ परांगनालंकरू
णेकवृत्तिर्विचक्षणोन्यद्रविणापहारे भौमेनिजागारगतेनदृष्टः भवेन्नरः स्वर्दे गतेप्रसूतेतो लो ली
सुतेसोमसुतेनदृष्टे ३ वंशावनीशोधनवान्सकोशोकृतोपचारः कृतचौरसंसंघः आरेनिजागारग
तेनरः स्यात्सुतेसुराचार्यनिरीक्ष्यमाणे ४ भूयोभूयोभोजनान्सकाष्ठक्रः कांताहेतोर्यातिन
चिंतानितांत प्राणीपुण्यैककर्मणिप्रीतिमान्स्यात्स्वर्दे भौमेभार्गवेणप्रदृष्टे ५ मित्रोज्झितंमानवियोगतप्तंकृशां
गयष्टिविषमंकुदुंवे ईर्ष्याविशेषविदधात्कुजःस्वभदेस्यार्कसुतेनदृष्टः ६ स्वभेभौमदृष्टयः कांतामनोवृत्तिवि
हीनमुच्चैर्वेनाद्रिसंस्थानरुचिंविपन्न प्रचंडकोपंकुरुतेमनुष्यंकुजःसितागारगतोर्कदृष्टः ७ गुरुर्वाविरूढः
खलप्रधुभीरुःवरूगनानामपिनायकश्च स्यान्मानवोभूतनयेसितदैनहत्वनाथेनलिरीक्ष्यमाणे २ मास्तु
प्रवृत्तिःकलहप्रियस्यादनल्पजल्पोल्पधनाम्नजश्च सत्कार्यकीर्तिःपरिहृतिकालेसितालयस्थेवनिजेसहदृ
ष्टे ३ वंधुप्रियःस्यातिरतोतिभागपःसद्गीतनन्यादिविधिप्रवीणः दोलीनतजेभृगुजरदृष्ट्यातेसंवीदितेवासति

संं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

138

नेन गुरुतेन जनो न नु वीक्षितेन ५९ मरालसो मंदधनस्तु सत्यो मलीमसः स्याद्व्यसनाभिभूतः पीयूषमूर्त्तिर्य-
दि नक्रवर्गी त्रिमूर्त्तिपुत्रेण निरीक्ष्यमाणः ६० कृषीवलः केनवसंयुतश्चनूपाश्रितो धर्मरतो नरः स्या-
त् पीयूषमूर्त्तिर्यदि कुंभगामी त्वं भोजिनी स्वामिनिरीक्ष्यमाणः ६१ धनभवनतनुजनिजीजानविश्लेषयु-
क्तो विषमतनुः परार्थोत्पादकोनत्वजन्यः भवति मलिनचित्तो त्वं न धूर्त्तो हि मर्त्यः शशिनि कलशयाते
वीक्षिते भूसुतेन ६२ विषयसौख्ययुतो ऽशनसंविद्या रुचिरनीव कृचिः प्रियभाषणः युवतिगीतमनी-
तिकृतादरो घटगतेंदुरिहज्ञनिरीक्षितः ६३ महीपुरग्रामगृहादिसौख्यं भोगान्वितः साधुजनप्रवृत्तिं
कुर्यान्नरः श्रेष्ठतरं घटस्थो निशाकरः शुक्रगुरुप्रदृष्टः ६४ मित्रात्मजस्त्रीगृहसौख्यपुत्रैर्हीनोदीनो
जनोन्मादितगौरवः स्यात् निशाकरे कुंभधरे प्रसूतौ संवीक्षिते दानवपूजितेन ६५ नरवोष्ट्रवालाश्व-
तरादिलाभभोगं धमविरुद्धवृत्तिं करोति पुंसां हि घटे स्थितश्चेन्निशाकरो भास्करलूनदृष्टः ६६ मनो-
भवोत्कर्षमतीवसौख्यं सेनापतित्वं बहुवित्तवृद्धिं सत्कार्यसिद्धिं कुरुते हि मांत्य कंबदिनेशेन निरीक्ष्य-
माणः ६७ परांभूमृत्कुलराधिसौख्यं सौख्यो [illegible]कि तं पापरतं नितांतं करोति जातं हि निधिः कला-
नां मीनस्थितो भूमिसुतेन दृष्टः ६८ वरांगनासूनुसुखानि नूनं मानं धनं भूमिपतेः प्रसादं कुर्यान्न-
राणां हरिणांकराष्ट्र ते सा रश्मिस्थोज्ञनिरीक्ष्यमाणः ६९ उदारगेहं सुकुमारदेहं सद्देहिनीसूनुधना-
दिसौख्यं नृपं विदध्यान्मृगरोमगामी तमी पतिर्वीक्षितिवीक्षितश्चेत् ७० सद्गीतवाद्याभिरतं सुवृत्तं

CCO, Gurukul Kangri Collection, Haridwar, Djgitized by S3 Foundation, USA

जां॰ भ॰ स्थैले नीजेयेन निरीक्ष्यमाणे ४६ प्रसन्नमूर्त्तिः समुदारकीर्त्तिः कृष्टक्रियास्तो धनवाहनाढ्यः कांतां हताषैः
२२ पुरुषो लियाने शीतद्युतौ दैत्यगुरुप्रदृष्टे ४७ स्यान्मृदंगध्वनिशिल्पचित्तं नीचापगासत्प्यवक्त्रकोदं
कुर्याच्चंद्रः सुतिकाले त्रिसंस्थः छायापुत्रप्रेक्षणान्त्वप्रयातः ४८ प्रोद्भृतापोन्नमकीर्त्तिसंपत्सद्वाहनाना
ह्वजं भयं च नृपप्रसादं कुरुते न राणां नाराधिपश्चापगतोर्कदृष्टः ४९ सेनापतित्वं च महत्त्वतां पंचमा
लयालंकरणोपलब्धिं कुर्यान्नराणां हारिणांकरणप्रापसनस्थो वनिजेन दृष्टः ५० सद्यास्विलासं वकुम
त्वयुक्तं कुर्यान्नरं ज्योतिषशिल्पवित्तं तुरंगजं पेहिकुरंगजन्मकुरंगलक्ष्मप्रभवेण दृष्टः ५१ महत्सदा
स्योदनवान्सुवृत्तो भवेन्नरश्चारुशरीरयष्टिः धनुर्धरे शीतकरे प्रयाते निरीक्षिते शाक्रपुरोहितेन ५२
संतानापौत्यतसंज्ञानधर्मैः शास्त्रन्नसौरव्येनान्वितो मानवः स्यात् तारास्वामी चापगामी प्रसूतौ दृष्टे न्याममा
त्यप्रेक्षणात्वं प्रयातः ५३ सत्त्वोपेतं नित्यशास्त्रानुरक्तं सद्व्याकारमानुवंशप्रचंडं कोदंडस्थस्फेडरश्मपाल
जेन दृष्टः सूतौ शीतरश्मिः करोति ५४ गतधनो मलिनश्चलनप्रियो हतमतिः खलदुःखितमानसः
हिमकरे मकरे च दिवाकरेक्षित तनौ हि नरः प्रभवेद्यदि ५५ अतिप्रचंडो धनवाहनाढ्यः प्राज्ञश्चदारा
त्मजसौरव्ययुक्तः स्यान्मानवो वै भवभाग्निरीक्षिते मृगेमृगांके वनिसूनदृष्टे ५६ भग्नाहीनो निर्धनस्यक्र
गो हा गेहिन्या दैत्य क्रिनः पूरुषः स्यात् आकोकेरस्या वरे शीतरश्मौ पीयूषांशोरात्मजेन प्रदृष्टे ५७ नृपा
श्रितः सत्त्वयुतो गुणाढ्यः कलत्रपुत्राप्तसुखी नरः स्यात् मृगाननेजन्मनि नीशोवाचाम धीशेन निरीक्षमा
णे ५८ सुनयनाध्य्नवाहनसंयुतः सुतविभूषणवेषसुखो नरः कु(नियाम)मदिनादयिते मृगसंस्थिते नमोविमवे

२२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

सिते
मेरिव्रधुमत्वनीपतिप्रियं चारुहष्टेरुभमकी त्रिसंयुतं मानवंहि कुरुते गनाश्रितश्चंद्रमाः सुरपुरोहितेन: ३४ विलासि
नीकेलिविलासचित्तकांताश्रितं भूपतिलब्धवित्तं कुर्यान्नरं शीतकरः कुमार्यां संस्थः सितेन प्रविलोकितश्च ३
५ नि: किंचनं हीनमतिं नितांतं स्त्रीसंश्रयाद्दात्र धनं जनन्या हीनं प्रकुर्यात्खलु कन्यकायां गतो मृगांको र्क
सुतेन दृष्टः ३६ सदाटनः सौख्यधनैर्विहीनः सदंगनासूनुजनैर्विहीनः मित्रैरमित्रैश्च नरो नितांतं तुलाधरे
शीकरे र्कदृष्टे ३७ कुपापराधी हरणोकचित्तं मायासमेतं विषयाभिभूतं करोतिजातं हिमलागतेनु निरी
क्ष्य तो माणेधरणीसुतेन ३८ कलाविधिज्ञं धनधान्ययुक्तं वक्तृत्वविद्याविभवैः समेतं कुर्यान्नरं शीतकर
स्तुलास्थः प्रसूतिकाले शशिजेन दृष्टः ३९ विचक्षणो वस्त्रविभूषणेषु क्रयेषु वा विक्रयसंविधाने तुलाध
रशीतकरे नरः स्याद्दृष्टे गुरुणा सीतरोचितेन ४० प्रागल्भ्यवनेकोद्यम साधितार्थः स्यात्पार्थिवानां क्रियया
समेतः हृष्टो नरः पीनकले वरस्त्रमुके मृगांके भृगुजेन दृष्टे ४१ धनैश्च धान्यैर्वरवाहनैश्च युतोपि हीनो
विषयोपभोगैः भवेन्नरस्तौलिनि जन्मकाले कलानिधौ भानुतनूजदृष्टे ४२ सहजहीनं धनिनं जनाना
मसह्यमत्यंतकृतप्रयासं चलत्रिवासं मनुजं प्रकुर्यात्ताराधिपः कौर्पिगतोर्कदृष्टः ४३ रणांगणे वाग्नय
शोविशेषोगभीरतागौरवसंयुतश्च भूपात्तकंर्यसमुपात्तवित्तो नरो लि नीदेक्षितिजेन दृष्टे ४४ वाक्किला
सकुशलो रणशीलो गीतनृत्यनिरतश्च नितांतं क्रूरकर्मणि नरो निपुणः स्याद्वृश्चिके शशिनि चंद्रजदृष्टे
४५ लोकाग्रक्रपः सुतरांसुरूपः सत्कर्मकृद्वित्तविभूषिताः णाढ्यः स्यान्मानवो जन्मनि शीतरश्मौ सं

140

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ओं जा० भ० ति कुलीरसंस्थः परिस्रुतिकाले दृष्टः कलावान्किल मंगलेन २० दारार्थयुक्तान्नतिनीतिसौख्यं सेनापतिं वा।
२१ सचिवं मनुष्यं कर्काधिरूढः कुरुते हिमांशुः हिमांशुपुत्रेण निरीक्ष्यमाणः २१ नृपाधिकारं गुणिनं नयज्ञं
सुखान्वितं चारुपराक्रमं च करोति जातं यदि चक्रवर्तीपुत्र्यमूर्त्तिर्गुरुणा दृश्यमानः २२ सद्रत्नचामीक
ररत्नभूषा वरांगनासौख्ययुतं नितांतं नरं निजागारगतः करोति सुधाकरः शुक्रनिरीक्ष्यमाणः २३ सत्येन
हीनं जननीविरुद्धं सदा च नपापरतं गतार्थं करोति जातं निजगेहगामी चेद्यामिनीशोऽरविजेन दृष्टः २४ गुण
युतं सततं नृपतिप्रियं वरवधूटं च विलं विनसंतति हरिगतो वितनोति निशाकरः खरकरप्रविलोकनसंयुतः
२५ नरपतेः सचिवो धनवाहना गमवाहना त्मजकलत्रसुखो हि भवेन्नरः हरिगाँ क्ष्मागोके सहिरीणि स्थिति ल
ति तिसुतेन तनुप्रविलोकिते २६ धनांगनावाहननंदनेभ्यः सुखप्रपूर्वैर्हि नरं करोति द्विजाधिराजो मृगराज
संस्थो द्विजाधिराजात्मजसंप्रदृष्टः २७ वसुश्रुतं विश्रुतमार्यवृत्तं कुर्यान्नरं भूमिपतेः प्रधानं चंद्रो मृगेंद्रोप
गतो सुरेंद्रोपाध्यायदृष्टः परिस्रुतिकाले २८ स्त्रीसंभवं वैगुणिनं गुणज्ञं प्राज्ञं विधिज्ञं कुरुते मनुष्यं पीयूष
रश्मिर्जनने यदि स्यात्सिंहानने भार्गवसूनुदृष्टः २९ कांताविमुक्तः कृषिकर्मदक्षो दुर्गाधिकारी हिनरोऽल्प
कार्यः सिंहोपयाते सति शीतभानौ निरीक्षिते सूर्यसुतेन सूनौ ३० भूमीशकोशाधिकृतं सुवृत्तं भार्याविमुक्तं
गुरुभक्तिसक्तं जातं च कन्याश्रितशीतरश्मिः तनोति जंतुं खरश्मिदृष्टः ३१ हिंसापरं स्थूलतरं सकोपं नृप
प्रियं लब्धजयं रणादौ कुमारिकासंश्रितशीतभानुर्भूसूनुसूनो मनुजं करोति ३२ ज्योतिर्विद्याकाव्यसं
गीतविज्ञं प्राज्ञं पुष्कलं लब्धकीर्त्तिं विनीतं कुर्यान्नूनं मानवं मानवंतं कन्यास्थेंदुश्चेंदुजेन प्रदृष्टः ३३ भ

१४१

२१

142

हव्यधान्ययुक्तः नरो नितांतं चतुरः स्वकार्ये दृष्टे दिनेशेन वृषे शशांके ७ कामातुरश्चित्रहरो गनानां स्यात्साधुमित्रः
सुतरां पवित्रः प्रसन्नमूर्त्तिश्च नरो वृषस्थे शीतद्युतौ भूमिसुतेन दृष्टे ८ प्राज्ञं विधिज्ञं सुरूपयासमेतं दयान्वितं भू
तहिते रतं च गुणाभिरामं मनुजं प्रकुर्याद्वृषे शशांकः शशिजेन दृष्टः ९ जायात्मजानंदयुतं सुकीर्त्तिं धर्मक्रिया
यां निरतं च पित्रोः भक्तं प्रसूतौ मनुजं प्रकुर्याद्वृषस्थितेंदुर्गुरुणा प्रदृष्टः १० भूषणांबरगतान् शय्यागंध
माल्य चतुरंघ्रिसुखानि आतनोति सततं मनुजानां चंद्रमा वृषगतो भृगुदृष्टः ११ कलानिधिः पूर्वदले वृषस्य श
नीक्षितः क्षेत्रधनं जनन्याः करोति सत्यं मुनिभिर्यदुक्तं तथापरार्द्धे खलु तातजातं १२ प्राज्ञं सुशीलं द्रविणेन ही
नं क्लेशाभिभूतं सततं करोति नरं च कारोत्सवदः प्रसूतौ वृषे स्थितो भानुमता प्रदिष्टः १३ उदारदारं चतुरं च
शूरं प्राज्ञं च सुत्तं धनवाहनाद्यैः युक्तं प्रकुर्यान्मिथुने स्थितेंदुर्निरीक्षितो जन्मनि भूसुतेन १४ धीरं सदाचार
मुदारसारं नरं नरेंद्रप्रधनं करोति निशीथिनीशो मिथुनाधिसंस्थो निशीथिनीनाथसुतेन दृष्टः १५ विद्यावि
वेकान्वितमर्थवंतं ख्यातं विनीतं सुतरां सुवर्णं करोति मर्त्यो मिथुनेधिसंस्थो निशीथिनीशो [illegible]
गुरुणा प्रदृष्टः १६ वस्त्रप्रसूनान्नवरांगनाभ्यः सद्वाहनेभ्यश्च विभूषणेभ्यः करोति सौख्यं हि सुधामयूखो
द्वंद्वस्थितो जन्मनि शुक्रदृष्टः १७ धनांगनावाहननंदनाद्यैर्विलेपमायाति विगर्हितत्वं नरो हि नीहारकरे
न युग्मे निरीक्षिते भानुसुतेन सूनो १८ निरर्थकं क्लेशकरं विकीर्त्तिं नृपाश्रयं दुर्गहनाधिकारं कुर्यात्कला
वान्यदि सूतिकाले कुलीरसंस्थो नलिनीशदृष्टः १९ दक्षं च भरं जननीविरुद्धं दीणांगयष्टिं मनुजं करो

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

143

ओम् ज्ञा०भ०ठा०द०: कार्यविधानकर्त्ता संतापयेदात्मजनांश्च नूनं नरो मृगेंद्रोपगते दिनेशे दिनेशपुत्रेण निरीक्ष्यमाणो ६ इति सिं-
२० हस्थरवेर्दृष्टिफलानि कार्यकर्ता न सुतसौख्यसमेतो वाग्विलासकुशलः कुलशाली स्यान्नरः सुरपुरोहितमस्य भा-
उ स्करे हिमकरेण दृष्टे १ संग्रामसंप्राप्तयशोविशेषो वक्ता विमृष्टक्षमगुणजनानुसंगः स्थिराश्रयो जीवगृहस्थितेऽर्के
भौमेन दृष्टे प्रबलप्रचंडः २ धातुक्रियाकाव्यकलाकथासु सद्वाक्यलेख्यादिविधिप्रवीणः सतां मतः स्यात्सुरु-
र्वोदिनेशे सौम्येक्षिते जीवगृहोपयाते ३ नृपालमंत्री कुलभूमिपालः कलाविधिज्ञो धनधान्ययुक्तः विद्वान्समा-
भानुमतीज्यगेहे संदृष्टदेहेऽमरपूजितेन ४ सुगंधिमाल्यांवरचारुयोषाभूषाविशेषान्विभवाप्तसौख्यः भवेन्न-
रो देवपुरोहितर्क्षे प्रद्योतने दानववंद्यदृष्टे ५ इति मेषादिगृहे रवेर्दृष्टिफलं उग्रस्वभावो विमृदुर्नतानां धीरो
धराधीश्वरगौरवाढ्यः नरो भवेत्संगरभीरुरेव मेषगांके नलिनीशदृष्टे १ विषाग्निवाताद्भयमेकदावि-
स्यान्नरस्य कृष्णमहदाश्रयस्य मंदाक्षिपीडानिविडा जतुर्द्वांशो मेषस्थिते भूमिसुतेन दृष्टे २ विलसदमलकीर्त्तिः
सर्वविद्याप्रवीणो द्रविणगुणगणाढ्यः संमतः सज्जनानां भवति नतु मनुष्यो मेषराशौ शशांके शशधरसुत-
दृष्टे श्रेष्ठसंपत्प्रतिष्ठः ३ नृपप्रधानः पृतनापतिर्वा कुलानुमानाद्धनसंपदाढ्यः भवेन्नरः कैरविणीवनेशे
भना तदाभवज्जीवपती वभूव वहुपुत्रिका लक्षणा याजकं वापि संप्रीत्या संजग्मुस्ते
स्वनिकेतनं लक्षणापि च दोषेण भुजंगेन च संयुता माघस्नानं तदा कृत्वा व्रतमेतच्चु
कारसा ततस्तु मरणं प्राप्तो दासस्तस्याः सहायकृत् गयो नाम महाराजा चक्रवर्ती
वभूव ह सा लक्षणा च तत्पत्नी सर्वलक्षणसंयुता वभूव लोकविख्याता जीवद्भ
र्त्रीसपुत्रिका स्याद्यो मासासहायं वा करिष्यति धर्मस्य [illegible] तत्फलं प्राप्य मुच्यते
नात्र संशयः नित्यं स्नानमशक्तश्चेत्कुर्यात्स तु दिनत्रयं द्वादश्यामथ सप्तम्यां पौ
र्णमास्यां त्वसंशयं सोपि पूर्णफलं प्राप्य विष्णुलोके महीयते तदेव कर्म सफलं
महापातकनाशकं यो न स्नाति नरो माघे मकरस्थे दिवाकरे व्रह्महा स तु वि
ज्ञेयो खिलकर्मसु गर्हितः नारी वापि नरो वापि न स्नायात् सूर्योदये रौरवं नर
कं प्राप्य यावदाभूतसंप्लवं रोगाद्युपहतो यस्तु पादौ प्रक्षाल्य वाग्यतः धौतव॰

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नविश्वासो मममेहवै प्रत्ययार्थं मम ब्रह्मन्प्रत्ययं कुरु मे ऽधुना इति तस्या वचः श्रु
त्वा याज्ञको वाक्यमब्रवीत् कथं ते प्रत्ययो भूयाद्दुष्प्रतां करुणानिधे सा पुत्रा च पु
नर्विद्धा विस्मयोत्फुल्ललोचना न च वैधव्यमापन्ना रोदिति च बालकुमारिका अस्याः प
तिः कथं जीवेद्वैधव्यं नैव गच्छति तथा कुरु मुनिश्रेष्ठ दयाश्रमवतीधन इति तस्या
वचः श्रुत्वा विस्मितो वाक्यमब्रवीत् अयं वै मकरं प्राप्तो भास्करो लोकभास्करः
माघोयं च वरो मासः सर्वक्रतुफलाधिकः अथ गत्वा कुरु स्नानं गंगायामघहारि
णि स्नानं कृत्वार्पणं कृत्वा देहि तस्मै मतायवै तेन तत्त्वविद यं नूनं ब्रह्मघ्नोयं पुरा
पिच तस्मादयं राजयक्ष्मरोगेण तु मृतिं गतः तथापि मासस्य पुण्याद्धि जीवते ध्रु
वं दापयित्वा तथावर्त्तिकां स्वपात्रविधानतः जीवपती भवेदाशु यावदाभूतसंप्ला
तिकं तत्क्षणात् वचः श्रुत्वा जलं स्वर्द्धाप्यवाग्यतः स्नानं कृत्वार्पणं कृत्वा ददौ तस्मै
फलं तदा तत्क्षणप्रभावेन तत्क्षणादेव बोधितः स्वभर्तारं गं त्रेषयित्वा कृत्वा पात्रे

187

ति पापानि रहस्यानि कृतानि वै नश्यंति तानि सर्वाणि व्रतस्यास्य प्रभावतः चांडालगामि
वृ० नी वा पितृपत्न्या शूद्राभिगामिनी कारकरजकादीनां गामिनी वा लंडब्रह्मचारिणी ब्रह्मद
३८१ क्षयविड्शूद्रप्रतिलोमाभिगामिनी मातुलेयपितृव्यादीन्भ्रातृपुत्राभिगामिनी वा
लघ्नी वा पतिघ्नी वा मातापित्रोर्वधेरता गोघ्नी वा तस्करी वापि रजःसंकरकारिणी र
वमादिमहापापैरावृतापि कुलांगना कृत्वा चैतद्व्रतं सम्यक् मुच्यते नात्र संशयः व्रता
नामुत्तमं चैतत् स्त्रीणामावश्यकं त्विदं रांववर्त्तिप्रदानेन विष्णोरमिततेजसः कोटयो
ब्रह्महत्यानामगम्यागमकोटयः तथैवान्युग्रपापानां कोटयोपचसहस्रशः नश्यंति
नात्र संदेहो नारीणां वा नरस्य वा किंलक्षवर्त्तिभिर्विष्णोः कृते चारात्रिकारिणः किमत्र
बहुनोक्तेन नानेन सदृशं व्रतं पुरुषोपि व्रतं कृत्वा पूर्वोक्तैः पापसंचयैः मुच्यते नात्र सं राम
देहो मधुशासनशासनात् एतत्सर्वं मया ख्यातं पृच्छतस्तव मानद व्रतं कुरु सुखं वति ३८१
ष्ट यथा ते रोचते मनः इति तद्वचनं श्रुत्वा पुनः पप्रच्छ लक्ष्मणा अज्ञानाद्दुष्टभावाद्वा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

शिरो ललाटकं नेत्रे कर्णौ नासे मुखे मुखे तथा कंठे पि स्कंधौ च तथा बाहू स्तनौ वक्षस्यो
दरे नाभौ कटौ च जघने ऊरो जानू च गुल्फके पादौ तदग्रं क्रमशोंगानेवं तु पूजयेत् धूप
तो दीपं तथा नैवेद्यं च निवेदयेत् यद्दुर्लभं तत्पूजायां तद्द्रव्यं कनकस्य च कृत्वा निवेदयेत्तस्मै
पश्चात्पूजां समाचरेत् भक्त्या च जगदात्मानं अथ पूर्वं तं मापयेत् देवदेव जगन्नाथ मे
क्तानां कार्यकारक त्वत्प्रसादं हं याचे शीघ्रकार्यप्रदो भव अनेनैव विधानेन नत्वा तत्पूजां
करोति यः पुत्रैः पौत्रैः प्रपौत्रैश्च सुखमाप्नोति निश्चितं आचार्यं पूजयेत्पश्चाद्ब्राह्मणान्पति
जं तथा गौर्देया च सवत्सा वै सालंकारगुणान्विता त्रिंशत्पलं कांस्यपात्रं घृतेन परिपूरि
तं सुवर्णवर्त्तिसंयुक्तं आचार्याय निवेदयेत् अथवा दशपलं तथा घृतसमन्वितं अथवा
त्र्यपाशक्ति दद्यादावश्यकमिदं व्रताभावे तु वै दद्यात्कांस्यं वै घृतपूरितं यावज्जीवं जी
वपती भवत्येव न संशयः रजोदोषविमुक्तिः स्यात्सो एमास्यां ददाति या ब्राह्मणान्भो
जयेत्पश्चाद्दक्षिणां शंसं न कारयेत् एवं करोति या नारी तस्याः पुण्यफलं शृणु अथ सर्वा

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

बृ॰ ३८४

हेमांभोरुहवासितं स्नानायते मया भक्त्या नीरं स्वीकुरु यत्नतः शिव स्नानं सर्वभूषाधिके सौ॰
म्ये लोकलज्जानिवारके मयोपपादिते तुभ्यं वाससी प्रतिगृह्यतां वस्त्रं महादेव नम
स्ते तु त्राहि मां भवसागरात् ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम यज्ञोपवीतं म
लयागरुसंयुक्तं घनसारं मनोहरं हृदयानंदनं चारु चंदनं प्रतिगृह्यतां गंधः
रंजिता: कुंकुमेनैव अक्षताश्च सुशोभना: त्राहि मां सर्वपापेभ्यो गृहाण वृषभध्वज
अक्षता: पुष्पाणि वनस्पतिरसोद्भूतो दिव्य इति धूपः आज्यं च वर्तिसंयुक्तमिति दीपः
अन्नं चतुर्विधमिति नैवेद्यं कर्पूरवासितं तोयं मंदाकिन्याः समाहृतं आचमनं जग
न्नाथ मया दत्तं हि भक्तितः आच॰ पूगीफलं महद्दिव्यमिति तांबूलं हिरण्यगर्भगर्भ
स्थमिति दक्षिणा मंदारचंपककजपाशनपद्मजातीकल्हारकिंशुकसरोरुहबंधूका
नि धत्तूरकर्णिकशिरीषकदंबबाणविल्वादिकं चमकमं भक्तियुक्तो गृहाण मंत्र

राम ३८४

189

सूत्रं परीधाय त्रिरावर्त्य च वाससा गायत्र्याभिमंत्रितं चाभ्रोतयेन्मूर्द्धि स द्विजः सोपि ला
नफलं प्राप्य मोदते विष्णुमंदिरे ये च शृण्वंति सततं ये पठंति नरोत्तम ते सर्वपापनिर्मु
क्ता यांति पदमव्ययमिति वायुपुराणे नवरात्रिकथा अथ लक्षरुद्रवर्त्तिविधिः
तत्रादौ रुद्रपूजा देवदेव जगन्नाथ पूजयेहं जगत्पते त्वदाहं प्रीतिभावेन लिंगेस्मि
न्संनिधो भव आवाहनं कार्त्तस्वरमयं दिव्यं नानारत्नविभूषितं अनेकशक्ति
संयुक्तमासनं प्रतिगृह्यतां आसनं गंगादि सर्वतीर्थेभ्यो मयाप्रार्थनयाहृतं तो
यमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यतां पाद्यं वरेण्य यज्ञपुरुष प्रजापालनतत्पर न
मो माहात्म्य देवेश गृहाणार्घ्यं नमोस्तु ते अर्घ्यं पाटलोशीरकर्पूरसुरभिस्वादुशी
तलं तोयमाचमनीयार्थं शशिशेखर प्रतिगृह्यतां आचमनीयं पंचामृतं मयानीतं प
योदधिघृतंमधु कर्पूरशर्करायुक्तं गृहाण त्रिपुरांतक पंचा० मंदाकिन्यास्समानीतं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ब्रं०
२८६

प्रातः स्नात्वा कृतविन्यस्त्वा पंचगव्यं तु प्राशयेत् पुण्याहवाचनं कृत्वा आचार्यं वरयेत्ततः त्रयोद 191
शाङ्घ्रिजानम्बुद्धसाग्निकान्वृणुयात्ततः सतिलैश्च यवैः कुर्याद्धृने नयनत्वाद्विचक्षणः तर्प
णोक्तेन मंत्रेण पायसं च घृतान्वितं पालाशान्समिधश्चैव मंत्रेणानेन चैलवेः घृतं च वि
क्रुगायत्र्या होमस्यायं विधिः स्मृतः कलशं तु तथा स्थाप्य [illegible]धानं वस्त्रवस्त्रकं सुवर्ण
प्रतिमां कृत्वा अग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठया स्थाप्य मारणस्नासंस्समाहितः आ
वाहनादिषष्ठ्यांतां पूजां कुर्याद्यथाविधि ततस्त्रयोदशकान्यद्यः प्रतिसाः कारयेत्ततः
स्त्रियाश्च सहितं देवमध्यगं पूजयेद्धरिम् तद्दक्षिणे चतुर्वक्त्रं सावित्र्या सहितं तथा
उत्तरे चोमया सार्धं शंकरं नोगरुडं तथा कालो विलुणापावन्कीरविदीक्षान प्राकरः रु राम
द्रः क्रोधोज्जगद्व्यापीते जोरूपी महेश्वरः निरंजनः कलाध्यक्षो विश्वरूपी जगत्प्रभुः २८६
स्वप्रकाशः स्वयंज्योतिश्चक्रकृद्दोहजनाशायः परब्रह्मेति विदिदशनामभिः पूजयेद्धरिं

णां नात्र संशयः इति तद्वचनं श्रुत्वा पुनः पप्रच्छ ललना मनसा शंकिता भूत्वा सादरं मुनिपुंग
वं साधु साधु महाभाग चित्ते मे भयविकल्पं ललनवमीव्रतस्यास्य विधानं कीदृशं वद कस्मि
न्मासे तु कर्त्तव्यं कस्य वा तत्समर्प्पणं उद्यापनं कथं कार्यं किं फलं तस्य वा मुने त्वया दृष्टो या
त्तको पि लोकानां हितकाम्यया फलं विधानं तत्सर्वं मम वद वदतां वर मुनिरुवाच लो
मशः सर्वमुनीनां च संवादं कथयामि ते कालो हि कार्त्तिको मासो वैशाखो माघ एव वा
सहस्रगुणितं धत्ते व्रतमेतद्धि कार्त्तिके तस्मात्कोटिगुणं धत्ते माघमासे व्रतोत्तमं त॰
स्मादनंतगुणितं फलं वैशाखमासके एतस्मिन्मासत्रितये यस्मिन्मासे समाप्यते त
स्मान्मासद्वयात्पूर्वं प्रारब्धव्यमिदं व्रतं अंते मासि प्रकुर्वीत समाप्तिं च विचक्षणः स
हस्रवर्त्तिभिः कुर्याद्दीपारार्त्रिं विलम्बेन च हं गोघृतेनाथ तैलेन सम्पूर्णं कर्म्मणो हरेः य॰
स्मिन्मासे समाप्तिः स्यात्पौर्णमास्यां तु कारयेत् उद्यापनं विधानेन व्रतसंपूर्णकारकम्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

श्रेचनार्य्यः पाके व्यवस्थिताः अकस्माच्चरजो दृष्ट्वा स्पृष्टा भांडानु पस्करान् अज्ञाना
वृ० द्भयाद्वापि कामाद्वा मोहात्कश्चित्स्त्रियः वेदयित्वा गच्छति नेन दुष्यंति सत्क्रियाः क्रियालोप
२८५ गताह्येतां पापात्तस्मात्तदुत्पद्यते दृश्यामिमां प्राप्नुवंति सर्वा अपि न संशयः बाल्ये वा
यौवने वापि वार्द्धिके वा कदाचन नत्याज्यानि दुराचारो परनिवाभिकां ददाति श्वश्रोश्च
पतिं वधूनां नित्यचारा दुरःसहा एतत्सहायतो नारी यावं च यति सत्क्रिया मृताय
त्यात्तथा भूत्वा वैधव्यं यौवने व्रजेत् या नारी तु रजो दृष्ट्वा सर्वभांडादि संकरं कुरुते य
दि सा नारी वैधव्यं वार्द्धिके व्रजेत् यावानुकूल्यरहिता पतिधर्मेषु सर्वदा बाल्ये वैध
व्यमापन्ना गतिहीना भवत्यलं सर्वासामपि वैधव्ये निद्दानं पृष्टिता च न श्रांतिं तस्य प्र
वक्ष्यामि कर्मणाश्चापि तन्दारुणं कृते तु मुनि पंचम्या व्रते पापं व्ययोषितां त्यंग च्छति ना
रीणामिति वेदविदो विदुः सूर्प्यं सपानं दत्वा कं तैल दली वृतादिके फूल्गाव श्रेष्ठं व्रज राम
तिरजो दोषान संशय नि मूलं तं व्रतं यास्मुल्लं दत्वा कीवृ ते कृते रज सोन्यं महापापं नारी २८५

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

त्वमितिद्विधा पारवश्यं पचनारीणां दुःखमामरणांतिकं मृतापत्यत्ववैधव्ये तथैवापुत्रता
स्त्रियः असह्यमेतत्त्रितयं वैधव्यं तत्र चोत्तरं श्रा— तीनां वनारीणां कस्येदं कर्मणः फ
लं विवर्त्तते पथ्ये केनैवं पृच्छंतीमिति तामथ उवाच .. दासनामा सौभुजंगः सूनृतं वचः
शृणु भद्रे प्रवक्ष्यामि त्वया पृष्टाः पुरा द्विजाः देवानां चैव लोकानां हि तार्थं मंत्रकोवि
दाः श्रा... ज्ञानात्स्वभावाच्च जीवानां यत्पुरा कृतं जानंति कर्मजफलं ते प्रपृच्छाधुना
व्रताः भुजंगवचनं श्रुत्वा तपेवोमिति सा पुनः तत्रागतं महावृद्धं याजकं
नाम वै द्विजं पप्रच्छ तं नतपादीनाप्रश्रयांतरमानसा मुने त्वहं दुराचाराद्वैरूपासिल
त्तणाकृया तथापि तेदयापात्री पृच्छंतीमे सुवोधय साधूनां समचित्तानां जनाः
सर्वे समा भुवि दुर्गधो वा सुगंधो वा यथा वायोः समो भवेत् मुने दशैयं नारीणां
तृतीया तीव्रदुःसहा कर्मणा जायते केन केन वाप्य निवर्त्तते एतद्विस्तार्य मे ब्रूहि
कृपया वद सुव्रत इति तस्या वचः श्रुत्वा याजको वाक्यमब्रवीत् हे वेकमीरणि

195

सधवानांच विधवानां विशेषतः सर्वेषामपिपापानां प्रायश्चित्तमिदं भवेत् इति भविष्योत्तरपु
व्रं० ३८४ राणे वसिष्ठांवरीषसंवादे ललितानमस्कारविधानं अथ कार्त्तिके माघे वैशाखे वा ललितव्रतवि
धिः मासपक्षाद्युल्लिख्यामुककामो लक्ष्मीसहितं विष्णुं सावित्रीसहितं ब्रह्माणं उमासहितं
शिवं वंदामि ह्लित्तोपचारैः पूजयिष्ये इति संकल्प्य षोडशोपचारैः पूजां कुर्यात् अथ सोद्या
पनाकथा सूत उवाच आर्यावर्त्ते पुरा कश्चिद्वैश्यो भूद्धनदत्ताभिधो तस्याभुजंगः पू
त्रो भूद्दासो नाम महाबलः तां ललितां तु सुस्नातां स्थितां गोदावरीतटे बालवैधव्यदे
षेणारुदंतीं कुररीमिव मृतं पतिं पुरः स्थाप्य वधूभिः परिवारिता आक्रंदंतीं ततो वीक्ष्य
प्राणैस्तां च व्यपद्यत लुठंतीं भुवि कायेन मुहुर्घूर्णंतीं भरो वहु जडानामपि कारुण्यं जाय राम ३८४
तां तत्र पश्यतां तदा सा ललिता वाक्यं स्वभुजंगमुवाच ह कुलजानां तु नारीणां दशेय
मतिदारुणा अवस्थात्रयमेतासां तत्रेयं तु सुदारुणा कन्यात्वं जीवभर्तृत्वं विधवा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

196

यथाशक्त्यनुसारतः कार्त्तिके मासि संप्राप्ते पौर्णमास्यां ततः परं संस्थाप्य कलशं पूर्णं सवस्त्रं
सपिधानकं विष्णोश्च प्रतिमां तत्र पूजयेद्विष्णुनामिकां नामभिः केशवाद्यैश्च गंधपू
जाविधीयते नैवेद्यांते समभ्यर्च्य कुर्यात्पश्चाच्च तर्पणं पौरुषेयेण सूक्तेन तिलगोधू
मतंडुलैः देवदेव जगन्नाथ सर्वव्रतफलप्रद व्रतेनानेन संप्रीतो गृहाणार्घ्यं मयार्पि
तं इति वार्घ्यत्रयं दत्त्वा पश्चाद्धोमं समाचरेत् पौरुषेयेण सूक्तेन शतमष्टोत्तरं सदा हो
मशेषं समाप्याथ पूर्णाहुतिमतः परं आचार्यं पूजयेत्पश्चाद्दद्याद्गोमिथुनं गुरोः ब्राह्म
णान्भोजयेत्पश्चाच्छतं विंशतिं पंच वा दक्षिणां च यथाशक्त्या वाचयेदाशिषस्ततः प्र
तुष्टानश्चैतेभ्यो वै स्वयं भुंजीत बंधुभिः इदं व्रतं महापुण्यं पापारण्यदवानलं पापप्र
वर्त्तकतिलं पापाब्धितरलोडुपं सर्वपापहरं नृणां सद्यो विष्णोः प्रसादनं नानेन स
दृशं किंचित्त्रिषु लोकेषु विद्यते सर्वेषामाश्रमाणां च विहितं श्रुतिचोदितं नारीणां

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

व्रं०
३९०

लोकेचकैलासेतिष्ठंतिशिवमूतये एवंहिविहवः संतिद्वीपाश्च द्विजसत्तम अधुनासंप्र
वक्ष्यामियत्पूर्वंकथितंतव तत्कृत्वाकृतकृत्याःस्युर्देवासुरनरेश्वराः येवैस्नात्वाप्र
कुर्वंतितेस्नात्वादुःखभागिनः सुदुर्लभंसमंनास्तित्रिषुलोकेषुसुव्रत अतएवस
दाकार्यंव्रतमेतत्सुदुर्लभं मयाख्यातंव्रतमिदंकिमन्यच्छ्रोतुमिच्छसि नारदउ
वाच शृणुनारदमहाभागयत्वंश्रोतुमिहार्हसि तदहंतेप्रवक्ष्यामिविस्तरेणम
हामते क्षिप्रायास्तुतटेरम्येउज्जयनीपुरीशुभा तस्यामासीत्सुगंधाचवरस्त्रीसति
सुंदरी तयाशुल्कंवृतंदंडमेदश्चैवसुडःसहं सुवर्णानांप्राव्देप्रतिज्ञाकृतवत्यया शतं ४४
युवानश्चतयाविरचितभ्रंशिताःसुसुगंधया राजानोराजपुत्राश्चनग्नीकृत्यपुनःपुनः राम
तेषांभूषांगृहीत्वाचाधिकृताश्चसुगंधया एवंहिविहवोलोकालुंठिताश्चसुगंध ३९०
या कदाचित्समागतास्त्रिप्राकौतुकाविस्मयमानसा ददर्शमनसोरम्यामूर्षिभिःप

197

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

यं नमस्तेदेवदेवेशानमस्तेधरणीधर नमस्तेविश्वरूपायनमस्तेपुरुषोत्तम नमस्कारः
मंत्रहीनं क्रियाहीनमितिप्रार्थना अथप्रकथा नारदउवाच देवदेवजगन्नाथजग
दानंदकारक कौतूहलपूर्वकंहि किंचित्प्रश्नंकरोम्यहं श्रुतानिदेवदेवेशाव्रता
निनियमास्तथा तीर्थानिचमयादेवयज्ञदानान्यनेकशः नास्तिमेनिश्चयोदेव
श्राभितोहंत्वयाधुनः कथयस्वमहादेवयच्छ्रेयंव्रतमुत्तमं शिवउवाच श्रृणुना
रदयत्नेनव्रतानामुत्तमंव्रतं रुद्रवर्त्यामहापुण्यं सर्वोपद्रवनाशनं सुखसंस्पर्श
कंचैवपुत्रराज्यसमृद्धिदं शंकरप्रीतिजनकंशिवलोकप्रदंशिवं स्वभक्तोसह
सर्वधर्ममरुत्सोहकरंपरं श्रृणुनारदयत्नेन गिरीशोयत्रतुष्यति दीपानांलक्षकं
यस्तुकुर्यात्परमधार्मिकः यावत्कालंप्रज्वलंतिदीपास्तेशिवसन्निधौ ब्रह्मलोके
युगसाहस्रदानास्वर्गेमहीयते कौसुम्भेनसमायुक्तादीपादत्ताः शिवालयेशिव

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पे॰ २

१९९

उइत्या कृत्यान्येहति वेषः ॰प्रवरूपं करोत्यवरूपं कारी कदह्यागम्यादित्वा भावात्
वर्त्तमाने प्रथमं कस्मानां कर्तृ कर्मणोरिति निष्ठे प्राप्ते विभाषेयं हेत्वादिति शेषः हेवा
पां अनद्यतन इति कर्मणि लृप् न योगविभजप इति भाष्यकारैरिति शेषः उभयप्राप्ति
त्वनेन कर्तरि निषेधे हि कर्मणि नित्ये षष्ठ्यर्थमिदं गुणकर्मणि वेष्यत इति न मध्य
प्राप्ति रहित स्पर्शनेनात्र सेत्स्यत्यादो व्यतिनार्थमिति दिक् न लोकाव्ययः शेषः षष्ठ्यां प्राप्ता
न यां निकर्तरि तृतीया ॰शुनेन विधीयते तथा च कैयट स्मेव भवेत्तदाह पदेऽवसी
ति बहुवचननिर्देशादेव पर्यायग्रहणमिति कैयट तुल्यार्थैरित्यत्र ग्रहणं पदान्तरनै
रपेक्ष्येण येन तुल्यार्थी स्तेषां ग्रहणार्थं तेन ओरिव गवयः सदृशो गौने त्याहुः नपुंसकं ह्रि
२ लिंगपरो हनि दंतवासरहेति कालिदासः स्फुटे पदं भवति लिंगेन नपुंसके निमातुस
ऽव्याने सह पुत्रेण ऽ प्रधान इति तृतीया नचात्र सह शब्द योगे नेति प्रांकं विनापि
तद्योगं तृतीयेष्टं गजमानः वेति वर्तमाने ॰प्रभवनरस्यां ग्रहणम् अत्र रस्ते वका ५५
स्र

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

भविष्यदवधिमर्यादायाश्चेदवरस्मिन् योगइति यथायंसंवत्सरः नन्वभवति मासोऽयमध्वा भविष्यति रु
नप्राग्धमर्यादेति योगं विभज्य व्याख्यानात् ऽन्ये भविष्यादिति स्वर्यते तेन भविष्यति गन्ता
दपदस्यधिकारे विहितत्वेतु मतन्त्वेवलौ गन्तृन इत्याशयेनोदाहरति स तं पाल्लक इति स
तन्त्यत्रकं तं यस्तु कालसामान्ये एवलुत्व्वविति एवलुन्तत्त्वचनतिषेधः प्रोदनस्य
पाचकः ओत्रवोत्रान्दर्शक इति भावः व्रजंगामीति प्रवक्ष्यपक्ता वा मर्यादायोगे इति
विस्ताव रूपके वृत्तिः यद्यप्यं कालसामान्ये विहितस्तथापि भविष्यति गम्यादयः
स्यूके भविष्यदर्थकः गम्यादयः केचित्तु उण्प्रत्ययः केचिदुणाद्यापि गम्यादयः इति हृदयद्वः।
ननुगम्यादयेवकालिका चतुर्थी चेत्ते वक्ष्यद्वितीयायाः त्वग्रहणं सर्वदा दिवविधेयेपि द्वितीया
प्रकरणप्रक्रियेति व्रजं गामीति निषेध्यैव भवति वेदवत्त्वः इति वस्तुनोऽन्यकं गामीति मासोद
ते हरणौत्र स्तूनगाीरिज्यते नन्वाम स्वयं गते ते शेषे समासाभ्युः ननु ग्रामं गन्तेति द्विती
येति ग्रामं गन्तायीति प्रावरूपके न्याय मर्यादेति : भविष्यदवधिमर्यादायाश्चेद्र।
ते

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

॥ श्रीरामः॥
॥ ५॥
॥ दु० प०॥

201

संकल्पयेत् एवं तत्तद्ध्यायदेवतावाहनादिकालेणभोजनांतं
प्रत्यध्यायं कुर्यात्॥ अंते प्रभूतनैवेद्यादिभिर्महापूजा॥ अनुष्ठे
पूर्वाह्णे समाप्तिः नि[illegible]ग्रहे परान्हे श्लोकास्तु॥ विश्वेश्वरीं जगद्धा
त्रीं॥ १॥ स्तुतासुरैः पूर्वमभीष्टसंश्रया॥ २॥ पाशांप्रतेचोक्तते दैत्यता
पिते॥ ३॥ दुर्गे स्मृता हरसि भीतिमशेषजंतोः॥ ४॥ सर्वबाधाप्रश
मनं॥ ५॥ अत्रैवेरिनाशमित्यत्र रोगनाशनमित्यापूहः॥ कार्य्यः घप
एवं देव्यतापिते इत्यत्रापि॥ सर्वमंगलमांगल्ये॥ ६॥ सृष्टिस्थि
तिविनाशानां॥ ७॥ शरणागतदीनार्त॥ ८॥ सर्वस्वरूपे सर्वेशे इति
अनुग्रहनवश्लोकाः॥ ॐ ह्रीं रक्तचामुंडे तुरु २ अमुकं मे वशमान
यस्वाहा॥ अनेन प्रत्यध्यायमाघंतयोः पूजा सर्वा ते अयुतमेकं जा

॥ श्रीरामः॥
॥ ५॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वैष्टसिद्धिः॥ कात्यायनाय विद्महे कन्याकुमारी धीमहि तन्नो दु
र्गाप्रचोदयात्॥ अथ प्रयोगांतरं कात्यायनीतंत्रे॥ पूर्वाह्ने षोड॰
शांगुलमितं चतुरंगुलोन्नतं स्थंडिलं कृत्वा शुद्धगोघृतेनैकसि
न्पात्रे रूढवर्त्तिषु त्रयोदशपदीपान् प्रज्वाल्य प्रथमदीपे प्रथमा(
ध्यायदेवतामावाह्यासनपाद्यादिगंधदानांतां पूजां कृत्वा पु
ष्पसमर्पणां समयेव रूपमाणो नवभिः श्लोकैः प्रतिश्लोकं पुष्पाणि
समर्पयेत् ततः अथमाध्यायसमाप्तौ व रूपमाणश्लोकैः प्रतिश्लो
कं पुष्पाणि समर्प्य धूपदीपौ दत्वा पायसं नैवेद्यं दत्वा तांबूलं दक्षि
णां च दत्वा नीराजयेत् एकं बालकं कुमारीं सुवासिनीं च भोजयेत्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स०का० इतितत्पुरुषविकल्पस्य भूमित्रयात्तत्क्रमविधानोक्तेर्महतत्वात्तत्र यद्यपि प्राचीनप्रक्रियायामत्र त्रोगेतत्रे पुरुषइति
पु० मात्रिपयत्रयस्यसमासेनवार्तिकांतरेणलभ्यतेतिनदपि रसकोत्रिमात्रे उदाहरणसूत्रस्यभाष्यवार्तिककारास्यामस्य
त्वादित्यासौतावत् वस्तुतस्तु पुरुषात्समासइतिसूत्रे हि गोसमुत्पन्नं कीत्यनुवर्ततेनत्समामर्थ्यस्त्रगालिप्यते हरदत्तो
क्तिरपिकथंचिदेवंपरतयैववर्णितेपतिमुह्यदृयेराकलनीयम् भुमालोकिम् कांस्यांपुरुषआभ्यांक्रीता द्विपुरुषीगौः तद्धित
लुकीत्येव समाहारेपंचपुरुषी ऊर्ध्वमानेतः मादेशेनैवसिद्धेप्तुनः करणं धनुर्धरस्तर्षष्ठेस्तदंततर्पसत् दामवत्पुर्वोभिविके त
पुरस्तादेवसिद्धेऽनुग्रहणंस्पष्टार्थम् संख्यादेरिति स्वरितत्ववलादेकदेशेपुरस्ताननुवर्तते तइतिभावः केवलमा
मककस्यादीति अध्यर्धशमामलकीनत्तु मित्राचरणाथर्मोगधेयीश्रुतिविधानस्तत्त्वेः सत्तुयाभीउतायविधायोमसुपवावि
त्तिरासमासंनीवस्याकृतिः स्वार्थेकृतीमुमंगलीतिवारूढस्यमेषस्त्री प्रत्युदाहरणं त्विति यत्तुप्राचाश्रंतवतीपतिमती
तिप्रत्युदाहृतंनदयुक्तमिति भावः वत्सकपणिति यत्तुप्राचासमस्तोपपचारइतिवर्णितंतत्र क्वधेतिभावः पत्नक
नोर्वेच एकास्या देशः ननुप्रत्ययःउत्तरस्यइउदात्तस्युक्तेः नत्विति अन्यथा हृषाकपिनादेवत्त्वाभावेनैवयोश्चव
कयोरुदीरतिमध्योदात्ते उदात्तत्वंप्रयोजयति आगमादिपुत्रिपुसानेतरतमइत्येवसिद्धमितिप्राचांगंयाविरुध्ये
रन्निति भावः उदात्तेकारइतिमतुदात्वेप्राप्युदात्तः स्वस्ति हीत्यादौ मनेन्प्रत्ययविधायकेसूत्रेधातोनिति
अधिकारात्तु समासमेदेनेनहृंगोयति उदात्तइत्यनुवर्तमानेनसंवध्यतेहृतेनेरेकारेणैवसंवध्यते नत्वोकारेणापी
ति ततश्चयदुक्तंप्राचारौकारौकारवुदात्तौस्यइतितदुपेक्ष्यंहृनिपदन्मंजर्यादिविरोधादितिभावः मनायीति
मध्योदात्ते नदद्वयमाद्युदात्तं रतावकर्तृरीवर्णोनामिति रतःश्रोणिःक्षितिःभूमिःपृथ्वी इत्युदाहरणानि
अपेण्डति अयोनन्पदसोपसर्जनत्वेपिसमस्तस्यान्त्यस्वर्जनत्वमितिभावः संज्ञात्वात्समस्तत्वंधात्वादसत्वात्वत्कुंभके श्रीरामः
पु०

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

204

याचितोह्यग्रामारा: स्मु:॥ कं वल्येति ह्यभ्यां कं वलाभ्यां क्रीता केवल्यमूल्यांग्यलग्राते कं वल्याच्च संख्यायामितियत् श्री
नाथं स्यठओलुक ह्यारकीति ह्यावाटकोपचतीनि बाटका स्वाढका चितयाचा तेवान्यतरस्यां द्विगोष्ठ्य ओति रवठन्या
ठक्के प्राग्वतीयष्ठ्य तस्य लुक् एतेन माचिता व्याख्याता कांडान्तात् षोऽष्टाहस्तप्रमाणोदंड: कांड यद्यपि विशेष
णान्न तदंतविधि: सिद्ध: तथापि स्थलग्रहणाज्ज्ञायते तेन हस्येतन्न भुतत्वात्कांडे स्यैव विशेषणं स्यात् न तदंतस्य त
नस्त्रेहापिस्यात् द्वाभ्यां कांडाभ्यां कांड पूमिताभ्यां क्रीता द्विकांडी वडवेति इह तु न स्यात् द्विकांडात्रं चमक्षिरिति
स्त्रेणोतग्रहणे मात्रच इति यच्चुक्तं चोक्तं इयलुक् चोलुगितलप्रथमस्य द्वितीयस्योर्द्धमानेमनो न मेतिमिद्धान्तात्
द्विकांडीवज्जुरिति न भिहह अपरिमाणादिति पूर्वेण निषेध: स्यात् कांडस्याढकप्रायामपरत्वात् परिमाणपर्यत्वात्
पवित:सर्वत: आदेहन: परिणाहस्तश्च येन मीयते तत्परिमाणं आढककुडवादि नतु यथा कर्षचित्परिच्छेदकेमात्रं य
तह: ऊर्द्धमाने किलोन्मानं परिमाणं तु सर्वत: आयामस्तु प्रमाणं स्यात् संख्याबाह्यातु सर्वत: अतएव हि स्तामिति
त्र तक्षोपु अत्राहु: नियमार्थमिदं वेत्रस्य वनिषेधाय पर्याप्तं स्यादिति अतो द्विकांडी क्षेत्रभक्तिरित्यत्र ऊर्द्धं वचनत्रस्य फलमिति
पुरुषात्प्रमाणे यद्यपि पुरुषशब्दो जातिवचनस्तथापि तेपुरुषो प्रमाणमस्या इति विवक्षा प्रमाणेववत्तेनाव प्रमाणशब्द
सामानाधिकरण्यात् इत्यौत्तरत्वप्रमाणादेव तथा च श्रुत्वं ... पञ्च इति पुरुषद्वनि द्विपुरुषीति अत्र चन्द्राण्डकार: प्रमा
णेनाद्विगोर्नित्यमिति द्वय सिद्धेर्लुगिच्छाह तन्न उरुषशब्दस्य प्रमाणवाचित्वाभावेन प्रमाणेन इति श्लोकवार्तिक
स्यानन्याप्रवृत्ते: येहि त्रमादिवत्प्रमाणत्वे नप्रसिद्धास्तेष्वेव तत्प्रवर्त्तेन नतु पुरुषशब्देपि अन्यथा पुरुषं द्वयसज्द्दम्न्
धचावपि नातिप्रमाणात्स्यानात्रितिवाच्यम् ऊर्द्धमाने मतो न ममेतिवचनात् एवं च पुरुषात्प्रमाणे इत्यस्यापि सामर्थ्यादे
वप्रवृत्ति: यत्तु तत्रैव सूत्रे द्विगोर्नित्यं लुगिति नित्यग्रहणं पुरुषपारायहार दक्षेनोक्तं न स्मारद्याप्रणवात्र लुग्विधीयते

त्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गण श्रीगणेशाय नमः॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात्॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणि
१ नये नमः॥१॥ सर्वादीनि सर्वनामानि॥ सर्व विश्व उभ उभय उतर उतम अन्य अन्यतर इतर त्वत्
त्व नेम सम सिम पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां॥ स्वमज्ञातिधनाख्या
यां॥ अंतरं बहिर्योगोपसंव्यानयोः॥ त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भव
तु किम् ३५ इति सर्वादिः॥ स्वरादिनिपातमव्ययम्॥ स्वर् अंतर् प्रातर् अंतोदात्ताः पुनर् आ
द्युदात्तः सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् पृथक् अंतोदात्ताः ह्यस्
श्वस् दिवा रात्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीम् बहिस् अवस् समया निकषा स्वयं मृ
षा नक्तं नञ् हेतौ अद्धा इद्धा सामि अंतोदात्ताः वत् वत् सनत् सनात् तिरस् आद्युदात्तः अंतरा अं
तोदात्तः मकत्यक् योक् नक् कम् शम् सना सहसा अद्धा स्वधा अलं वषट् विना नाना स्वस्ति अ
न्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या क्त्वातोसुन्कसुनः कृन्मकारसं
ध्यक्षरांतोऽव्ययीभावश्च पुरा मिथो मिथस् प्रबाहुकं आर्यहलम् अभीक्ष्णम् साकम् सार्धम् सत्रम्
समम् नमस् हिरुक् तसिलादिस्तद्धिता एधाच्पर्यन्तः शस्तसी कृत्वसुच् सुच् आस्थालौ अ
र्थाश्च अम् आम् प्रतान् प्रशान् इति स्वरादिः॥ आकृतिगणोऽयम्॥ तेनान्येपि माङ् श्रम् प्रका १

205

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

206

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

207

॥श्रीगणेशाय नमः॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये न
मः॥१॥ सर्वादीनि सर्वनामानि। सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम
पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां स्वमज्ञातिधनाख्यायां अंतरं बहिर्योगोपसंव्या
नयोः त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ३५ इति सर्वादिः स्वरादिनिपातम
व्ययम् स्वर् अंतर् प्रातर् अंतोदात्ताः पुनर् आद्युदात्तः सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत्
आरात् पृथक् अंतोदात्ताः ह्यस् श्वस् दिवा रात्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीम् बहिस् दुस् अवस्
निकषा समया स्वयं वृथा नक्तं नञ् हेतौ अद्धा इद्धा सामि अंतोदात्ताः वत् वत् सनत् सनात् तिरस् आ
द्युदात्तः अंतरा अंतोदात्तः अंतरेण ज्योक् कम् शम् सना सहसा अद्धा स्वधा अलं वषट् विना ना
ना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या क्त्वातोसुन्कसुनः कृन्म
कारसंध्यक्षरांतोऽव्ययीभावश्च पुरा मिथो मिथस् प्रबाहुकं आर्यहलम् अभीक्ष्णम् साकम् सार्धम्
सत्रम् समम् नमस् हिरुक् तसिलादितद्धितैधाच्प्रयंतः शस्तसी कृत्वसुच् सुच् आस्थालौ।
अर्थाश्च अम् आम् प्रतान् प्रशान् इति स्वरादिः आकृतिगणोयम् तेनान्येपि मा माङ् अम् प्रकामम्
भूयस् परम् साक्षात् साचि सत्यं मक्षु संवत् अवश्यम् सपदि प्रादुस् आविः अनिशम् नित्यम् नि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

208

२ तदा सदा अजस्रम् संततम् उषा ओम् भुर् भुवर् झटिति झगिति तरसा सुष्ठु कु अंजसा अ
गण. मिथु विषक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक्
अनुषक् करट् अमनस् अस्मद् स्थाने वरम् दुष्ठु बलात् शु अर्वक् शुदि वदि तसिलादयः प्राक्
पाशपः शस्प्रभृतयः प्राक् ॥ समासांतेभ्यः मांत्वकृत्वोर्थः तसिवती नानाञाविति तदा
दिः सर्वाद्यंतर्गणः इत्यादिः भ्वादयो धातवः भूएधस्पर्द्ध इत्यादि एषामंतर्गणः कृतादिः स्वो
जस्मोट् इत्यादिः १ अयस्मय अकृत् आदेच् इत्यादि अयस्मयादि चादयोऽसत्वे च वा
ह अह एव एवं नूनं पृथक् युगपत् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तु
य ह हंत माकि नाकिं माकिम् नाकिम् माङ् नञ् तावत् यावत् त्वै वै रै श्रौषट् वौषट् व
षट् स्वाहा स्वधा ओम् तथा तथा खलु किल अथ सुष्ठु अ इ उ ऋ लृ ए ऐ ओ औ दह उ
ञ् उकञ् वेलायाम् मात्रायां यथा यत् तत् किम् पुरा वधा धिक् हाहा हाहे पाट् प्याट्
आहो उताहो हो अहो नो अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वात् व शिव.
नवत् शंवत् शंके शुकं खंयुकं मनत् सनात् सनुतर् बहिः किं सत्यं ऋतं अद्धा इ १
द्धा नोचेत् नचेत् नहि नतु कथं कुतः ३ । अव अनुहा हे हो आहो स्वित् शंकं स्व दि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

विसर्गानुस्वारनिन्हा ह्रस्वदीर्घपपधमानीयानामकारोपरि सप्तशाहे पुष्यं पाठस्य पसंख्यानं

व्या॰ सू॰

१

त्वं सच्चिदतो जगद्भवतस्याच्युतं तस्य सदादिसंज्ञं शिव्यानयोंकारमतक्षरामं वेदं च
ब्रह्माणमहं नमामि ॥ ९ ॥ श्रीविष्णुं परमात्मरूपमनघं ब्रह्माणमाद्यं गुरुं पुत्रं तस्य नि
जं परात्मसुहृदं वा नं चात्रिं विभुं शाश्वतं दत्तात्रेयमनादिसिद्धमजरं श्रीरत्ननाथं पतिं
लोला साभिधमादिदेवमचलं वंदे गुरुं मामकं ॥ १० ॥ हृत्पद्मासादनिवासिनं प्रभुमनं
तं चित्सुखं निर्गुणं बुद्ध्यादीन्द्रियवृंदध्वांतसवितारं वै परं शंकरं कैवल्यामृ
तराज्यदं भवहरं वेदांतवेद्यं शिवं वंदे भक्तजनप्रियं तमचलं श्रीसद्गुरुं
व्योमगम् ॥ ११ ॥ शिवायनमः नारायणायनमः गंगायैनमः

शुभमस्तु

॥ १ ॥

यावत

209

श्रीगणेशाय नमः ॥ यंब्रह्मावरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमो
पनिषदैर्गायंति यंसामगाः ध्यानावस्थिततद्गतेनमनसापश्यंति यंयोगिनो यस्यांतंनविदुः
सुरासुरगणादेवायतस्मै नमः ॥१॥ सत्यंहेतुविवर्जितं श्रुतिगिरामाद्यंजगत्कारणंव्याप्तंस्था
वरजंगमंनिरुपमंचैतन्यमंतर्गतं आत्मानंरविचंद्रवह्निवपुषंतारात्मकंसंततंनित्यानंदगु
णालयंसुकृतिनः पश्यंतियंहृद्रिया ॥२॥ योबालार्कपदांबुजेनरुचिरोहेमांबरोनित्यशः
कंठांतर्गतकौस्तुभेनमणिनासौंदर्यशोभाकरः आस्यांभोजविकाशनेनसुभगः कालांतको
दुःखहा तंदत्तंपरमेश्वरंसुखकरंवंदेपरंदैवतं ॥३॥ व्याधस्याचरणंध्रुवस्यचवयोविद्याग
जेंद्रस्यका काजातिर्विदुरस्ययादवपतेरुग्रस्यकिंपौरुषं कुब्जायाः कमनीयरूपमधिकंकिं
तत्सुदाम्नोधनं भक्त्यातुष्यतिकेवलंनचगुणैर्भक्तिप्रियोमाधवः ॥४॥ ब्रह्मानंदंपरमसु
खदंकेवलंज्ञानमूर्त्तिं द्वंद्वातीतंगगनसदृशंतत्वमस्यादिलक्ष्यं एकंनित्यंविमलमचलं
सर्वधीसाक्षिभूतंभावातीतंत्रिगुणरहितंसद्गुरुंतंनमामि ॥५॥ नारायणंपद्मभवंव
शिष्ठंशक्तिंचतत्पुत्रपराशरंच व्यासंशुकंगौडपदंमहांतं गोविंदयोगींद्रमथास्यशि
ष्यं ॥६॥ श्रीशंकराचार्यमथास्यपद्मपादंचहस्तामलकंचशिष्यं तंतोटकंवार्त्तिकका
रमन्यानस्मद्गुरून्संततमानतोस्मि ॥७॥ श्रीतोटकाचार्यमथोप्रशांतं नारायणानं
दगिरिंचशिष्यंहर्षुत्तरश्रीहरशिष्यदेवानंदाग्रज्ञानंविमलंचतस्य ॥८॥ आत्मो

यावत्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

शम् भूयस् परम साक्षात् साचि सत्यं मधु संवत् अवश्यम् सपदि प्रादुस् आविः अनिशम् नि
त्यम् नित्यदा सदा अजस्रम् संततम् उषा ओम् भुर् भुवर् झटिति झगिति तरसा सुष्ठु कु अंजसा
अमिथु विषक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आ
नुषक् अनुषक् हट् अमनस् अम्भर् स्थाने वरम् दुष्ठु बलात् शु अर्वाक् शुदिवदि तसिलाद
यः प्राक् पाशपः शस्प्रभृतयः प्राक् समासांतेभ्यः मांतकृत्वोर्थः तसिवतीनानाञाविति त्यदा
दिः सर्वादिगणः इत्यादिः भूवादयो धातवः भू एध स्पर्द्ध इत्यादि एषामंतर्गणः कटादिः स्वौजसमौ
ट् इत्यादिः १ अयस्मय अकृत आदैच् इत्यादि अयस्मयादि वादयोऽसत्वे च वाद अह एव एवं
नूनं पृथक् युगपत् सपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र नुह हंत माकि नाकि माकिन् नाकी
यावत् न् माङ् नञ् तावत् त्वै वै रै श्रौषट् वौषट् वषट् स्वाहा स्वधा ओम् तथा तथा खलु किल अथ सु स्म अ
इ उ ऋ ऌ ए ऐ ओ औ दह उञ् उकञ् वेला याम् मात्रा यां यथा पत् तत् किम् पुरा वधा धिक् हाहा
हे हे पाट् प्याट् आहो उताहो हो अहो नो अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वा
त् वन वत् शंवट् शंके शुकं खं पुकं सनत् सनात् सनुतर् बहिः किंसत्यं कृतं अद्य इद्धा नो चेत् न
चेत् नहि ननु कथं कुतः कुत्र अव अनुहा हेहो आहोस्वित् शं कं खं दिष्ट्या पशु वट् सह आनु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गग. २ वषट् अंग फट् ताजक् अये अरे वाट् कुं शुं क्षं अंर् सीं सिं सिवे उपसर्ग विभक्ति स्वर प्रतिरूपका
श्च आकृतिगणोयं प्रादयः प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि
अति सु उत् अभि प्रति परि उप उर्यादि च्वि डाचश्च उरी उररी पायी अंगी तेथी नाली अनालीव
ताली धूली धूसी शकला संशकला ध्वंसकला भ्रंसकला गुलु गुधा सजूः फलू फली विक्ली आक्ली आ
लोष्टी केवाली केवासी सेवाली संवाली वर्षाली अश्मसा वश्मसा मसत् मसा मस्मसा मस मस श्रौषट्
वौषट् वषट् स्वाहा स्वधा बंधा प्रादुस् श्रत् आविस् साक्षात्प्रभृतीनि च साक्षात् मिथ्या चिंता भद्रा रो
चना आस्था अमा अद्धा प्राजर्य्या प्राजरुहा विजरुहा संसर्पा अर्थे लवणं उष्णं शीतं उदकं आर्द्रं अग्नौ
वशे विकसने प्रहसने प्रतपने प्रादुस् नमस् आविस् आकृतिगणोयम्॥ ॥इति प्रथमाध्यायः॥ ॥
तिष्ठद्गुप्रभृतीनि च तिष्ठद्गु वहद्गु आयतीगवम् खलेयवं खलेबुसं लूनयवं लूयमानयवं पूतयवं
पूयमानयवं संहृतयवं संह्रियमाणयवं संहृतबुसं संह्रियमाणबुसम् समभूमि समपदाति सुषमं
विषमं निःषमं अपसमं आयतीसमं पापसमं पुण्यसमं प्राह्णं प्ररथं प्रमृगं प्रदक्षिणं संप्रति इच गम. २
सप्तमी शौण्डैः शौण्डधूर्त कितव व्याड प्रवीण संवीत अन्तरः अधि पटु पंडित कुशल चपल निपुण
पात्रेसमितादयश्च॥ पात्रेसमिताः पात्रेबहुलाः उदंबरमशकाः उदंबरकृमि कूपकच्छपः अवटक

CC0, Gurukul Kangri Collection, Haridwar, Digitized ... Foundation, USA

213

मंडु गंडु शंकु लिगु गुहलु मंतु मंक्षु अलिगु जिगीषु मनु तंतु मनायी सूनु कथक ऋक्ष तनु क्षतक्षु क्षत
तु क्षतंड वतंड कपि कत कुरु कत अनडुह् कण्व शकल शालभ जमदग्नि चणक चलक मुद्गल मुशल
जंल्क पर्णवल्क अभयजात विरोहित वृषगण शंडिल गोकक्ष अगस्त्य कुंडिनी यज्ञवल्क पराशर जतू
कर्ण परिहित मंत्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूर अररा करका का[illegible]गल कृष्ण गोलंद उलूक।
तितिक्ष भिषज् भडिभ भंडित दल्भ चिकित चिकित्सत देवहू इंद्रहू एकलू पिप्पलू बृहदग्नि सुलाभिन्
उक्थ कुटिगु अश्वादिभ्यः फिञ् अश्व अश्मन् शंख शूद्र कविद पुर रोहिण खर्जुर पिंजूल भडिल भंडि
ल भडित प्रहत रामोद ग्रीवा काश काश गोलांक अर्क स्वन वन पाद चक्र कूल पूल श्रविष्ठा वीक्षप
विंद पवित्र गोमिन् श्याम धूम धूम्र वाग्मिन् विश्वानर कुट शपात्रेये जन जदु खड ग्रीष्म अर्ह कित वि।
शंप विशाल गिरि चपल चुप सासक वेल्य प्राच्य आनडुह्य पुंसि जाते अर्जुन सुमनस् दुर्मनस् नम
सांत ध्वन आत्रेय भारद्वाजे भरद्वाजात्रेये उत्स आतव कितव शिव. खदिर शिवादिभ्योण् शिव
प्रोष्ठ प्रोष्ठिक चंडु जंभ भूरि दंड कुठार ककुभ अनभिम्लान कोहित सुख संधि मुनि ककुत्स्थ क
होड कोहड कहुयक हय रोधक पिंजल खंजन वतंड तृण कर्णी क्षीर हृद जल हृद परिल पिष्ट है
हय गोपिका कपिलिका जटिलिका बधरिका मंजीरक वृष्णिक खंजार खंजाल रेख लेख दि
फ आलेखन विश्रवण रवण वर्तना क्षग्रीवा क्षपिटक क्षाक नाराक ऊर्णनाभ जरत्कारु पुरो ८

न् खरखादिन् नगरमर्दिन् प्रकारमर्दिन् लोमन् अजागर्त कृष्ण युधिष्ठिर अर्जुन सांव गदा प्रद्युम्न उ
दङ्क संज्ञायां संभूयोम्भसोः सलोपश्च आकृतिगणोयम् सात्यकिः जाङ्घिः ऐन्द्रशर्मिः आजधेनविः गो
धेकुंजादिभ्यः फक् कुंज ब्रध्न शंख भस्मन् गणलोमन् शठ शाक शुण्डा शुभ विपाश स्कंद स्कंभु नड खर
वक मुंज रस्लिक शतिदा उपक समक शतं कुशलं कंब समल वालप्पतिक अग्निशर्मन् हवणेण प्राणनर
सायक दासमित्र धीवपिंगर पिंगल किंकर किंकल कातर कातल काश्य काश्यप काल्य अज अमनु
ष्य कृष्णरणो ब्राह्मवसिष्ठे आमित्रलिगु चित्र कुमार क्रोष्टु क्रोष्टुं च लोह दुर्गस्तं शिंशिप अग्रपत्ण श भ
क सुमनस् सुमत मिमत ऋच जलंधर अध्वर युगंधर हंसक दंडिन् हस्तिन् पंचाल चमसिन् सुकृ
त्या स्थिरक ब्राह्मण वटक बदरक्ष अश्वल ख्वर पलंक रथ अलम्ब कामुक व्रज दन उदंवर शोण अहो
हदंड पहरित इत्यादि हरितादिः विदादिभ्यः विद उर्व कश्यप कुशिक भरद्वाज उपमन्यु किलात कंद
र्प विश्वानर ऋष्टिषेण शतभाग हर्यश्व प्रियक आपस्तंब कूचवार शरद्वत् शुनक धेनु गोपवन शि
गु बिंदु भाजन अश्वावतार श्यामक श्यापर्ण हरित किंदास वाह्यस्क अर्कलूष वध्योग विष्णु वृद्ध प्रतिबो
ध रथीतर रथंतर गविष्ठिर नरवाद अत्नस मठराश्वपाकु मृदु पुनर्भू पुत्र दुहितृ ननांदृ परस्त्री परशुच
गर्गादिः गर्ग वत्स वाजासे संस्कृति अज व्याघ्रपात् विदभृत् प्राचीनयोग पुलस्ति चमस रेभ अग्निवे
वेश्य शंख शठ शाक एकधूम अवट मनस् धनंजय वृक्ष विश्वावसु जरमाण लोहित संशित बभ्रु वल्गु

य शालंकायन कैतेय अनिधेय आशोकेय वात्स्यायन मौञ्जायन कैकसेय काव्य शैव्य एहि पर्येहि
आश्मरथ्य औदपान अराल चंडाल वतंड भोगवत्मौरिमतोः संज्ञायां धादिषु नित्यं ह्रस्वार्थे नन 215
र्योः हृद्दिक्ष्य इति शार्ङ्गरवादिः क्रौड्यादिभ्यश्च क्रोडि लाडि आपिशलि आपिंगलि आरक्षिवि
चौपयत् चैटयत् सैकयत् वैल्वयत् सौधातकी सूत युवत्या भोज क्षत्रिये भौतकी कौटि भौरि
की भौलिकि शालास्थलिका पिष्ठलि गौकक्ष्य अश्वपत्यादिभ्यश्च अश्वपति शतपति धनप
पति गणपति राष्ट्रपति कुलपति गृहपति पशुपति धान्यपति धर्मपति धनपति सभापति प्राण
पति क्षेत्रपति उत्सादिभ्योऽञ् उत्स उदपान विकिर विनद महानद महानस महाप्राण तरुण
तलुन वष्कयणि धेनुः पृथ्वी पंक्ति जगती त्रिष्टुप् जनपद भरत उशीनर ग्रीष्म पिलुकुण उदस्था
न देशे पृष्ठे वंशे भल्लकी रथंतर मध्यंदिन बृहत् महत् सत्वत् कुरु पंचाल इन्द्रावसान उ
ष्णिह ककुभ सुवर्णदेव ग्रीष्मादयश्छंदसि बाह्वादिभ्यश्च बाकु उपबाकु उपवाकु निवाकु
शिवाकु वटाकु उपविंदु वृषली वृकला चूडा बलाक मूषिका कुशल भगला ध्रुवका सुमि
त्रा दुर्मित्रा पुष्करसत् अनुहरत् देवशर्मन् अग्निशर्मन् कुनामन् पंचन् सप्तन् अष्टन् अमि
तौजसः सलोपश्च सुधावत् उदंचत् शिरस माष शराविन् मरीचि क्षेमवृद्धिन् शृंखलतोदि ९

टंक आनंद अश्वत्थ रूपाट् आढक शाष्कुल सूर्प शूर्प सव यूष शूष पूथ सूष दूष मेष वल्लक घा
तक सल्लक मालक मालतो सात्वक वेतसहस्त आतस भंग मदमठ छद पेश मेदा श्वन् तक्षन् अनु
उही अनडुही एकरसो देहलकी कोदन गवादन तेजन् रजन लवण पान मेधा गोतम आयस्थूल तो
रिकि भोनिकि भोतिंगी श्रोत्राह्नानि आलंबि आलजि आलवधि आलन्दि केवाल आयक आ
रट नट नाट नाढ मूलाट शातन पातन पाठन आस्तरण अधिकरण अधिकार आग्रहायणी प्रत्य
वरोहिणी सेवन सुमंगलात्संज्ञायां अंडर सुंदर मंडूल मंथर मंगल पट पिंड उर्द गुर्द राम सूद आंड
कूद पोंड भांडल भांड कदर कदल तरुण तलुन कल्माष बृहत् महत् सोधर्म रोहिणी नक्षत्रे रेवती
नक्षत्रे विकल निष्कल पुष्कल कटाक्रोणिवचने पिप्पल्यादयश्च पिप्पली हरीतकी कोशातकी श
मी करी शारी पृथिवी क्रोष्टु मातामह पितामह इति गौरादिः वक्रपद्धिति: अवति ककति अंह
ति वहति शकटि शक्ति शास्त्र शारी वारि राति अहिकपि यष्टि मुनि इत: प्राण्यंगात् कृदिकारादक्ति
न: सर्वतोक्तिन्नर्थादित्येके कंड कराल लपण कमल विकट विशाल विशंकट भरुज ध्वज चंद्रभा
गानद्यां कल्याण उदार पुराण अहन् इति बह्वादि कोर खुर शिखा वालशफ गुद आकृतिगणो
यम् तेन भग गल राग इति क्रोडादिः शाडं रव कापटव वाहनव गौगुलव शालण गोतम कामंडले

216

CC0, Gurukul Kangri Collection, Haridwar, Digitized ... USA

तद्धु ग्रंभुगमी आगमी भावी प्रस्थायी प्रतिरोधी प्रतियायी प्रतियोगी आद राध दीप ध्वस स्रस:
लभ॥ आकृतिगणोयम् संपदादिभ्यः क्विप् संपत् विपत् आपत् प्रतिपद् भिदा विदारणे छिदा द्वै
धीकरणे॥ विदा दा क्षिपा गुहा गिर्योषध्योः श्रद्धा मेधा गोधा आरा शस्त्र्यां हारा क राधं धने क्षिपा
तारा ज्योतिषि धारा प्रपातने रेखा लेखा चूडा पीडा वपा वसा मृजा कृपेः संप्रसारणं च कृपा क
बा भिषा इत्यादि कृ यादि भीमं भीष्मं भयानकं वरुचरु प्रस्कंदनं प्रतपनं समुद्र ऋव ऋकृ
हृषि रक्षः संक मुक सर्व धक ति आकृतिगणोयं॥ ॥इति तृतीयोध्यायः॥ ॥अजाद्यतष्टाप् अ
जा एडका कोकिला चटका अश्वा मूषिका बाला होडा पाका वत्सा मंदा विलाता पूर्वापहाणा
अपरापहाणा संभस्त्राजिन शणपिंडेभ्यः फलात् सदच काण्ड प्रांत शतैकेभ्यः पुष्पात् शूद्रा च महत्पूर्वा।
जातिः क्रुंचा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा मध्यमेति पुंयोगेपि मूलान्नञः दंष्ट्रा नबट्स्वस्त्रादिभ्यः
स्वसृ दुहितृ ननांदृ यातृ मातृ ननांदृ तिसृ चतसृ समान एकवीर पिंजाश्च भार भद्र पुत्र दामा छंदसि
लोहितइत्यादि लोहितादि। षिद्गौरादिभ्यश्च गौर मत्स्य मनुष्य शृंग तुंग पिंगल हय गवय मुकय
मनुष्य पुट कुरेण द्रोण हरिण कंकण पटर उणक आमल आमलक कुवल बिंब बदर बर्कर च
कीर कर्करक शर्कर पुष्कर। शिखंड सलद शष्कंड सनद सुषुम मसुरवला आलिंद गुडुज बंडया आ ६

217

पयस् अवर संचर आकृतिगणोयं आय इयङ् लिङ् अयादिः सन् क्यच् काम्यच् मना
दिः पुष स्तुष इत्यादि स्तुतस्थिता इत्यादि नंदिग्रहिपचादिभ्यो ल्युणिन्यचः ।। नंदिवाशिमदिदूषि
साधिवर्द्धिशोभिरोचिभ्यो ण्यंतेभ्यः संज्ञायाम् ।। नंदनः वाशनः मदनः दूषणः साधनः वर्द्धनः शो
भनः रोचनः सहितपिदमिभ्यः संज्ञायां ।। सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रंद
नः १० संकर्षणः जनार्दनः पवनः मधुसूदनः विभीषणः लवणः वित्तनाशनः कुलदम
नः ग्राही उत्साही उदासी उद्भासी स्थायी मंत्री समर्द्दी रक्ष श्रुव वशां नौ निरक्षी निश्रावी
निवापी निशायी याचृ व्याहृ संव्याहृ व्रजवदवसां प्रतिषिद्धानां अयाची अव्याहारी असं
व्याहारी अव्राजी अवादी अवासी अचामचित्त हृत् कर्तृकाणां अकारी अहारी अविनायी
विशयि शयी विषयी देशे अभिभावी भूते अपराधी उपरोधी परिभावी परिभावि पच वच वप वद
चल पत नदट् भषट् प्लवट् चरट् गरट् तरट् चोरट् गाहट् देवट् सूदट् जर मर क्षम सेवमेष
कोप मेधा व्रण नर्त्त दर्श सर्प्प शतं भर श्वपच ।। आकृतिगणोयम् ।। ज्वल चल इत्यादि ज्वलादि
मूल विभुजादिभ्य उपसंख्यानं ।। मूल विभुज नख मुच काक गुह कुमुद महीध्र कुध्र गिध्र आकृ
तिगणोयं ।। पार्श्वादिभ्य उपसंख्यानं पार्श्व उदर पृष्ठ शानादिषु कर्तृ सु उत्तान अवमू वान मितद्रु श

दितिका पुरोहितिका आर्ष्टिषेण सुपिष्टम सुरकर्ण मयूरकर्ण खदूरक तक्षन् ऋष्टिषेण गंगा वि-
पाश् यस्क लह्य द्रुह अयःस्थूण नला कर्णपर्ण भलन्दन विरूपाक्ष भूमि इला सपत्नी अधोनद्या
त्रिवेणी त्रिवर्णं च शुभ्रादिभ्यश्च शुभ्र विष्टपुर ब्रह्मकृत शतद्वार शलाथल शलाक लेखा भ्रू
विकसा रोहिणी रुक्मणी दिश शालूक अजवस्ति शकंधि विमातृ विधवा शुक विश देवर शकु-
नि शुक्र उग्र वल बंधकी सृकंडु विष्टि अतिथि गोदंत कुशांबम कष्ट शाताहर पवष्टुरिक सु-
नामन् लक्षण श्याम यार्वासि है गोधा कृकला सक्रणीय प्रवाहण भरत भरम मकंडु कर्पूर
इतर अन्यतर आलीढ सदंत बुदद सुवस्त्र सुदामन् कद्रुतुद अकशाय कुमारिका कुठारि-
का किशोरिका अंबिका जिह्माशिन् परिधि वायुदत्त शकल शलाका खधर कुवेरिका अशोका
गंधपिंगला खडोन्मत्ता अनुदृष्टिन् जरतिन् बलवर्दिनू विग्रजी बन् कीजरमन् श्वन् अश्व अजि-
र कल्याण्यादीनामिनङ् कल्याणी सुभगा दुर्भगा बंधकी अनुदृष्टि अनुसृष्टि जरती बलि. वर्दी
ज्येष्ठा कनिष्ठा मध्यमा परस्त्री मृष्टि हलि बलि विष्टिकुडमजन वलि मित्रयु रेवत्यादिभ्यष्ठक्
रेवती अश्वपाली मणिपाली द्वारपाली वृकवंचिन् वृकबंधक कयाह कर्णग्राह दंडग्राह कुक्कुटा-
क्ष कुर्वादिभ्यो ण्यः कुरु गर्गर मंगुष अजमार रथक रावा वहूक सम्राजः क्षत्रिये कविगाति ॥
कपिंजलादिवाक् श्यामरथ पितृ मातृ इंद्रजाति एजि वातकि दामोष्णीषि गणकारि कैशोरि

CC0. Gurukul Kangri

कुठ शलाका मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी वेताछंदसि सूर्पणाय श्यावनाय श्याव र
थ श्यावपुत्र सत्यंकार वज्राकार वपिकारिन् मूढ शकंधु शकंधु शंकु शाक शाकिन् शालिन्
कर्त्री हर्त्री इन पिंडी तक्षन् वामरथ्यस्य कुण्यादिवत् स्वरवर्जं तत् तिकादिभ्यः फिञ् तिक कि
तव संज्ञा वालशिखा उरस श्याद्य सैंधव यमुंद रूप्य ग्राम्य नील अमित्र गौकक्ष्य कुरु देव र
थ नैतल औरस कौर भौरिकि भौलिकि चौपयत् चैटयत् शाकयत् क्षैतयत् ध्वीनयत् चंद्रम
स् शुभ गंगा वारेण्य सुयामन् आरद् वेबाह्य कश्यपस्या हवलोमका उदन्य यज्ञहेत वाकिनादीनां
कुक् वाकिन गोधेर कार्कटन कालतंका वर्मिवर्मितोर्नलोपश्च कंबोज चोल केरल शक यवन
भर्गकरूष केकय कश्मीर साल्व सुस्थाल उरस कौरव्य गर्गादिः पौचेय शौकेय शौभ्रेय ज्या
बाणेय धार्तेय धार्त्तेय त्रिगर्त भरत उशीनर इति यौधेयादिः भिक्षादिभ्योऽण् ॥ भिक्षा गर्भिणी
क्षेत्र करीष अंगार चर्मिन् धर्मिन् धर्मिस सहस्रयुवति पदाति पद्धति अथर्वण दक्षिणा
खंडितादिभ्यश्च खंडिक वडवा क्षुद्रकमालव सेना संज्ञायां भिक्षुक शुक उलूक श्वन् अहन्
युगवरत्रा हलबंधने पाशादिभ्यो यः पाश तृण धूम वात अंगार पोत गल पिटक पिटाक शकट
शकटा हल नल वन नड खलिनी डाकिनी कुंडलिनी राजन्यादिभ्यो वुञ् राजन्य अनृत बाभ्रव्य शाल
ङ्कायन दैवयातव जालंधरायण त्रैगर्त आत्मकामेय अंबरीषपुत्र वसाति बैल्ववन शैलूष उ

दैवरथी वैल्वल अर्जुनायन संप्रिय दाक्षि ऊर्णनाभ भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ गणा
द्यर्थेयं भौरिकि भौलिकि चौपयत कालेय वालिजक वालिकाज्य सैकयत वैकयत ऐषुकार्यादि
भ्यः ऐषुकारि सारसायन चान्द्रायण द्याक्षायण त्र्यक्षायण औडायन जौलायन खाडायन दास।
मित्रि दासमित्रायण शौद्रायण दाक्षायण शापण्डायनः तार्क्ष्यायण शौभ्रायण सौवीर लायंड
शौंड शयांडि वैश्यमानव वैश्वधेनव नड तुड देव विश्वदेव क्रतुकथादिसूत्रांतात्ठक् उक्थ।
लोकायत न्याय न्यास पुनरुक्त निरुक्त निमित्त द्विपदा ज्योतिष् अनुपद अनुकल्प यज्ञ धर्म क्रम
तर श्लक्ष्ण संहित पदक्रम संघट वृत्ति परिषत् संग्रह गण आयुर्वेद क्रमादिभ्यो वुन् क्रम पद
शिक्षा मीमांसा सामन् वसंतादिभ्यष्ठक् वसंत वर्षा शरत् हेमंत शिशिर प्रथम गुण चरम अनु
गेह अथर्वन् आथर्वण संकलादिभ्यश्च संकल पुष्कल उत्तम उडुप उदुप उत्पुट कुंभ नि
धान सुदक्ष सुदत्त सुभूत सुपूत सुनेत्र सुमंगल सुपिंगल सूतसिकता पूतीका पूलास कूला
स पलास निवेश गवेश गंभीर इतर शर्मन् अहन् लोमन् वेमन् वरुण बहुल सद्योज अभिषि
क्त गोभृत् राजभृत् भल्ल मल्ल माल सुवास्त्वादिभ्योऽण् सुवास्तु वर्ण भंडु खंडु वालिन् कर्पूरिन्
गर्त्त कर्कन्धू शकटी कर्ण कृष्णवर्ण कर्कंधूमती गोह अहिसक्थ अरिहणादिभ्यः अरिहण द्रु
घण द्रुहण भगल उलंद किरण सांपरायण क्रौष्टायन जौष्टायन त्रैगर्त्तायन मैत्रायण भास्त्राय

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

१० ण वैमतायन गौनमायन सौमतायन सौसायन धौमतायन सौमायन ऐन्द्रायण कौद्रायण खडाय
न शौडित्यायन रायस्पोष विपथ विपाश उद्द खाडवीरण उद्दंचन वीरण काश कृत्स जांबवत शिं
शपा रैवत बिल्व. सुयज्ञ शिरीष बधिर जंबू खदिर सुशर्मन् दलतृ भलन्दन खंड
कलज यज्ञदत्त कृशाश्वादिभ्यः कृशाश्व अरिष्ट अरिश्म वेश्मन् विशाल लोमश रो
मश रोम लोम शव क कूट वर्चल सुवर्चल सूकर प्रातराम हस पुगग सुख धूम अजि
न विनत अवनत विकु व्यास पराशर अरुड अवस् मौद्गल्य सुसुर अभिजन विविक्त अ
साय सपूतर पूरक पुगर दासी अजिर तसुबल वेश आसार धूमर ऋश्यादिभ्यः ऋ
श्य न्यग्रोध शर्ल निलीन निधान निबंध परिगूढ उपगूढ असंविसिता मत अमित सि
त राविश्मन् उत्तराश्मन् अश्मन् स्थूल अंशु बाहु खदिर शर्करा अनडुह अरडु परिवंश वेणु वीर
ण खंड दंड परिहृत कर्दम शास शाकट कुमुदादिभ्यः कुमुद शर्करा न्यग्रोध इक्कट संकट कंक
ट गर्त बीज परिवाप निर्यास कुट शकट कचमध्य शिरीष अश्व अश्वत्थ बल्वज यवाष कूप
विकंकत दशग्राम काशादिभ्यः काश पाश अश्वत्थ पलाश पीयुक्ष चरण वासन नडवन
कर्दम कच्छल कंकट गुहा बिसतल कर्पूर बर्बर मधुर ग्रह कपित्थ जतु सीपाल तृणादिभ्यः त
ण नट मूल वन पर्ण वर्ण चरण बिल पुल फल अर्जुन कर्ण सुवर्ण बल चरण तुस प्रेक्षादि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

व्या० योहिमाचलः स्थानप्रदायिनो भावः स्थानप्रदायित्वं उपगंतुं दातुमिवइच्छति वांछति केषां किंनराणां मुद्गास्यतां गातुकामानां किं कुर्वन् पूरयन् कान् कीचकरंध्रभागान् कीचकानां सच्छिद्रवंशानां रंध्राणि छिद्राणि तेषां भागाः प्रदेशाः कीचकरंध्रभागास्तान् की० केन समीरणेन वायुना किंवि० समीरणेन दरीमुखोत्थेन दर्याः कंदरायामुखं दरीमुखं दरीमुखादुत्थानं यस्य स दरीमुखोत्थस्तेन दरीमुखोत्थेन ॥८॥

यः पूरयन् कीचकरंध्रभागान् दरीमुखोत्थेन समीरणेन उद्गास्यतामिच्छति किंनराणां स्थानप्रदायित्वमिवोपगंतुं ॥८॥ व्या० यत्र यस्मिन् हिमाचले गंधः सानूनि शिखराणि सुरभीकरोति असुरभी करोति केषां सरलद्रुमाणां देवदारुवृक्षाणां किंविशिष्टानां सरलद्रुमाणां विघट्टितानां विघर्षितानां कैः करभिः गजैः किं कर्तुं विनेतुं स्फोटयितुं काः कपोलकंडूः गंडखर्जूः किंविशिष्टो गंधः प्रसूतः उत्पन्नः कया स्रुतक्षीरतया स्रुतं क्षीरं स्रुतक्षीरं तस्य भावः स्रुतक्षीरत्वं तया स्रुतक्षीरतया ॥९॥

कपोलकंडूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणां ॥ यत्र स्रुतक्षीरतयाप्रसूतः सानूनि गंधः सुरभीकरोति ॥९॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

224

CC0. Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

स० राहृवेन० ॥ केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसे । समुषद्भिरजाय पृ०
३ थाः ॥ ९ ॥ केतवेन० ॥ गणानांत्वाइत्यनेनगणेशंपूजयेत् । ब्रह्म
जज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः । सबुध्न्याउपमा
अस्यविष्ठाःसतश्चयोनिमसतश्चविवः । ब्रह्मणेन०॥ विष्णोरराटम
सिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि वैष्णवमसिवि
ष्णवेत्वा ॥ विष्णवेन० ॥ नमःशंभवायचमयोभवायचनमः शंक
रायचमयस्करायचनमःशिवायचशिवतरायच ॥ शिवायन० ॥श्री
श्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणि रूपमश्विनौव्यात्तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० ४

इषणान्निषाणामुंमइषाणसर्व्वल्लोकंमइषाण ॥ लक्ष्म्यैन० ॥ अथ पू०
सत्यनारायणपूजाविधिः ॥ व्रतेसंक्रांतौ पौर्णमास्यां चैकादश्यांय
स्मिन्कस्मिन्दिने वा सायंकालेस्नानंकृत्वा पूजास्थानमागत्यास
नेउपविश्याचम्यपवित्रधारणंकृत्वा गणेशगौरीवरुणदेवतानांप्र
तिष्ठावाहनंकृत्वासंकल्पंकुर्य्यात् ॥ अद्येत्यादि० ॥ अमुकगोत्रोऽ
मुकशर्म्मासकलदुरितोपशमनसर्व्वापच्छांतिपूर्व्वक सकलमनो
रथसिद्ध्यर्थं यथासंपादितसामग्र्यागणेशगौरीवरुणदेवतापूजनप्र
त्यादि पंचलोकपालदेवतासूर्य्यादि नवग्रहदेवतापूजनपूर्व्वकं पू

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० त्वेनांगीकृतश्रीसत्यनारायणपूजनकथाश्रवणमहंकरिष्ये ॥ गणे पू०
पू शादिभ्योन० ॥ अर्घ्यपाद्याचमनीयस्नानगंधाक्षत पुष्पधूपदीप
नैवेद्याचमनीयमुखवासतांबूलपूंगीफलद्रव्याणि तत्तन्मंत्रैः समर्प
यामि एवंसूर्य्यादिग्रहाणांतत्तन्मंत्रैःपूजनंकुर्य्यात् ॥ अथसत्यना
रायणपूजनप्रकारमाह ॥ पुष्पंगृहीत्वाध्यानंकुर्य्यात् ॥ ध्यायेत्स
त्यंगुणातीतंगुणत्रयसमन्वितं लोकनाथंत्रिलोकेशंकौस्तुभाभरणं
हरिं ॥ १ ॥ नीलवर्णंपीतवासंश्रीवत्सपदभूषितं गोविंदंगोकुला
नंदंब्रह्माद्यैरपिपूजितम् ॥ २ ॥ इतिध्यानं ॥ आगच्छागच्छदेवेश

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स्व० श्री० तैजोराशेजगत्पते क्रियमाणांमयापूजांगृहाणसुरसत्तम ॥ इत्या पू०
वाहनं ॥ नानारत्नसमायुक्तंकार्त्तस्वरविभूषितं आसनंदेवदेवेश
प्रीत्यर्थंप्रतिगृह्यतां ॥ २ ॥इत्यासनं ॥ नारायणनमस्तेस्तुनरका
र्णवतारक पाद्यंगृहाणदेवेशममसौख्यंविवर्द्धय ॥ ३ ॥ इतिपाद्यं
व्यक्ताव्यक्तस्वरूपायहृषीकपतयेनमः मयानिवेदितोभक्त्याघों
यंप्रतिगृह्यतां ॥ ४ ॥ इत्यर्घं ॥ मंद।।किन्यास्तुयद्वारिसर्व्वपाप
हरंशुभं तदिदंकल्पितंदेवसम्यगाचम्यतांमया ॥ ५ ॥ इत्याचम
नं ॥ स्नानंपंचामृतैर्देवगृहाणपुरुषोत्तम अनाथनाथसर्व्वज्ञगीर्वा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० पु०
७

पाप्मणातिप्रिय ॥ ६ ॥ इतिस्नानं ॥ वेदसूक्तसमायुक्ते यज्ञसामसम
न्विते सर्व्ववर्णप्रदे देववाससी प्रतिगृह्यतां ॥ ७ ॥ इतिवस्त्रं ॥ ब्रह्म
विष्णुमहेशैश्चनिर्मितं ब्रह्मसूत्रकं यज्ञोपवीतदानेनप्रीयतांकमलाप
तिः ॥ ८ ॥ इतियज्ञोपवीतं ॥ श्रीखंडचंदनंदिव्यगंधाढ्यंसुमनो
हरं विलेपनंसुरश्रेष्टचंदनंप्रतिगृह्यतां ॥ ९ ॥ इतिचंदनं ॥ माल्लि
कादिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानि पूजार्थंपुष्पाणि
प्रतिगृह्यतां ॥ १० ॥ इतिपुष्पाणि ॥ वनस्पतिरसोद्भूतोगंधा
ढ्योगंधउत्तमः आघ्रेयःसर्व्वदेवानांधूपम्प्रतिगृह्यतां ॥ ११ ॥ इ

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तिधूपं ॥ साज्यंचवर्त्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहाणदेवे
शत्रैलोक्यतिमिरापह ॥ १२ ॥ दीपं ॥ घृतपक्कहविष्यान्नं पायसं
चसशर्करं नानाविधंचनैवेद्यंविष्णोमेप्रतिगृह्यतां ॥ १३ ॥ नैवेद्यं
सर्व्वपापहरंदिव्यंगांगेयंनिर्मलंजलं आचमनंमयादत्तंगृह्यतांपुरु
षोत्तम ॥ १४ ॥ इत्याचमनं ॥ लवंगकर्पूरयुतंतांबूलंसुरपूजितं प्री
त्यागृहाणदेवेशममसौख्यंविवर्द्धय ॥ १५ ॥ इतितांबूलं ॥ इदंफ
लंमयादेवस्थापितंपुरतस्तवतेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि
इतिफलं ॥ चतुर्वर्त्तिसमायुक्तंघृतेनचसुपूरितं नीराजनेनसंतुष्टोभ
CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० वत्येवजगत्पतिः ॥ १७ ॥ इतिनीराजनं ॥ यानिकानिचपापा पृ०
९ निजन्मांतरकृतानिच तानितानिविनश्यंतिप्रदक्षिणापदेपदे १८ 231
प्रदक्षिणां ॥ ततःपुष्पांजलिंनमस्कारांश्चकृत्वास्तुवीत ॥ यन्मया
भक्तियुक्तेनपत्रंपुष्पंफलंजलं निवेदितंचनैवेद्यंतद्गृहाणानुकंपया १
मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन यत्पूजितंमयादेवपरिपूर्णं
तदस्तुमे ॥ २ ॥ अमोघंपुंडरीकाक्षंनृसिंहंदैत्यसूदनं हृषीकेशंज
गन्नाथंवागीशं वरदायकं ॥ ३ ॥ गुणत्रयगुणातीतंगोविंदंगरुड
ध्वजं जनार्दनंजनातीतंजानकीवल्लभंहरिं ॥ ४ ॥ प्रणमामिसदा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० भक्त्यानारायणमतःपरं दुर्गमेविषमेघोरेशत्रुभिःपरिपीडिते ॥ ५ क०
१० निस्तारयस्वसर्व्वेषुतथानिष्टभयेषुच नामान्येतानिसंकीर्त्यईप्सि
तंफलमाप्नुयात् ॥ ६ ॥ सत्यनारायणंदेवंवंदेहंकामदंप्रभुं लीलया
विततंविश्वंयेनतस्मैनमोनमः ॥ ७ ॥ इतिप्रार्थना ॥ अथकथा ॥
ऋषयऊचुः ॥ एकदानैमिषारण्येऋषयःशौनकादयः पप्रच्छुर्मुन
यःसर्व्वेसूतंपौराणिकंखलु ॥ व्रतेनतपसाकिंवाप्राप्यतेवांछितंफलं
तत्सर्व्वंश्रोतुमिच्छामःकथयस्वमहामुने ॥ २ ॥ सूतउवाच ॥ नार
देनैवसंपृष्टोभगवान्कमलापतिः सुरर्षयेयथैवाहतच्छृणुध्वंसमा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० हिताः ॥ ३ ॥ एकदानारदोयोगीपरानुग्रहकाक्षया पर्य्यटन्नृवि का०
११ विधाल्लोकान्मर्त्यलोकमुपागतः ॥ ४ ॥ ततोदृष्ट्वाजनान्स
र्व्वान्नानाक्लेशसमन्वितान् नानायोनिसमुत्पन्नान्क्लिश्यमानान्स्व
कर्म्मभिः ॥ ५ ॥ केनोपायेनचैतेषांदुःखनाशोभवेद्ध्रुवं इतिसंचिं
त्यमनसाविष्णुलोकंगतस्तदा ॥ ६ ॥ तत्रनारायणंदेवंशुक्लवर्णं
चतुर्भुजं । शंखचक्रगदापद्मवनमालाविभूषितं ॥ ७ ॥ दृष्ट्वातं
देवदेवेशंस्तोतुंसमुपचक्रमे । नारदउ० ॥ नमोवाङ्मनसातीत
रूपायानंतशक्तये ॥ ८ ॥ आदिमध्यांतहीनायनिर्गुणायगुणात्म

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

क० नेॱ सर्व्वेषामादिभूताय भक्तानामार्त्तिनाशने ॥ ९ ॥ श्रुत्वास्तोत्रंत क०
१२ तोविष्णुर्नारदंप्रत्यभाषत । श्रीभगवानुवाच ॥ किमर्थमागतोसि
त्वंकिंतेमनसिवर्त्तते ॥ १० ॥ कथयस्वमहाभागतत्सर्व्वंकथयामिते
नारदउ० ॥ मर्त्यलोकेजनाःसर्व्वेनानाक्लेशसमन्विताः । नानायो
निसमुत्पन्नाः । पच्यंतेपापकर्म्मभिः ॥ ११ तत्कथंशमयेन्नाथल
घूपायेनतद्वद । श्रोतुमिच्छामितत्सर्व्वंकृपास्तियादितेमयि १२
श्रीभगवानुवाच ॥ साधुपृष्टंत्वयावत्सलोकानुग्रहकांक्षया । य
त्कृत्वामुच्यतेमोहात्तच्छृणुष्ववदामिते ॥ १३ ॥ व्रतमस्तिमहत्पु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० पर्य्यंस्वर्गमर्त्येचदुर्लभं। तवस्नेहान्मयावत्सप्रकाशःक्रियतेधुना १४ क०
१३ सत्यनारायणस्यैवंव्रतंसम्यग्विधानतः। कृत्वासद्यःसुखंभुक्त्वा
परत्रमोक्षमाप्नुयात् ॥ १५ ॥ तत्श्रुत्वाभगवद्वाक्यंनारदोमुनिर
ब्रवीत्। नारदउ० ॥ किंफलंकिंविधानंचकृतेकेनैवतद्व्रतम् ॥ १६ ॥
तत्सर्व्वंविस्तराद्ब्रूहिकदाकार्य्यंहितद्व्रतं। श्रीभगवानुवाच ॥ दुः
खशोकादिशमनंधनधान्यप्रवर्द्धनं ॥ १७ ॥ सौभाग्यसंततिकरं
सर्व्वत्रविजयप्रदं। यस्मिन्कस्मिन्दिनेमर्त्योभक्तिश्रद्धासमन्वि
तः ॥ १८ ॥ सत्यनारायणंदेवंयजेच्चैवनिशामुखे। ब्राह्मणैर्बान्धवै

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० श्चैवसहितोधर्म्मतत्परः ॥ १९ ॥ नैवेद्यंभक्तितोदद्यात्सपादंभक्ष्य क०
१४ मुत्तमं । रंभाफलंघृतंक्षीरंगोधूमस्यचचूर्णकं ॥ २० ॥ अभावेशा
लिचूर्णंवाशर्क्करांचगुडंतथा । सपादंसर्व्वभक्ष्याणिचैकीकृत्यनिवे
दयेत् ॥ २१ ॥ विप्रायदक्षिणांदद्यात्कथांश्रुत्वाजनैःसह । ततश्च
बंधुभिःसार्द्धंविप्रांश्चप्रतिभोजयेत् ॥ २२ ॥ सपादंभक्षयेद्भक्त्या
नृत्यगीतादिकंचरेत् । ततश्चस्वगृहंगच्छेत्सत्यनारायणंस्मरन् २३
एवंकृतेमनुष्याणांवांछासिद्धिर्भवेद्ध्रुवं । विशेषतःकलियुगेलघूपा
योऽस्तिभूतले ॥ २४ ॥ इतिश्रीस्कंदपुराणेरेवाखंडेसत्यनारायण

236

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० कथायांप्रथमोऽध्यायः ॥ १ ॥ सूतउ० ॥ अथान्यत्संप्रवक्ष्यामिकृ क०
१५ तंयेनपुराद्विज । कश्चित्काशीपुरेरम्येह्यासीद्विप्रोऽतिनिर्द्धनः ॥१
क्षुत्तृड्भ्यांव्याकुलोभूत्वानित्यंबभ्रामभूतले । दुःखितंब्राह्मणंदृ
ष्ट्वाभगवान्ब्राह्मणप्रियः ॥ २ ॥ वृद्धब्राह्मणरूपस्तंपप्रच्छद्विज
मादरात् । किमर्थंभ्रमसेविप्रमहींनित्यंसुदुःखितः ॥ ३ ॥ तत्सर्वं
श्रोतुमिच्छामिकथ्यतांद्विजसत्तम ब्राह्मणउ० ॥ ब्राह्मणोऽतिद
रिद्रोऽहंभिक्षार्थंवैभ्रमेमहीं ॥ ४ ॥ उपायंयदिजानासिकृपयाकथ
यप्रभो । वृद्धब्राह्मणउ० ॥ सत्यनारायणोविष्णुर्वांछितार्थफलप्र

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

238

स० दः ॥ ५ ॥ तस्यत्वंपूजनंविप्रकुरुष्वव्रतमुत्तमं यत्कृत्वासर्वदुःखे क०
१६ भ्योमुक्तोभवतिमानवः ॥ ६ ॥ विधानंचव्रतस्यापिविप्रायाभाष्य
यत्नतः सत्यनारायणोवृद्धस्तत्रैवांतरधीयत ॥ ७ ॥ तद्व्रतंसंक
रिष्यामियदुक्तंब्राह्मणेनवै इतिसंचिंत्यविप्रोऽसौरात्रौनिद्रांनल
ब्धवान् ॥ ८ ॥ ततःप्रातःसमुत्थायसत्यनारायणव्रतं करिष्यइ
तिसंकल्प्यभिक्षार्थमगमद्द्विजः ॥ ९ ॥ तस्मिन्नेवदिनेविप्रः प्रचु
रंद्रव्यमाप्तवान् तेनैवबंधुभिःसार्द्धंसत्यस्यव्रतमाचरत् ॥ १० ॥स
र्वदुःखविनिर्मुक्तःसर्वसंपत्समन्वितः बभूवसद्विजश्रेष्ठोव्रतस्यास्य

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

प्रभावतः ॥ ११ ॥ ततःप्रभृतिकालंचमासिमासिव्रतंकृतं एवंना
रायणस्येदंव्रतंकृत्वाद्विजोत्तमः ॥ १२ ॥ सर्व्वपापविनिर्मुक्तोदुर्ल्ल
भंमोक्षमाप्तवान् व्रतमस्ययदाविप्रपृथिव्यांसंकरिष्यति ॥ १३ ॥
तदैवसर्व्वदुःखंचमनुजस्यविनश्यति एवंनारायणेनोक्तंनारादाय
महात्मने मयातत्कथितंविप्राःकिमन्यत्कथयामिवः ॥ १४ ॥ ऋ
षयऊचुः ॥ तस्माद्विप्रात्श्रुतंकेनपृथिव्यांचरितंमुने तत्सर्व्वंश्रो
तुमिच्छामःश्रद्धास्माकंप्रजायते ॥ १५ ॥ सूतउ० ॥ शृणुध्वंमुन
यःसर्व्वैंव्रतंयेनकृतंभुवि एकदासद्विजवरोयथाविभवविस्तरैः १६ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

240

स० वंधुभिःस्वजनैःसार्द्धव्रतंकर्त्तुंसमुद्यतः एतस्मिन्नंतरेकालेकाष्टक्रेता क०
१८ समागमत् ॥ १७॥ बहिःकाष्टंचसंस्थाप्यविप्रस्यगृहमाययौ तृ
ष्णयापीडितात्माचदृष्ट्वाविप्रंकृतंव्रतं ॥ १८ ॥ प्रणिपत्यद्विजंप्राह
किमिदंक्रियतेत्वया। कृतेनकिंफलमाप्नोतिविस्तराद्वदमेप्रभो १९
विप्र उ०॥ सत्यनारायणस्येदंव्रतंसर्वेप्सितप्रदं तस्यप्रसादान्मेसर्वं
धनधान्यादिकंमहत् ॥ २० ॥ तस्मादेतद्व्रतंज्ञात्वाकाष्टक्रेतातिह
र्षितः पपौजलंप्रसादंचभुक्त्वासनगरंययौ ॥ २१ ॥ सत्यनाराय
णंदेवंमनसाइत्यचिंतयत् काष्टविक्रयतोग्रामेप्राप्यतेचाद्ययद्धनं२२

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तेनैवसत्यदेवस्यकरिष्येव्रतमुत्तमं इतिसंचिंत्यमनसाकाष्टंकृत्वातु
मस्तके ॥ २३ ॥ जगामनगरेरम्येधनिनांयत्रसंस्थितिः तद्दिनेका
ष्टमूल्यंचद्विगुणंप्राप्तवानसौ ॥ २४ ॥ ततःप्रसन्नहृदयःसुपक्वंकद
लीफलं शर्करघृतदुग्धंचगोधूमस्यचचूर्णकं ॥ २५ ॥ कृत्वैकत्रस
पादंचगृहीत्वास्वगृहंययौ ततोवंधून्समाहूयचकारविधिनाव्रतं॥
तद्व्रतस्यप्रभावेणधनपुत्रान्वितोभवत् इहलोकेसुखंभुक्त्वाचांतेस
त्यपुरंययौ ॥ २७॥ इतिसत्यनारायणकथायांद्वितीयोध्यायः२ ॥
सूतउ० ॥ पुनरग्रेप्रवक्ष्यामिशृणुध्वंमुनिसत्तमाः पुराचोल्कामुखो

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० २० नासन्नृपश्चासीन्महीपतिः ॥ १ ॥ जितेंद्रियःसत्यवादीययौदेवाल क०
यंप्रति दिनेदिनेधनंदत्वाद्विजान्संतोषयत्सुधीः ॥ २ ॥ भार्य्या
तस्यप्रमुग्धाचसरोजवदनासती भद्रशीलानदीतीरेसत्यस्यव्रत
माचरत् ॥ ३ ॥ एतस्मिन्नंतरेतत्रसाधुरेकःसमागतःवाणिज्यार्थं
बहुधनैरनेकैःपरिपूरितः ॥ ४ ॥ नावंसंस्थाप्यतत्तीरेजगामनृप
तिंप्रति दृष्ट्वासव्रतिनंभूपंपप्रच्छविनयान्वितः ॥ ५ ॥ साधुउ०
किमिदंकुरुषेराजन्भक्तियुक्तेनचेतसा । प्रकाशंकुरुतत्सर्वंश्रोतु
मिच्छामिसांप्रतं ॥ ६ ॥ राजोवाच ॥ पूजनंक्रियतेसाधोविष्णोर

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० तस्मादेकंवणिक्पुत्रंसमादायाऽऽगतोहिसः । दृष्ट्वातुसुंदरंबालंव स०
२३ णिक्पुत्रंगुणान्वितं ॥ १९ ॥ ज्ञातिभिर्बंधुभिःसार्द्धंपरितुष्टेनचेतसा ।
दत्तवान्साधुःपुत्रायकन्यांविधिविधानतः ॥ २० ॥ ततोभाग्यव
शात्तेनविस्मृतंव्रतमुत्तमं । विवाहसमयेतस्यास्तेनरुष्टोऽभवत्प्रभुः
ततःकालेननियतोनिजकर्मविशारदः । वाणिज्यार्थंततःशीघ्रंजा
मातृसहितोवणिक् ॥ २२ ॥ रत्नसारपुरेरम्येगत्वासिंधुसमीपतः
वाणिज्यमकरोत्साधुर्जामात्राश्रीमतासह ॥ २३ ॥ तौगतौनगरे
रम्येचंद्रकेतोर्नृपस्यच । एतस्मिन्नेवकालेतुसत्यनारायणःप्रभुः२४

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० २४ भ्रष्टप्रतिज्ञमालोक्य शापं तस्मै प्रदत्तवान् । दारुणं काष्ठमं चास्य महद्दुःखं भविष्यति ॥ २५ ॥ एकस्मिन् दिवसे राज्ञो धनमादाय तस्करः । तत्रैव च गतश्चोरौ वणिजौ यत्र संस्थितौ ॥ २६ ॥ तत्पश्चाद्धावकान् दूतान् दृष्ट्वा भीतेन चेतसा । धनं संस्थाप्य तत्रैव स तु शीघ्रमलक्षितः ॥ २७ ॥ ततो दूताः समायाता यत्रास्ते सज्जनो वणिक् । दृष्ट्वा नृपधनं तत्र बध्वानीतौ वणिक्सुतौ ॥ २८ ॥ हर्षेण धावमानाश्च ऊचुर्नृपसमीपतः । तस्करौ द्वौ समानीतौ विलोक्याज्ञापय प्रभो ॥ २९ ॥ राज्ञाज्ञतास्ततः शीघ्रं दृढं बध्वा तु तावुभौ । स्थापितौ द्वौ महादुर्गे का स०

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० त्वयाधुना नोचेत्त्वांनाशयिष्यामिसराज्यधनपुत्रकं ॥ ४२ ॥ ए क०
२७ वमाभाष्यराजानंध्यानगम्यो ऽभवत्प्रभुः ततःप्रभातसमयेराजा
चस्वजनैःसह ॥ ४३ ॥ उपविश्यसभामध्येप्राहस्वभंजनंप्रति व
द्धौमहाजनौशीघ्रंमोचयद्वौवाणिकसुतौ ॥ ४४ ॥ इतिराज्ञोवचःश्रु
त्वामोचयित्वामहाजनौ समानीयनृपस्याग्रेप्राहुस्तेविनयान्वि
ताः ॥ ४५ ॥ आनीतौद्वौवाणिकपुत्रौमुक्तौनिगडबंधनात् ततोम
हाजनौनत्वाचंद्रकेतुंनृपोत्तमं ॥ ४६ ॥ स्मरंतौपूर्ववृत्तांतंनोचतु
र्भयविह्वलौ राजावाणिकसुतौवीक्ष्यवचःप्रोवाचसादरं ॥ ४७ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० दैवात्प्राप्तंमहद्दुःखमिदानींनास्तिवैभयं तदानिगडसंत्यागंक्षौरक क०
२८ र्म्माद्यकारयत् ॥ ४८ ॥ वस्त्रालंकारकंदत्वापारितोष्यनृपश्चतौ पु
रस्कृत्यवणिकपुत्रौवचसातोषयद्भृशं ॥ ४९ ॥ पुरानीतंतुयद्द्रव्यंद्वि
गुणीकृत्यदत्तवान् प्रोवाचतौततोराजागच्छसाधोनिजाश्रमं॥५०
राजानंप्रणिपत्याहगंतव्यंत्वत्प्रसादतः॥ ५१ ॥ इतिसत्यनारायण
व्रतकथायांतृतीयोऽध्यायः ॥ ३ ॥ सूतउवाच ॥ यात्रांतुकृतवान्
साधुर्मंगलायनपूर्व्विकां ब्राह्मणायधनंदत्वातदातुनगरंययौ॥ १
कियद्दूरेगतेसाधौसत्यनारायणःप्रभुः जिज्ञासांकृतवान्साधोकि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

247

स० मास्तितवनौऽस्थितं ॥ २ ॥ ततोमहाजनौमत्तौहेलयाचप्रहस्यवै ।
२८ कथंपृच्छसिभोदंडिन्मुद्रांनेतुंकिमिच्छसि ॥ ३ ॥ लतापत्रादिकं क०
चैववर्त्ततेतरणौमम निष्ठुरंचवचःश्रुत्वासत्यंभवतुतेवचः ॥ ४ ॥ एव
मुक्त्वागतःशीघ्रंदंडीतुस्यसमीपतः किंयद्दूरेततोगत्वास्थितःसिंधु
समीपतः ॥ ५ ॥ गते दंडिनिसाधुश्चकृतनित्यक्रियस्तदा उत्थितां
तरणींदृष्ट्वाविस्मयंपरमंययौ ॥ ६ ॥ दृष्ट्वालतादिकंचैवमूर्छितो
न्यपतद्भुवि लब्धसंज्ञोवणिक्पुत्रस्ततश्चिंतान्वितोऽभवत् ॥ ७ ॥
तदातुदुहितुःकांतावचनंचेदमब्रवीत् किमर्थंक्रियतेशोकःशापोदत

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

०स श्वदंडिना ॥ ८ ॥ शक्यतेतेनसर्व्वांहिकर्तुंचात्रनसंशयः अतस्त क०

३० च्छरणंयामोवांछितार्थोभविष्यति ॥ ९ ॥ जामातुर्व्वचनंश्रुत्वात

त्सकाशंगतस्तदा दृष्ट्वाचदंडिनंभक्त्यानत्वाप्रोवाचसादरं ॥१०

क्षमस्वचापराधंमेयद्दुक्तंतवसान्निधौ एवंपुनःपुनर्नत्वामहाशोकाकु

लोभवत् ॥ ११ ॥ प्रोवाचवचनंदंडीविलपंतंविलोक्यच मारोदीः

शृणुमद्वाक्यंममपूजाबहिर्मुखः ॥ १२ ॥ ममाज्ञयाचदुर्बुद्धेलब्धंदुः

खंमुहुर्मुहुः ततश्रुत्वाभगवद्वाक्य स्तुतिंकर्तुंसमुद्यतः ॥ १३ ॥

साधुरुवाच ॥ त्वन्मायामोहिताःसर्व्वेब्रह्माद्यास्त्रिदिवौकसः नजा

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ स्याद्वादगुणानंतविचारविशारदप्रवरवारिरुहावलिशीतगुः ॥ जयति निर्ज्जरनायकपूज्यवत्सलं जरामइति पृथितामिधः ॥१॥

— स्या स्यात्कं स्यात् अगादि स्यात्अगादि स्यात्गादि स्याद् आदिर्यस्यासौ स्याद्वा दः अगादि प्राक्प्रयोगे यस्य प्रकार वाचिनो रेक प्राग्थः एकादिपूर्वस्तस्य प्रजितिवाचकोभवति द्वितीयस्य प्रकारवाचकः स्यादिति वाचिके को सौ अगादि प्रा वृत्तस्य स्य इत्यनेनान्वयः प्रकारवाचकस्यादि प्रावृत्तस्य स्य इत्यनेनान्वयः तथा वा यस्य र्थः स्य पूर्व तयो स्य प्राहु प्राधान्तु संज्ञकाः स्युः केन धर्मे णक्रियावाचकत्वेन इति सकलमपि प्रमाहहतो नेकांतवाचिना ॥१॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

सि॰ कौ॰ स्वस्ति श्रीगणेशाय नमः॥ धातोः॥ इदमधिक्रियते। भ्वादिः क्रियावचनो
भ्वादिर्धातुसंज्ञः॥ आदनुदात्तङितः॥ अनुदात्तेतो ङित आत्मनेपदं स्यात् स्वरितञितस्व
1 श्व रितेतो ञमे। ञितः स्वरितेत आत्मनेपदं स्यात् स्वतः परतो न्यत। उक्तनिमित्तही-
नाद्धातोः प नवपं तिबादीनामाद्यानि नव वचनानि परस्मैपदसंज्ञानि परास्मात्
। नाम्नि च युष्मदि चास्मद्युत्तमः। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः। युष्मदुपपदे समानाधिकरणे स्थानिन्यपि मध्यमः
त्वया स्त्रियमिमौ मे: स्पुरास्त्वयोः नाम्नि प्रयुज्यमानेऽप्रयुज्यमानेऽपि मध्यमः
आत्मगामिनि फले आत्मनेपदं परगामिनि फले परस्मैपदं प्रयोक्तुमन्वार्थात्

श्री

2S1

ओम्.नि०सिं० महाफलं स्कांदे तुलसीकाननच्छायायां यस्तु यत्र वै स्थितः तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे माधवीये श्राद्धोप
८८। क्रमे व्यासः महोदधौ प्रयागे च काश्यां च कुरुजांगले शंखः गंगायमुनयोस्तीरे पयोष्ण्यमरकंटके नर्मदाबाहुदाती
रे मगधे लिंगे हिमालये गंगाद्वारे प्रयागे च नैमिषे पुष्करे तथा सन्निहत्यां गयायां च दत्तमक्षयतां व्रजेत् अपि स्या
त् स नोऽस्माकं कुले कश्चित्तनयो नरसत्तमः गयाशीर्षे वटे श्राद्धं यो नो दद्यात्समाहितः एष्टव्या बहवः पुत्राः यद्येकोऽ
पि गयां व्रजेत् यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् आदित्यपुराणे पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गया
शिरः महानद्याः पश्चिमेन यावद् गृध्रेश्वरो गिरिः उत्तरे वल्लपूर्वस्य यावद्दक्षिणमानसं एतद्गयाशिरो ना
म त्रिषु लोकेषु विश्रुतमिति शूलपाणौ बृहस्पतिः गयायां धर्मपृष्ठे च सरसि ब्रह्मणस्तथा गयाशीर्षे व
यवटे पितॄणां दत्तमक्षयं धर्मारण्यं धर्मपृष्ठं धेनुकारण्यमेव च दृष्ट्वैतानि पितॄंश्चार्च्य विंशाचिंशतिमु
त्रि द्धरेत् स्थलीसेतौ वायवीये शमीपत्रप्रमाणेन पिंडं दद्याद्गयाशिरे उद्धरेत्सप्तगोत्राणि कुलमेकोत्त
रं शतं सप्तगोत्राणि पिता माता च भार्या च भगिनी दुहिता तथा पितृमातृष्वसा चैव सप्तगोत्राणि
वै विदुरिति एषां गोत्राणामेकोत्तरशतं कुलं पुरुषा इत्यर्थः ते चोक्तास्तत्रैव तत्वानि विंशतिः पाद्
दशैकादशादश अष्टाविंशतिगोत्राणां कुलमेकोत्तरं शतं तत्वानि चतुर्विंशतिः त्रिवेदादशापूर्वा
द्वादशापराः एवमग्रेऽपि प्रयोगपारिजाते पाद्मे शालग्राममयीं मुद्रां संस्थाप्य तत्र कुत्रचित् वाराणस्यां

CCO, Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

मेनहेयंसपिंडत्वं नित्येनशेषांतुल्योस्यादेकोद्दिष्टं स्त्रियाऽपि एतदुभयमेवस्त्रियाः तेनस्त्रीकर्मकंस्त्रीसंप्रदान-
कंचेत्युभयनियमइतिकल्पतरुः अमावास्यायांयत्क्रियते तत्पार्वणमितिस्मृतं क्रियतेपर्वणियत्तत्पार्वणमिति
स्थितिः अत्रपर्वचतुर्दश्यष्टमीचैव अमावास्याचपूर्णिमा पर्वाण्येतानिराजेंद्ररविसंक्रमणंतथा इति वि-
ष्णुपुराणोक्तसंक्रांत्यादिगोचरायत्क्रियतेश्राद्धं गोष्ठीश्राद्धंतदिष्यते बहूनांविदुषांसंपत्सुखायैतुसुखार्थं
पितृतृप्तये क्रियतेशुद्धयेयत्तुब्राह्मणानांचभोजनं शुद्ध्यर्थमितितत्प्रोक्तंवैनतेयमनीषिभिः निषेक
कालेसोमेचसीमंतोन्नयनेतथा ज्ञेयंपुंसवनेचैवश्राद्धंकर्मांगमेवच देवानुद्दिश्यपयश्राद्धंतद्दैवि-
कमुच्यते गर्भाधानेऽनंतरंयत्तुश्राद्धंकुर्यात्तुसर्पिषा यात्रार्थमितितत्प्रोक्तंप्रवेशेचनसंशयः शारीरोप
चयश्राद्धंकर्तृसमुदायेसंभूयसामग्रीसंपादनेनभगवत्तीर्थादिप्राप्तौविदुषांश्राद्धसंपदां सुखायेभि
त्रपाकाद्यास्तैवबहुपितृकंश्राद्धमेकःकुर्यादितिकल्पतरुः शुद्धिश्राद्धत्र शुद्धिश्राद्धंप्रायश्चित्तांगमिति
मैथिलः अत्रपार्वणैकोद्दिष्टवृद्धिसपिंडीकरणात्मकंचतुर्विधमेवमुख्यं नस्येवायंप्रपंचः अथ
श्राद्धदेशाः मनुः शुचिंदेशंविविक्तंचगोमयेनोपपानयत् पृथ्वीचंद्रोदये विष्णुधर्मे दक्षिणाप्रवणे
देशेतीर्थादौचगृहेपिवा भूसंस्कारादिसंयुक्तेश्राद्धंकुर्यात्प्रयत्नतः तत्रैवप्रभासखंडे तीर्थादष्टगुणंपु
ण्यंस्वगृहेददतःशुभे भारते तस्यदेशाः कुरुक्षेत्रंगयागंगासरस्वती प्रभासपुष्करंचेतितेषुश्राद्धं

CCO. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

253

रमंत्रहोमादीन्करोत्याचार्य एव [illegible]तु उपनेयोऽप्रविधिवदाचार्यस्य समीपतः आ[illegible]योऽग्निसमीपं च वा
सावित्रीस्मृत्यवाजयेत् कन्याश्रीकरणादन्यत्सर्वं विप्रेण कारयेत् एवमेव द्विजैर्जातौ संस्कार्यौ कुंडगो
लकाविति स्मृत्यर्थसारेऽप्येवं कुंडगोलकयोः संस्कार्यत्वं श्राद्धे निषेधश्च दैवे च जपश्च विषयः अन्य
स्याप्राप्तप्रायनोपनयनाद्यप्राप्तेः इत्यपरार्कः उपनयनं च कुमारं भोजयित्वा कार्यं प्रागेवैतेन न
द्दह भोजयंतीति मदनरत्ने पारिजाते गोभिलोक्तेः गायत्र्युपदेशश्चोत्तरतोऽग्नेः कार्यः उत्तरेणा
ग्निमुपविष्टाः प्राङ्मुखश्चाचार्यः प्रत्यङ्मुख इतरोऽधीहि [illegible] भो इति [illegible]नासेत्युक्तेः यद्यपि
ना पा कात्यायने [illegible]स्मै सावित्रीमन्वाहेत्युत्तरतोऽग्नेः प्रत्यङ्मुखायेत्युक्त्वा दक्षिणतस्तिष्ठते आसीनाय
ना चैक इति विकल्प उक्तः तथापि कात्यायनीयमेव सः बह्वृचानां तूत्तरत एव वैदिकत्वात् भिक्षायां विशे
षमाह कात्यायनः मातरमेवाग्रे भिक्षेत पराशरमाधवीये मातरं वा स्वसारं वा मातुर्वा भगिनीं
निजां भिक्षेत भिक्षां प्रथमं या चैनं न न विमानयेत् संस्कारलोपे शौनकः आरभ्याधानमाचौ
लात् कालेऽतीते तु कर्मणां व्याहृत्याज्यं सुसंस्कृत्य हुत्वा कर्म यथाक्रमं एतेष्वेकैकलोपे तु पादकृ
च्छ्रं समाचरेत् छायायामर्धकृच्छ्रः स्यादापदि त्वेवमीरितं अनापदि तु सर्वत्र द्विगुणं चरेत् पा
रिजाते कात्यायनः लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते प्रायश्चित्ते कृते पश्चात् लुप्तं कर्म स

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

माचरेत् समन्वर्थसारे चैवं कारिकायां तु प्रायश्चित्ते कृते तीतं कर्म कृताकृत मित्युक्तं प्रायश्चित्ते कृते प
श्चादतीतमपि कर्मैव कार्यमित्येके आचार्या नेत्यन्ये तु विपश्चित इति त्रिकांडमंडनेन तु काला
तीतेषु कार्येषु प्राप्तवत्स्वपरेषु च कालातीतेषु कृत्वैव विदध्यादुत्तराणि च इत्युक्तं तंत्रेणानां दीक्षा
द्यं कुर्यात् देशकालकर्त्रैक्यात् गणशः क्रियमाणानां मातॄणां पूजनं सकृत् सकृत्तत्र सर्वेषां ॥ देव
नवे च्छौड्ढमादीनपृथिमादिष्विति छांदोगापरिशिष्टात् एतद् बहूनामपत्यानां युगपत्संस्कारक
रणविषयमिति वोपदेवः अप्रतीतसंस्काराणां युगपत्करण इत्यन्ये तत्रापि चौलस्य उपनीत्या
सहेति पद्ये उपनीतिदिने एवानुष्ठानं न पूर्वदिने सह त्वस्य द्विवसैक्ये संनिकृष्टतरत्वात् व
ह्वाचारेष्वेवं उपनीतिदिने मध्याह्नसंध्या माहपारिजाते जैमिनिः यावद्व्रतोपदेशो न तावत्संध्या
द्विकं न च ततो मध्याह्नसंध्यादि सर्वकर्म समाचरेदिति ब्रह्मगायत्री यजुर्वचनं उपायनेत
कर्त्तव्यं सायंसंध्योपासनं आरंभे ब्रह्मयज्ञस्तु मध्याह्नेनपरे हनीति तच्छांखांतरविषयमि
तिपारिजातः विकल्प इति युक्तं पद्मनाभः उपनयनाग्निस्त्रिरात्रं धार्यः अहमेत मग्निं धारयंती।
त्यापस्तंबोक्तेः बौधायनसूत्रे तु साधारणमप्युक्तं उपनयनादिरग्निस्त्वमोपासनमित्याचद्व
ते पाणिग्रहणादित्येके नित्यो धार्योऽनुगतो निर्मथ्य इति द्वंद्वं जातानारणिपातेन प्रयाजंघना रामायनमः

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नसंक्रान्त्या मध्यस्य पौर्णमासिकत्वं आद्यतिथिकत्वं वा चैत्रत्वमिति तन्न मीन एव सौरश्चैत्रः एवं वैशाखा
दयोपि मेषाद्याः ज्ञेयाः सौरमानप्रसंगात्संक्रान्तिनिर्णय उच्यते तत्र पूर्वतोपि परतोपि संक्रमात्पु-
ण्यकालघटिकाः षोडशेति सामान्यतः सर्वैरुक्तो विशेषस्तूच्यते अत्र मानकाः संग्रहश्लोकाः प्रागू
र्ध्वं दश पूर्वतः षडुवनिलवत्पराः पूर्वं तस्मिंशत्षोडश पूर्वतोपि परतः पूर्वाः पराः स्युर्दश पूर्वाः षोड-
श चोत्तराः स्युर्भवः पश्चात्त्वेदाः पुनः पूर्वाः षोडश चोत्तराः पुनरघो पुण्याम्मेषादितः ॥ अस्या
र्थः मेषे प्रागूर्ध्वं दशघटिकाः पुण्यकालः वृषे पूर्वाः षोडश मिथुने पराः षोडश कर्के पूर्वास्त्रिंशत् सिं
हे पूर्वाः षोडश कन्यायाः पराः षोडश तुलायां प्रागूर्ध्वं दश वृश्चिके पूर्वाः षोडश धनुषि पराः षोडश
मकरे चत्वारिंशत्पराः इदं च हेमाद्रिमतेनोक्तं माधवमते त्वत्र पराविंशतिः पुण्याः कुंभे पूर्वाः षोडश
मीने पराः षोडशेति याः पुत्तरा पुण्यतमा प्रयोक्ता सायं भवेत्सा यदि सापि पूर्वा ॥ पूर्वानुयोक्ता यदि
सा विभाते सा पुत्तरा रात्रिनिषेधतः स्यात् प्रर्वाङ्निशीथाद्यदि संक्रमः स्यात्पूर्वेह्नि पुण्यमपरतः परे
ह्नि आसन्नयामद्वयमेव पुण्यं निशीथमध्ये तु दिनद्वयं स्यात् कर्कस्थेप्येवमिति ह्युवाच हेमाद्रिसूरिस्त्व ऊ
न्यथापरार्कः ऊषःप्रदोषे यदि वार्द्धरात्रे परेह्नि पुण्यं त्वथ कर्कटस्थे तु प्रभातकाले यदि वा निशीथे पूर्वे
ह्नि पुण्यं त्विति माधवार्यः अत्र मूलवचनानि माधवापरार्कहेमाद्र्यादिषु द्रष्टव्यानि सर्वासु संक्रान्ति

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ओम्

नि० सि०
२

युदानविशेषो हेमाद्रौ दानखंडे उक्तः। भविष्ये विश्वामित्रः मेषसंक्रमणे भानोर्मेषदानं महाफलं वृषसंक्रमणे
दानं गवां प्रोक्तं तथैव च वस्त्रान्नपानदानानि मिथुने विहितानि वै घृतधेनुप्रदानं तु कर्कटेपि विशिष्यते
सछत्रं स्वर्णदानं च सिंहेपि विहितं सदा कन्याप्रवेशे वस्त्राणां वेश्मनां दानमेव च तुलाप्रवेशे तिलानां गो धान्यानां=
रसानामपीष्टदं अत्र की चलिते भानौ दीपदानं महाफलं अत्र कीटो वृश्चिकः धनुःप्रवेशे वस्त्राणां यानानां
च महाफलं मृगप्रवेशे दारूणां दानमग्नेस्तथैव च कुंभप्रवेशे दानं तु गवामंबुतृणस्य च मीनप्रवेशे स्ना
नानां माल्यानामपि चोत्तमं अत्रोपवासमाह हेमाद्रावापस्तंबः अयने विषुवे चैव त्रिरात्रोपोषितो नरः
स्नात्वा यस्त्वर्चयेद्भानुं सर्वकामफलं लभेत् अशक्तौ तु वसिष्ठः अयने संक्रमे चैव ग्रहणे चंद्रसूर्ययोः अ
होरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते अत्रोपवासः संक्रांतिदिने दानादिस्तु पुण्यकाले इति न इत्याचार्यचू
डामणिः विधिलाघवात्तु पुण्यकालदिने एवोभयमिति वृद्धाः इदं च पुत्रिगृहस्थातिरिक्तविषयं आदि
त्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः उपवासो न कर्तव्यः पुत्रिणा गृहिणा सदेति जैमिनिवचनात् अत्र
श्राद्धमुक्तं हेमाद्रौ विष्णुधर्मे श्राद्धं संक्रमणे भानोः प्रशस्तं पृथिवीपते अपरार्के विष्णुः आदित्यसंक्र
चैव मं विषुवं चायनद्वयं जन्मभमभ्युदं च एतांस्तु श्राद्धकालान्वै काम्यानाह प्रजापतिरिति द्वादशादि
दिनैरर्वागयनांशप्रवृत्तावपि पूर्ववत्क्रमयनग्रहणं अन्यथा संक्रमेण सिद्धे अयनग्रहणं व्यर्थं स्यादि रामः

५ २

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

कं च श्राद्धं चापरपक्षिकं मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चेति स्मृतिचंद्रिकोक्तेः तैर्थिक तीर्थश्राद्धं तच्च
मासद्वयेपि कार्यमिति त्रिस्थलीसेतौ भट्टाः केचित्तु प्रतिमासं मृताहे च श्राद्धं प्रतिवत्सरं मन्वादौ च युगा
दौ च तन्मासउभयोरपीति मरीचिवचनात् वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि मासद्वयेपि तत्कु
र्याद्व्याघ्रस्य वचनेयपीति गालवोक्तेश्च प्रत्याब्दिकं मासद्वये कार्यमित्याहुः तन्तुच्छं प्रतिमासं मृताहे क्रिय
माणं मासिकं मासद्वये प्रतिसंवत्सरं क्रियमाणं कल्पादि श्राद्धमिति मरीचिवचसो मदनरत्ने व्याख्या
नात् गालवीयस्य च मासद्वयात्मके त्वयमासइति माधवेन व्याख्यानात् यत्तु केचिदुक्तं प्रथमाब्दि
कं मासद्वये कार्यं श्राद्धिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे त्रयोदशे च संप्राप्ते कुर्वीत पुनराब्दिकं
मिति यमोक्तेः तदपि चिंत्यं पुनराब्दिकं द्वितीयादिवार्षिकं त्रयोदशेतीते च तद्देशे कुर्यात् अन्यथा सं
वत्सरं न वर्द्धेत श्राद्धं तत्र मृतेहनीति पैठीनसि विरोधः स्यादिति हेमाद्रौ पृथ्वीचंद्रोदये च । एतेन वर्द्धे
तन्न छिद्यात् छुद्ध्येपि कुर्यादेवेत्यनंतभट्टव्याख्यानानावात्परास्ता । पूर्वव्याख्यायां तु तारातीये प्रथमग्र
हणमेव मानं यदपि निर्णयामृते पूर्वोक्तकालादर्शवचनान्मलमासे श्राद्धं दिनस्य वंध्यत्वनिरासा
र्थं पित्रुद्देशेन ब्राह्मणान् भोजयित्वा शुद्धमासे सपिंडकं श्राद्धं कुर्यात् पिंडवर्जमसंक्रांते संक्रांतौ पिं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ओं

द्रसंयुते प्रतिसंवत्सरं श्राद्धमेवं मासद्वयेपि चेति वृद्धप्रचारोक्तेरिति तदपि चिंत्यं पूर्वोक्तवचनस्यद
र्शपूर्वमा व्यधिकमासविषयत्वात् तत्र हि मासद्वयश्राद्धमुक्तं तद्वाह सत्यव्रतः एकएव यदा मासः संक्रां-
तिद्वयसंयुतः मासद्वयगतं श्राद्धं मलमासेपि शस्यते इति मासद्वयगतं पूर्वसंक्रांतगतं द्वयगतेच
मलमासे द्वयमासेऽपि शब्दात्पूर्वाधिमासे चेति हेमाद्रिः दीपिकापि तस्मात्कृसंग्यधिमासको यदि भ
वेत्तत्रत्यसांवत्सरं तस्मिन्नुद्भुतयोर्द्वयेच वचनात् कुर्याद्वयोः कोविद इति कालादर्शोप्येतद्विषयएवेत्य
लं बहुना मलमासे वर्ज्यान्युक्तानि कालादर्शे अनित्यमनिमित्तं च दानं च महदादिकं अ न्याधानाध्व
रपूर्वतीर्थयात्रामरेक्षणं देवारामतडागादिप्रतिष्ठा मौंजिबंधनं आश्रमस्वीकृतिः काम्यवृषोत्सर्ग
श्च निष्क्रमः राज्याभिषेकः प्रथमश्चूडाकर्म व्रतानि च अन्नप्राशनमारंभो गृहाणां च प्रवेशनं स्नानं वि
वाहो नामानि पन्नं देवमहोत्सवः व्रतारंभसमाप्ती च कर्म काम्यं च याजनं प्रायश्चित्तं च सर्वे स्युर्मल
मासे विवर्जयेत् उपाकर्मोत्सर्जनं च पवित्रं दमनार्पणं अवरोहश्च हेमंतः सर्पाणां बलिरष्टकाः ईशान
स्य बलिर्विष्णोः शयनं परिवर्त्तनं दुर्गेंद्रस्थापनोत्थाने ध्वजोत्थानं च वज्रिणः पूर्ववत्प्रतिषिद्धानि पर
ज्ञान्यन्नं च दैविकमिति अत्रमूलवचनानि हेमाद्रिमाधवादिभ्योज्ञेयानि दिवोदासीयेपि यात्रोत्सवं

च

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

259

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

260

पा॰ मा॰ र्थः पार्वणैकोद्दिष्टयोः सन्निपाते जाबालिः यद्येकत्र भवेतां चेदेकोद्दिष्टं च पार्वणं पा
३३८ र्वणं त्वभिनिर्वर्त्यैकोद्दिष्टं समाचरेदिति अनेकनिमित्तसन्निपाते निमित्तानु
क्रमेण श्राद्धं कुर्यात् तथा च कात्यायनः एवं हि निमित्तानि जायेरन्नेकवासरे
नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमादिति यद्यप्येकदेवताकश्राद्धद्वय
मेकस्मिन्नहनि न युक्तं एकानुष्ठानेनैवेतरप्रयोजनस्यापि प्रसंगात्सिद्धिः तथापि
नैमित्तिकानि वचनबलादनेकान्यप्यनुष्ठेयानि तथा च जाबालिः श्राद्धं कृत्वा
तु तस्यैव पुनः श्राद्धं न तद्दिने नैमित्तिकं तु कर्त्तव्यं निमित्तानुक्रमोदयमिति
नित्यकाम्ययोरेकदेवताकयोः सन्निपाते काम्येनैव नित्यस्य सिद्धिः तदु
क्तं स्मृतिसंग्रहे काम्यतन्त्रेण नित्यस्य तन्त्रं श्राद्धस्य सिध्यतीति इति श्रीमहारा
जाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक श्रीवीरबुक्कणभूपालसाम्राज्यधुरंध पा म
रस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां तृतीयोऽध्यायः ३३८
३ समाप्तोयमध्यायः संवत् १९२२ वैशाखवदि ३ भौमे गोविंदरामाकरोल्लि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ ॐ चं॰ प्र॰ शुक्केलपत्येतेधिकमासकः अतीताधिमासाद्दारभ्य द्वात्रिंशन्निर्गतैर्मासैरित्यादि सर्वं ज्ञेयम् यदात्वेकस्मिन्नपि 261
१२९ वर्षेऽश्विनादिषट्के संक्रांतिरहितं मासद्वयं स्यात् तदा प्राकृतस्य चैत्रः पूर्वस्मादधिमासं तत्त्वेतरः इत्ययमेव
निर्णयः चैत्रादिषट्के इत्यधिमासद्वयं न भवेदेव तस्य मासो भयपार्श्वद्दृत्तित्वात् द्वयस्यतु कार्त्तिकादित्रयेनिय दृष
मस्योक्तत्वात् अतीतेः संक्रांतस्य संसर्पक इति द्विसंक्रांतस्यांहस्पतिरिति संज्ञा एतयोर्नामांतरं च तदुक्त
म् दर्शद्वयं यदेकस्मिन्मेषोरेसंसर्पको भवेत् अंहस्पतिर्यदेकस्मिंश्चांद्रे द्वौ संक्रमौ तदा संसर्पांहस्पती
चेति द्विविधावधिमासकौ मासौ पूर्वापरौ दुष्टौ परपूर्वौ शुभाविति अत्राधिमासशब्देन मलमासवचने २X
उपचारात् यद्येकस्मिन्वर्षेऽसंक्रांतो मासः संक्रांतिद्वययुतो मासश्च तदा विवाहादिप्रसिद्धमंगलका
मे सुत्रयोपितदाद्याः संसर्पांहस्पती अधिमासश्च प्रयत्नतो वर्ज्याः द्वयाधिकमासो तु श्रौतस्मार्तकार्मेष्वा
प्यतिनिंदितो द्वयोरंहस्पतु नित्यत्वेन कालमलरूपत्वात् अंहस्पम लत्वादधिकमासस्य कालाधिक्येना २X
निंदि पिंदितत्वात् तेषां च श्रौतानाद्वोपविचः कालाधिक्याभावात् स तु मासः पवित्रः स्यादिति वचनात् तथा
च बृहस्पतिप्रोक्ते ज्योतिःशास्त्रे यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा संसर्पांहस्पतीमासावधिमा
सश्च निंदिताइति यद्वर्षमध्येधिकमासयुग्मं तत्कार्त्तिकादित्रितये त्वयाख्ये मासत्रयेन्यात्स्वमिदं प्रयत्ना
द्विवाहयज्ञोत्सवमंगलेष्विति नन्वेवं चैत्रादद्वौ ज्ञाधिमास इत्यादि वचनविरोध इतिचेन्नैवम् तद्वा
क्यस्याधिक्यं न भवतीति तद्विषयस्य निश्चितत्वात् अत्राधिमासनिषेधानंगीकारात् अंगीकारे मा
(स कन्यागते भानावसंक्रांतो भवेद्यदि दैवं पित्र्यं तदा कर्म तुलास्थे कर्त्तुरव्ययमिति ज्योतिःपिताम ह

26R

धिकमिति अतः पूर्वोधिमासः शुद्धमासस्तु द्वादश एव जाबालिः एकस्मिन्नपि वर्षे चद्वौ मासावधिमासकौ पूर्वोमा
सः प्रथमः स्यादपरस्त्वधिमासक इति अत्र पूर्वोधिमासादारभ्य द्वात्रिंशन्मासादर्वाग्यः पूर्वोऽसंक्रान्तो मासः श
शुद्धो नाधिमासः द्वात्रिंशादूर्ध्वं यः संक्रान्तिहीनः सोधिमासो न शुद्धः वर्षमध्ये धिमासद्वयमिति यत्तु पूर्वं स्याप्यधि
मासाभिधानं तत्संक्रान्तिरहितत्वेन तत्तत्कर्मानर्हत्वात् यदापि काऽऽद्ये मासस्त्रिंशत्तमो भवेदिति काठकगृह्ये वि
राट्पर्वणि वत्सरपोक्रमम् पंचमे पंचमे वर्षे द्वौ मासावधिमासकौ तेषां कालातिरेकेण ग्रहाणामतिचारत इति
न देतत्सर्वं माश्विनादिषट्के संक्रान्तिशून्य एकोधिमासः चैत्रादिषट्के वान्यः तदा द्वात्रिंशन्मासादर्वागपि भवन्
पूर्वोनन्तरस्तु भवेत् ब्रह्मसिद्धान्ते चैत्रादर्वाग्यधिमासः परतस्त्वधिको भवेत् द्वाशाहि सर्वेशास्त्रे श्रुतास्मृते
त्रिस्त्रयोदशी तस्मिन्निति तरस्मिन् चैत्रादर्वागित्याश्विनादारभ्य ज्ञेयम् ज्योतिःसिद्धान्ते धटकन्यागते सूर्ये
वृश्चिके च चापे च द्विति मकरे वाथ कुंभे वा नाधिमासोऽभिधीयते तस्मात्त्रयोदश एव मासः त्रयोदशो तत्रशु
नियत् मासस्त्वतु दशः कापि न चापि दृष्टः अयं चान्द्रेण नक्षत्रेरद्वुति तथा अस्ति त्रयोदशो मासः सच शुक्ला
निगद्यते अयं चान्द्रेण नक्षत्रेः स्यान्नास्ति सौरस्त्वत्रदश इति अथायं कदा भवतीति विचार्यते त्रिंशन्मासादूर्ध्व
द्वात्रिंशन्मासात् पूर्वं भवतीति नियमः ज्योतिःसारे पि त्रिंशन्मद्वात्रिंशमासस्य वा स्याभ्यन्तरयोर्द्वयोः अधिमासो हि क
ल्पेत बादरायणकीर्तितः मासे त्रिंशत्तमे भवेदिति काठकपरिग्रह्ये विराट्पर्वणि पंचमे पंचमे इत्यादिसर्वे
पंचत्रिंशन्मासादूर्ध्वं त्रिंशन्मासादर्वाक् मलमासो न भवतीत्येवं परं ज्ञेयम् अतस्त्रिंशत्तमो भवेदिति न त
त्त्वम् वासिष्ठसिद्धान्तेन सूक्ष्मतयोक्तम् तद्यथा द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा घटिकानां च

१३

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

बृं० भा०
९१

वाक्येकदेशमनूद्य व्याख्यातमवगम्यते इत्याशंक्याह मूलरूपं वेति जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति कामय
मानस्य सर्वथैव वा सो जायादिषु यदा न संपद्यते तदा ध्यात्मजायादिसंपत्तिं दर्शयति एतच्चास्य लिंगं मन एवादि आत्मत्वा
द्यभिमानस्यात्मानुकार्यत्वाद्यथा च वा स्वकामित्वलाभस्तथा मनोरथविजृंभितां कामनीं पश्चज्ञानोऽच्च प्रसिद्धस्त्वद्दयम
पीत्यर्थः तेषां च कर्मणां फलं संसारापत्तिरेवेत्यपि न चैवं दर्शितमित्याह तथा चेति एवं संसाराणुपत्त्यादि दर्शयते देवा
नांकृत्तस्कन्दे दक्षे पूर्णमासो वा जीर्णस्त्वस्य भोगसाधना निमनो वा कारणं लक्षणं निपञ्चषर्थ मेकं तत्त्यपदइति सूत्र

अनयोश्च निषद्ययोर्विभागो मंत्रप्रदर्शितयोर्वेदद्वारण एकैकोपि प्रदर्शितः सो कामयत जाया मे स्या
दित्यादिनाऽत्रस्य कर्माणीति मन एवात्मा वागूजायेत्यादि वचनात्तु अन्तश्चेकामित्वं चानिभूज्ञमव
गम्यते तथा च तत्फलसंभवान्नसंगीले ध्यात्मभावेपि नात्मस्वरूपावस्थानं जायाद्येषणात्रयसन्या
सेन वात्मविदां कर्मनिष्ठा प्राप्ति कुर्य्येनात्मस्वरूपनिष्ठेव दर्शिता किं प्रजया करिष्यामो येषां नो
यमात्मायं लोक इत्यादिना येनाज्ञाननिष्ठाः संन्यासिन स्ते मोक्षभूयो नामेत्यादिनाऽविद्यन्निर्दाहारे
णात्मनो याथात्म्यसपर्य्यगादित्येन दंतेर्मच्चेरूपादिष्टं तेषु चाधिकृता न कामिनइति तथा च स्वेनात्त्व

दर्शितः श्रुत्यायं स्त्रानात्रानिमेध साम पसानन यस्थितेत्यादिना श्रेत्रेकैको यजमान एव विहितः प्रतिषिद्धज्ञानकर्म
णु श्थ नात्सर्वस्य संसारस्य सा ह्यात्मा रं पयोभ्यां जनकत्वाद्भिनोच्यते तेषु च स एवैष सूत्रेषु तस्य पितुरहमिदमस्म्येदमिदमित्यात्म
त्वाध्यासेनमनआदिषुवितरेषु च संबंधाध्यासेनावस्थानं संसारः प्रसिद्ध इत्यर्थः एवं मंत्रप्रदर्शिते निष्ठाद्वये द्वा ललएासं
मतिं प्रकरणविभागं दर्शयति ये तु ज्ञाननिष्ठा इत्यादिना ग्रन्थात्राम्नि अमित्य इत्युक्तमात्रमित्य इत्यर्थः ॥ =

263

CC-0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ चं० ९१ ईशा० टी० ९

264

साध्यसाधनभेदोपमर्देन यदात्मैकत्वविज्ञानं यस्मिन्सर्वाणि भूतान्यात्मैवाभूदित्यवधारणेनोक्तं पूर्वार्द्धेनोत्तरार्द्धेन च संसार
निवृत्तिफलमुक्तं तत्र यथोक्तेन स्यात्तेन केनचित्कर्मणाम्बद्धः समुच्चिचीषति अंधं तम इत्यादौ तु समुच्चिचीषयाऽविद्वद
र्शितं दाहृद्यपते नतः कामत्मतगृह्णात्मस्यपस्यति कस्यतर्हि ज्ञानस्य कर्मसमुच्चयः संभवतीत्यतुच्यते यदैवं वित्तमिति
मयवोक्तं भास्करेण गावस्थमिम्मंतं देवतविद्यायाः प्रक्रांतत्वात् तस्या एव समुच्चिचीषया निर्देश्यते इति तदसत् हि
प्रकृतमिमेनावताभव ध्यते किंतु संबंधयोग्यं मुक्त्वा त्वात्मैकत्वविद्यायाश्च कर्तृत्वाद्यध्यासोपमर्दकत्वात्कालिकर्मसंबं

येतु कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते अंधं तम इत्यादिकं कथं पुनरेवमवगम्य
तेन तु सर्वेषामित्युच्यते ऽप्रकामिनः साध्यसाधनभेदोपमर्देन यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजा
नतः तत्र को मोहः कः शोक एकत्वमनुपश्यतः यदात्मैकत्वविज्ञानं तन्न केनचित्कर्मणा सगुणविद्यया
ज्ञानांतरेण वा सम्बद्धः समुच्चिचीषति इह तु समुच्चिचीषयाऽविद्वदादिनिंदा क्रियते तत्र च यस्य येन स
मुच्चयः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते यद्दैवं वित्तं देवताविषयज्ञानं कर्मसंबंधित्वेनोपन्य
स्तं न परमात्मज्ञानं विद्यया देवलोक इति पृथक्फलश्रवणात् योग्यता किंच यस्मिन्नित्युक्तेऽपि फलस्याव्यवधानं
संभाव्यते न तु सैव सहकारिसमुच्चये इष्यते दृष्टे हि एकत्वमनुपश्यतः को मोहः कः शोक इत्येकत्वदर्शनसमकालमेव
मोहादिनिवृत्त्यभिधानात् कालांतरीयं फलं ततो न सहकारिसमुच्चिचीषा किंच ब्राह्मणा विविदिषंति यज्ञेनेत्यादौ न जीवया श्रु
त्यापस्तादेरिष्या मार्गाव इत्यनेन करणत्वेन संबंधः प्रतीयते तत्कथं दुर्बलेन प्रकरणेन सहकारितया संबंधः प्रकल्प्यते प्रधान
स्य विद्यायाः सहकारिसंबंधविधित्सया भिन्नं दंश्यप्यप्युक्तमत एवाग्नीधनाद्यनपेक्षेति सूत्रविरोधश्च समुच्चयपक्षपरेणापि

२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ वं ८९

निरतिशयानंदस्वरूपमनरएवदुःखासंस्पृष्टमात्मानमजानतः शोको भवति हा हतोहं न मे पुत्रो जिन मे क्षेत्रमिति ततः पु-
त्रादीन् कामयते तदर्थं दीनतया धनादि चिकीर्षति न तु आत्मैकत्वं पश्यतः तदेतन्वयव्यतिरेकाभ्यां शोकादेरविद्याकार्यत्वं

[illegible] ानि [illegible]

इममेवार्थं मन्त्रो विमत्र्याह । यस्मिन् सर्वाणि भूतानि यस्मिन् काले यथोक्तात्मनि वा तान्येव भूतानि स
र्वाणि परमार्थात्मदर्शनादात्मैवाभूदात्मैव संवृत्तः परमार्थवस्तुविज्ञानतः तत्र तस्मिन् काले तत्र वात्म
नि वा को मोहः कः शोकः शोकश्च मोहश्च कामकर्मबीजमजानतो भवति न चैकत्वमेकात्म्यमनुविशुद्धं
गगनोपमं पश्यतः को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेण सम्भवप्रदर्शनात् स
कारणस्यासंसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति योयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्ष

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनु
पश्यतः ॥ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्

ण इत्याह अयं मन्त्रः स पर्यगात् स यथोक्त आत्मा परि समन्तात् अगात् गतवान् आकाशवद्व्यापीत्यर्थः शुक्रं शुद्धं
ज्योतिष्मद्दीप्तिमानित्यर्थः अकायम् अशरीरं लिङ्गशरीरविवर्जित इत्यर्थः अव्रणम् अक्षतम् अस्नाविरं स्ना
वाः शिरा यस्मिन्न विद्यन्ते इत्यस्नाविरम् अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः शुद्धं निर्मलमविद्या
मलरहितमिति कारणशरीरप्रतिषेधः अपापविद्धं धर्माधर्मादिपापवर्जितं शुक्रमित्यादीनि वचां
सि पुल्लिङ्गत्वेन परिणेयानि स पर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना पुल्लिङ्गत्वेनोपसंहारात् ॥८॥

[illegible] प्येलन्ययं

त्वं किंच विद्याया [illegible] नि वज्जो [illegible] इति गतं तिकी निवृत्तिर्विद्याफलत्वेन विवक्षितात्ययमात्रस्य मुमुक्षोरपि भावादि
त्याह शोकश्च मोहश्च इत्यादि ॥८॥

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ई०१ ८

ॐ चं०१ ९९

...ीं दर्शयं परवृत्तमनुवदति अत्राद्येनेति यदुक्तं भास्करेण सर्वोप्युपनिषदेकं ब्रह्मविद्याप्रक-
...एकं करणमेदकरणमनुचितमिति तदसत् प्राणाद्युपासनाविधानस्याप्युपनिषत्सु दर्शनात् न चैतदपि
ब्रह्मज्ञानांगमिति वाच्यं पृथक्फलश्रवणात् नेनोपि व्याकृताव्याकृतोपासनसमुच्चयविधानस्य प्रकरणा-

कविः क्रान्तदर्शी सर्वदृक् नान्योतोस्ति द्रष्टा इति श्रुतेः मनीषी मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः
परिभूः सर्वेषामुपर्युपरि भवतीति परिभूः स्वयंभूः स्वयमेव भवतीति स्वयंभूः स निगमनुक्तईश्वरो
याथातथ्यतः सर्वज्ञत्वाद्यथातथाभावो याथातथ्यं यथाभूतकर्मफलसाधनतः अर्थान्कर्तव्यपदा

येषामुपरि भवति यः सोपरि भवतीति स सर्वः स्वयमेव भवतीति २

कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः

र्थान् व्यदधात् विहितवानित्यर्थात् यथानुरूपं व्यभजदित्यर्थः शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः
प्रजाभ्यः प्रजापतिभ्य इत्यर्थः अत्राद्येन मंत्रेण सर्वेषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः
ईशावास्यमिदं सर्वं यत्किंचित् जगत्यां जगत् मा गृधः कस्यस्विद्धनमिति अज्ञानां जिजीविषूणां ज्ञा-
ननिष्ठासंभवे कुर्वन्नेवेह कर्माणि जिजीविषेदिति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः ॥८॥८॥

भेदेनैवैकत्वात् व्याकृताव्याकृतोपासनस्य प्रक्रांतत्वात् तस्माद्यथा कर्मकांडे अग्निहोत्रादिकं प्रकरणं भेदेनैवैषयतेभि-
न्नाधिकारत्वात् तेन तत्कर्मणस्तथोपनिषत्स्वपि भिन्नाधिकारत्वात्कर्माविरुद्धं तद्भिन्नं विद्याप्रकरणभेदेन विरु-
धनेनैवार्थवादस्तत्र संमतिं दर्शयितुं पक्षमतेऽन्यथा पोश्रेत्यादिना ॥८॥

रा० स०
८

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

चं०प्र० तत्रश्राद्धादिकृत्येपितृणामत्यन्ततृप्तिकरंभवति तदुक्तंशंखेन अमावास्यातुसोमेनसप्तमीचैवभानुना चतुर्थीभूमिपु
९२ त्रेणसोमपुत्रेणचाष्टमी चतस्रस्तिथयस्त्वेताःसूर्यग्रहणसन्निभाः स्नानेदानेतथाश्राद्धेसर्वंतत्राक्षयंभवेदिति फाल्गुना
ममावे॥लिंगपुराणेफाल्गुनतिथिप्रक्रमेविशेषउक्तः अमायांकिलसंपूर्णायोद्योगिन्वोल्ललणस्तथा मांसोदनैःपूलिकाभिःपू
ज्यश्चात्मातथावांधवाइति महाभारते अमावास्यायदासोमभानोचगुरुवासरे तत्पर्वपुष्करंनाम सूर्यपर्वशताधिकम् अत्रा
पिश्राद्धादिप्रशस्ततरम् मंदेचार्केपुरोवापिवारेष्वेतेषुचेतकी अत्राश्वमेधजंपुण्यंस्वर्गस्नानभ्यतेनरैरिति चेतकीअमावा।
स्या इतिप्रतिपदादौअमावास्यानिर्णयः॥ दुर्गाद्युपाध्यायपदाभिधस्यपुत्रेणश्रीचंद्रमसाकृतेस्मिन् चंद्रप्रकाशेसुनि
बंधमोत्तौविनिर्णयोदर्शतिथेस्तारि॥ ॥अथपुण्यकालप्रसंगान्महाव्यतीपातादिलक्षणमुच्यते तत्रगार्ग्यः पंचान
नस्थोगुरुस्तथामिथुनेभौमेबेरविःस्याद्यदिपुष्करपदे मोसाभिधानाकरमेनयुक्तामहाव्यतीपातइतीहयोगइति पंचान
नःसिंहः माषाभिधानाद्वादशी करभंहस्तः अस्मिन्दिनेगोकुहिरण्यवस्त्रदानेनसर्वंपरिहायपापम् सुरत्वमिंद्रत्व
मनामयत्वंमर्त्याधिपत्वंलभतेमनुष्यइति अमावास्याव्यतीपातेपौर्णमास्यष्टकासुच विद्वान्श्राद्धमकुर्वाणःप्राय
श्चित्तीभवेद्विजइत्यनेनात्रश्राद्धस्यावश्यकतोक्ता अथान्योव्यतीपातः कालादर्शेमहाभारतेचोक्तः रविवारसमेतायां
ममायांयदिवासवः वैष्णवंवार्दमाहेयमाश्विनंवाभवेदुड योगस्मिन्स्याद्व्यतीपातःशनार्कग्रहसन्निभइति आहेय
मश्लेषा महाभारतेपुनस्तदुक्तम् श्रवणाश्विधनिष्ठार्द्रानागदैवतमाप्युते रविवारयुतामायांव्यतीपातःसउच्यते एषां
तत्कालव्यापित्वंमन्वादिनिर्णयेप्रोक्तं यदाहवृद्धगार्ग्यः अल्पप्रवारयोगार्द्धेकेवलेविहितंव्रतम् तद्दर्शवारयोरेव
कुर्यान्नैवेतरेतिथौइति व्रतंचश्राद्धंविहितम् वारएवकृतएवअल्पप्रयोगविहितं योगकृतं तत्रैवकुर्यादितिसिद्धंतः
अमावास्यान्वेपिभ्ययोगाःकथिताःशंखः यदाविष्टिर्व्यतीपातेभानुवारेणसंयुता पद्मकंनामतत्प्रोक्तंमघोनाचचतुर्गु
णं किंचविशाखासुयदाभानुःकृत्तिकासुचचंद्रमाः सयोगःपद्मकोनामपुष्करेष्वतिदुर्लभइतिपद्मपुराणेच मंदा
व्रतेदेवकर्मपित्र्यकर्मचतत्का॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ख्यो योग उच्यते तदुक्तं महाभारते अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः अर्द्धोदयः स विज्ञेयः सहस्रार्कग्रहैः
समः दिवैव योगः शस्तोयं न तु रात्रौ कदाचनेति तथा च स्कंदपुराणे अर्द्धोदये तु संप्राप्ते सर्वं गंगासमं जलम् शुद्धात्मा
नो द्विजाः सर्वे भवेयुर्ब्रह्मसन्निभाः यत्किंचित् क्रियते दानं तद्दानं मेरुसन्निभमिति तथात्रैव दानादौ विशेष उक्तः
चतुःषष्टिपलैः कांस्यपात्रं कृत्वा गुडैः स्मृतम् चत्वारिंशत्पलं मध्यं जघन्यं पंचविंशतिः निधाय पायसं तत्र पद्ममष्टदलं
लिखेत् पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकम् तदभावे तदर्धं वा तदर्धं वापि शक्तितः कृत्वा तु तंदुलैः अष्टदलप
द्मस्य दलेष्वमन्त्रं अमन्त्रं स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकम् तेषां प्रीतिकराणीयं श्वेतमाल्योपशोभिनैः वस्त्रा
दिभिरलंकृत्य ब्राह्मणाय निवेदयेत् तद्दानमंत्रश्च सुवर्णपात्रं सामत्रं तस्माद्देतद्ददाम्यहम् आवयोस्तारकं य
स्मात्तु गृहाण द्विजोत्तमेति आवयोस्तारकमिति प्रतिग्रहे दोषाभाव उक्तः सप्तद्वीपे सवना पृथ्वी सम्प्रदाने स्य यत्फ
लम् तत्फलं समवाप्नोति कृत्वैतद्दानमुत्तममिति॥ इत्यर्द्धोदयदानविधिः॥ ॥ या काचिदमावास्या श्रवणा
श्विनीधनिष्ठार्द्रामृगशीर्षेण नक्षत्राणामन्यतमेन रविवारेण युक्ता चेत्तदा व्यतीपाताख्योऽलभ्ययोगो भवति
तत्र कृतं दानादि कोटिगुणं भवति तदुक्तं भविष्ये श्रवणाश्विधनिष्ठार्द्रामृगशिरोन नक्षत्राणामन्यतमेन रवि
वारेण युक्ता चेद्दमावास्या तदा व्यतीपात इति तत्र दत्तं हुतं जप्तं सर्वं कोटिगुणं भवेत् सुवर्णं च प्रदातव्यं कांस्यपात्रं सपा
यसमिति किंच अमावास्या यदा मैत्रविशाखास्वातियोगिनी श्राद्धे पितृगणास्तृप्तिं प्रयान्ति पितरोर्चिता इति ग्रन्था
न्तरे सोमे गुरौ भूमिसुते च दर्शो बुधे च जीवे निधिरष्टमी चेत् भौमे चतुर्थी च चतुर्दशी च सप्तम्यथार्के रविपर्वतुल्याः इ
ति किंच आर्द्रात्रयं त्र्यं त्वाष्ट्राः दर्शाद्यदशायत्र च अस्मिन्काले न्म्ययोगे नु संतृप्ताः पितरोर्चिताः किंच फाल्गुनस्य
दर्शे धनिष्ठादित्रयं भवेत् तदा पितॄणां श्राद्धे न तृप्तिः साहस्रवार्षिकी सोमवारे मावास्या सूर्यग्रहणसमा स्मृता।
तदा प्रोक्ता वार्षिकीम् आप्नुप
नं स्नानानामामायां तदा

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

कारेणेति मंत्रो यथा प्रजापते त्वा हिंकारेणावजिघ्रामि सहस्रायुषासौ जीव शरदः शतम्
सर्वो धोयम् इति णकर्णजपे पारस्करः इति पोस्य कर्णेजपति अस्मे प्रयंधीति
अस्मे प्रयंधि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः अस्मे शतं शरदो जीवसे
दा अस्मे वीरांछश्वत इंद्र शिप्रिन् अस्यार्थः हे मघवन् इंद्र किंभूत ऋजीषिन् य
ज्ञोपयुक्त शेषभागिन् अस्मे पुत्राय रायो द्रव्यं तथा भूरेः भूरि सुवर्णं प्रयंधि प्रय
च्छ किंभूतस्य विश्ववारस्य विश्वे देवाः कांक्षितस्य यथा विश्वेदेवाः प्रयंधि प्रयच्छ अ
स्मे यावद्देवदेवत्तानं परिकल्पयेदित्यर्थः तथा हे इंद्र किंभूत शिप्रिन् जलयुक्त किंचास्मे पु
त्राय शरदः शतं प्रयंधि प्रयच्छ अस्मे पुत्राय वीरान् वीर्ययुक्त संततिं प्रयच्छ किंभूतान् श
श्वतः किंभूतान् दीर्घायुषः इति यावत् हे मघवन् इंद्र इति संबोधनद्वयं आदरा
तिशयप्राप्त्यर्थं अस्मे इति प्राप्ते छांदसत्वादस्मे इति प्रयंधीति यमंपरमोलोटि सिपूर्व रु
लं छंदसीति सिलोपे तत्र पक्षे ऋजीषसोमशेषसोमे कल्क समकृते इत्यृजीषकं भंजाव
यतीति कात्यायनवचनात् राय इति द्वितीयार्थे षष्ठी विश्वैर्वत्त इति विश्ववारः छांदः शिवः
१६३
(गवांत्वा हिंकारेणावजिघ्रामि ~~[illegible]~~ सहस्रायु ~~[illegible]~~ षासौ शरदः शतं अ
स्यार्थः असौ हे अमुक नामात्मक पुत्र कतां त्वामभिजिघ्रामि मूर्द्धि चुम्बामि अहं पिता तत्र यति तेन गवांहिंकारेण यथा गावो
वनादागताः स्ववत्सकानाभिमुख्येनाभिजिघ्रन्ते वमहमपि पिता त्वामभिजिघ्रामि किंच सहस्रायुषा विस्तारेणायुषा शरदः शतं

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गृहान् ४२ आहूताः ४६ किंभूतान् अस्मान् जानतः अस्मिन् गृहविषये अस्माभिर्ज्ञा
विषयान् अस्मान् ४४

तानुपह्वयामहे ते नो जानन्तु जानतः अस्यार्थः येषां गृहाणां प्रवसन् प्रवासी अध्येति
स्मरति यान्सु स्वगृहेषु तया प्रवासी स्मरति येषु गृहेषु सौमनसो बहुप्रकारं सौमनस्यं
मनोनिर्वृत्तं भवति तान् गृहान् उपह्वयामहे वयं आह्वयामः ते च गृहा आहूताः सन्तो
नोऽस्मान् जानन्तु प्रवासात्समागतान् जानन्त्वित्यर्थः ॥ उपहूता इह गाव उपहूता अ
जावयः अथो अन्नस्य कीलाल उपहूतो गृहेषु नः अस्यार्थः इह नोऽस्माकं गृहेषु गाव उ
पहूतास्तथा अजावयः छागा मेषाश्च उपहूताः प्रवासं कृत्वा समागतैरस्माभिर्गोवत्साजनि
प्रभृतयः कुशलप्रतिसंधानार्थमाहूता इत्यर्थः अथानन्तरं अन्नस्य कीलालो रस उपहू
आ तस्पहूतः गोवत्साजादीनामाह्वानानन्तरं गृहस्थावास्थितमिष्टान्नरसपानादिकमयभो
गायास्मभिः आहूता इति यावत् गृहप्रवेशे पारस्करः क्षेमाय व इति प्रविशति तत्र
मंत्रः क्षेमाय वः शान्त्यै प्रपद्ये शि[illegible]वꣳ शग्मꣳ शंयोः शंयोः सर्वसगमम् पुत्रदर्शने
पारस्करः पुत्रं दृष्ट्वा जपति अङ्गादङ्गात्संभवसीति अस्य व्याख्यानं पूर्वमेव कृतम्
पुत्रमूर्ध्नि घ्राणे पारस्करः अथास्य मूर्द्धानमवजिघ्रति प्रजापतेष्ट्वा हिंकारेण गवां हिं
त्वाध ५१

अस्यार्थः हे गृहा वो युष्मान् क्षेमाय अविनाशाय प्रपद्ये प्रविशामि न केवलं क्षेमाय अपि च शान्त्यै सर्वोपद्रवान्त्यर्थं च तथा शंयोः सुखकाम्येन शांशिवं शग्मं
य प्रं छुस्वेति ~~पुत्रदर्शने~~ ४३

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

त्त्वार्चयेद्दवि भित्तिस्थकारिकां लिखित्वा तत्रैव भाद्रपदे मासे इति आख्यायते तत्र प्रमाणं वा
राहं नैस्य शुक्लपक्षद्वितिलिखितं तत्सर्वं धर्मादिकमेव भाद्रशुक्लपक्षे रोहिणीव्यतीपात
योः सर्वं पार्वकाल अपकथा हे मार्कंडेय विक्रांत उवाच रूपसेपद मारोग्यं संततिंचा
भिपुष्कलां प्राप्नुवंति तेन रायेन नियत्नेन ह्रदस्वमे· अगस्त्य उवाच साधुसाधु महाप्राज्ञ यस्त
श्रोहं त्वया नय तत्सर्वं कथयिष्यामि तव श्रेयो भविष्यति श्रणु पार्थ प्रवक्ष्यामि स्वर्गमोक्ष प्र
दं नृणां यच्च गुह्यं पुरा राजन् ब्रह्मरुद्रेंद्रदेवतैः असुराणां च सर्वेषां राक्षसानां तथैव च शं
करेण पुरा चैव षण्मुखाय निवेदितं षण्मुखेन समाख्यातं महापातकनाशनं यत्कृत्वा
ब्रह्महा गोघ्न सुरापो गुरुतल्पगः अगारदाही गरदः सर्वपापरतोपि वा मुच्यते सर्वपापेभ्यः
स्वर्गलोके च गच्छति यच्च पुण्यं पवित्रं च नृणां मङ्गलनाशनं उपकाराय लोकानां तथा त
वन्नृपोत्तम श्रृणु भूप महापुण्यं षष्ठीमाहात्म्यमुत्तमं प्रोष्टपद्यासिते पक्षे षष्ठी भौमेन संयुता

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

व्र. कं.
१.३
व्यतीपातेनरोहिण्यासाषष्टीकपिलास्मृता प्रोष्ठपदोभाद्रपदः सचात्रदर्शितोयास्त्य: रोहि
णीयोगस्यतत्रैवसंभवात् द्वितीयात्तुमहापुण्यादुर्लभात्रतिनोक्काचित् षष्टीसंवत्सरस्या
तेसापुनस्तेनसंयुता चैत्रवैशाखयोर्मध्येसितेपक्षेर्कभोदये वैशाखेपिचराजेंद्रद्वाराव
त्सांपरास्मृता तस्यांचैववहुतंदत्तंयत्किंचित्प्रतिपादितं तस्यपुण्यस्यसंख्यावक्तुंन
शक्यते यस्मिन्कालेभवेदेतेगुणेः षष्टीयुतातदा पंचम्यामेकभक्तंचकुर्यात्तत्रविचक्षणः
षष्ट्यांप्रातःसमुत्थायकृत्वादंतधावनं जलपूर्णांजलिंकृत्वाइदंमंत्रमुदीरयेत् निराहा
रोयदेवेशत्वद्भक्तस्त्वत्परायणः पूजयिष्याम्यहंभक्त्याशरणंभवभास्कर अर्घ्यंदत्वेतिसंक
ल्पंकृत्वायत्नाच्छुचिंस्थितः स्नानंकृत्वाप्रयत्नेननद्यांतीर्थाद्रवेह्रदे तडागेदीर्घिकायांचग
हेवानियतात्मवान् देवदारुतथोशीरकुंकुमेनामनःशिलं पद्मकंपत्रकंयाष्टिमधुग १.३
न्धेनपेषयेत् तीरेणालोड्यकल्केनस्नानंकुर्यात्समंत्रकं आपस्त्वमसिदेवेशज्योतिषांप

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वृ.कं. स्करमेवच सप्ताश्वरथमारूढं पद्महस्तं दिवाकरं अक्षसूत्रधनुःपाणिं कुंडलैर्मुकुटेनच रत्नैर्ना
१०४ नाविधैर्युक्तं सौवर्णं तत्र कारयेत् शक्तितस्तु पलादूर्ध्वं दद्यात्कर्षतोपि वा सौवर्णमरुणं कु
भौकं: र्यात्र्यंनं चैवतथापरं सप्ताश्वैर्भूषितं कृत्वा रथं तस्याग्रतः स्थितम् अरुणं विनतापुत्रं ग
हीतारश्मिकरे एवं रूपं रथं कृत्वा पद्मस्योपरि विन्यसेत् तस्योपरिन्यसेद्देवं रक्तवस्त्रावि भू
षितं रक्तचंदनमाल्यादि मंडितं चातिशोभितं अग्रतः सारथिं कृत्वा पूजयेदरुणं शुचिः रक्त
पुष्पैः सुगंधैश्च तथान्यैरपि शक्तितः विनतातनयो देवः कर्मसाक्षी तमोनुदः सप्ताश्वः सप्त
रज्जुश्च अरुणो मे प्रसीदतु मंत्रेणानेन संपूज्य सारथिं तदनंतरं देवस्य शंसनं कल्प्यात्प्रभूतादि
कपंचवकं प्रभूतविमलं सारं आराध्यं परमं शुभं दीप्तादिशक्तिभिश्चैव ततो भानुं प्रपूजयेत्
दीप्तासूक्ष्मा तथा भद्राविं विनी विमलानघा प्रमोघा वैद्युता चेति नवमा सर्वतोमुखी अपवि १०४
त्रः पवित्रो वा सर्वावस्थां गतोपि वा यः स्मरें भास्करं देवं स बाह्याभ्यंतरः शुचिः क्षीरवाग्यां भा
द्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

त्रिरेवच पापं नाशय मे देव मनोवाक्कायकर्म्मजं पंचगव्यकृतस्नानः पंचमंगैस्तु मार्ज्ज
येत् पंचमंगैः पंचपल्लवैः स्नानयेन्मृत्तिकां शुद्धां स्नानार्थं वै प्रयत्नतः मृत्तिकेत्रस्तप ता
सि कश्यपेनाभिमंत्रिता पवित्रं कुरु मां नित्यं सर्वपापात्समुद्धर मंत्रेणानेन वरुणं पूजयेद्भ
क्तिमान्नरः पाशहस्त वरुण सर्ववारीश्वर प्रभो अयाहं प्रार्थयामि त्वां व्रतं कुरु सुरेश्वर
आदित्यो भास्करो भानू रविः सूर्यो दिवाकरः प्रभाकरो सवि वीरो देवः सर्वेश्वरो हरिः गोम ता
येनोपलिप्तायां भूम्यां वै कुंकुमेन तु मंडलं सर्वतोभद्रमालिखेत् बुद्धिमान्नरः तत्रमध्ये
लिखेत् पद्ममष्टपत्रं सकर्णिकं पूर्वपत्रे न्यसेत्सूर्यमाग्नेये भास्करं न्यसेत् सुवर्णरेतसं
याम्ये नैरृते च न्यसेद्रवि आदित्यं वारुणे पत्रे वायव्ये च दिवाकरं सौम्ये प्रभाकरं तत्र सू
र्यमीशानपत्रके तीव्ररश्मिधरं देवं प्राणं चैव विन्यसेत् आधाररूपिणं देवं मध्ये
चैवारुणं न्यसेत् सहस्ररश्मिं सूर्यं च सकलं स्थूलगुणान्वितं सर्वगं सर्वरूपं च मध्ये भा

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

हस्ताणि षष्टिवर्षशतानि च ॥ इदं कृत्वा पुरेंद्राणी लेभे इंद्रं पतिमुत्तमं रोहिणी पतिमालेभे चं
द्रं व्रतनिषेवणात ॥ रुक्मिणी देवी सुभर्त्तारमादित्यं प्राप्य सत्पतिं ॥ इदं ते कथितं भद्रे व्रतं कोटीश्व
रीपरं लक्षेश्वशीतिविख्यातं कुरु रं भे मनोहरं ॥ इति कोटेश्वरीव्रतं ॥ आश्विन कृष्ण तृतीयायां
वहकोरीव्रतं ॥ तत्र पूजा ॥ चतुर्भुजां सुवर्णाभां नानालंकारभूषितां हिमेंदुलहिनाभासां
मुक्तामणिविभूषितां पाशांकुशधरां देवीं ध्यायेत्सर्वार्थसिद्धिदां कमंडलुधरां सक्षां पा
नपात्रं च बिभ्रतीं ॥ ध्यानं ॥ एहि मातर्विरूपे त्वं त्रिगुणे परमेश्वरि आवाहयामि भक्त्या त्वां त्र
सन्ना भव सर्वदा ॥ आवाहनं ॥ हेमरत्नकृतं देवि आसनं ते विनिर्मितं पाशांकुशधरां देवी मा
सने स्थापयाम्यहं ॥ आसनं ॥ अंकुशमालाकुशधरे देवि णपुस्तकधारिणि भक्त्या दत्तं मया तोयं पा
द्यार्थं प्रतिगृह्यतां ॥ पाद्यं ॥ अर्घ्यं ददामि ते मातर्भक्तानामभयं करे गृहाण त्वं वृहत्कोरी नम
स्कारस्तुतिं मम ॥ अर्घ्यं ॥ भक्तानामिष्टदे मातः सर्वालंकारसंयुते आचम्यतां जगन्माता त्वं
महादेवप्रिये देवि भक्तानंदविधायिनि ४८

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

दु.कं. हरगौरि नमोऽस्तु ते आचमनं ततः पंचामृतस्नानं स्नापयामि जगन्मातस्त्वां सुतीर्थजले 276
५४ नवे प्रार्थयित्वा मया देवि सर्वपापविनाशिनि स्नानं वस्त्रं धौतं मया देवि दुकूलं तव
निर्मितं भक्त्या समर्पितं मातर्गृह्यतां जगदंबिके वस्त्रं अपासिंदूरहरिद्राकुंकुमादिसौ
भाग्यद्रव्याणि निवेदयेत् मलयाचलसंभूतं घनसारं मनोहरं गंधं गृहाण देवि त्वं
हरगौरि नमोऽस्तु ते गंधं चंपकादीनि पुष्पाणि भक्त्यानीतानि मे शुभे पूजार्थं गृह्यतां देवि जा
तीपुन्नागमालती पुष्पं माल्यादीनि सुगंधानि शतिं पुष्पं धूपोयं गृह्यतां देवि कालागरुघृ वा×
तान्वितः आघ्रेयः सर्वदेवानां देवद्रुमरसोद्भवः धूपः दीपं गृहाण देवेशि त्रैलोक्यतिमि
रापहं वह्निना योजितं मातर्वै हरगौरि नमोऽस्तु ते दीपं नैवेद्यं गृह्यतां देवि नानास्वादसम
न्वितं षड्रसेन समायुक्तं नैवेद्यं प्रतिगृह्यतां नैवेद्यं कर्पूरैलालवंगादि नागवल्लीदलै ५४
र्युतं पूगीफलयुतं देवि तांबूलं प्रतिगृह्यतां तांबूलं हिरण्यगर्भसंस्थानि दक्षिणा

ग

व्रतमिदं मद्रेरुद्राण्यास्तुष्टं भवतु मम संध्ययावृत्तसाविमां प्रहृष्टत्वाकृतं पुरा दमयंत्याचरोदिर्णा कृते ४५

व्र. कं. ५२ गरुचंदनैः गंधैः पुष्पैश्च नैवेद्यैः फलैश्च विविधैस्तथा वस्त्रेणाचैव रक्तेन पूजयेत्परमेश्वरी
नमोनमस्ते देवेशि लक्ष्मेश्वरि नमोस्तु ते कोटीश्वरि नमस्तुभ्यं नमस्ते हरवल्लभे उमादेवि नम
स्तुभ्यं कात्यायनि नमोस्तु ते नमः कालि महाकालि शिवदुर्गे नमोस्तु ते नमः सर्वाणि रुद्राणि
अपर्णे शंकरप्रिये सर्वभूतहिते देवि त्राहि संसारसागरात् पूजामंत्रः नमो लक्ष्मेश्वरि दे
वि कोटीश्वरि नमोस्तु ते गृहाणार्घ्यं मयादत्तं शंकरेण समं मम अर्घ्यमंत्रः पुरा व्रतवरं चक्रे गौ
५३ रिणा भोः ज्ञायते ष्टत्वा लक्ष्म्या सदा सितः एवं विधविधानेन करोति नियतव्रतं न तस्य स्या
द्दारिद्र्यं नचैव विष्टवियोजनं अष्टपुत्रा भवेन्नारी भर्तारं च गुणाधिकं सुरूपं गुणिनं कांतं प्रि
यं तां प्रियदर्शनं ईश्वरं चैव राजानं लभते दीर्घायुषं प्रियं दातारं चैव भोक्तारं समस्तजनव
ल्लभं सुशीलं धार्मिकं शूरं चेद्रवत्प्रियदर्शनं सुरूपा सुभगा चैव सदा पत्युः प्रिया भवेत् स ५३
हयत्साव शरोरा कुरुते राज्यमुत्तमं अंतकाले समतेन मोदते विदिवे तथा घाष्टिवर्षस

तत्

218

रुघ्नापहतं देवि कदाचित्संभविष्यति तथेत्युक्वा ततो गौरी तत्रैवांतरधीयत एतद्व्रतं स
कलदुःखविनाशहेतुं सौभाग्यराज्यफलं भवे नयाचरंती यायोषितःसुखमनंतमिहापि प्राप्या
गौरीपतिं पतिरतास्तु ततो लभंते इतिश्रीभविष्योत्तरे हस्तगौरीव्रतं अथ भाद्रशुक्लतृतीयायां को
टीश्वरीव्रतं मदनरत्ने स्कांदे रंभोवाच देवलोके महादेवि गणिकाः सौख्यसंयुताः मर्त्यलोके
तथा सर्वाः स्त्रियः सौभाग्यगर्विताः कथं भाग्यं च भोगांश्च लभंते परमेश्वरि पार्वत्युवाच शृणु भ
द्रे परं गुह्यं सर्वकामफलप्रदं दुर्भगानां च नारीणां सौभाग्यकरणं परं लक्ष्मेश्वरीति विख्यातं
ततः कोटीश्वरीव्रतं तृतीयां शुक्लपक्षे तु मासि भाद्रपदे भवेत् तस्यां व्रतं तु संग्राह्यं यावद्वर्षं च
तुष्टयं उपवासेन कर्तव्यं वर्षे वर्षे तु सुंदरि अखंडानां तंडुलानां तिलानां वा सुलोचने लक्षमेकं
विक्षिप्य क्षिपेत्पयसि शोभने क्षीरसंमिश्रितैः कार्या देव्या मूर्तिः सुलोचना कृत्वा तु पुष्पप्राका
रं पुष्पमालाभिमंडितं संस्थाप्य पार्वतीं देवीं पूजयेद्भक्तिभावतः पूजयेद्विविधैः पुष्पैः कुंकुमा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ब्र॰खं॰ हरेत् व्रतंसमाचरेद्देवि यावद्वर्षत्रयोदशं स्वर्णभाजनगौर्यादि प्रतिवर्षंविसर्जयेत् ततश्चतुर्दशे
५२ वर्षेतदुद्यापनमाचरेत् संस्थाप्यगणपं गौरींकांचनींकांचनेगजे पूर्वोक्तविधिनापूज्यवा
सरांसित्रयोदश चतुर्दशे पदिवसेसंजाते प्रातरुत्थिता कृतोपवासनियमंगतेगौरींप्रपूजयेत्
पक्वान्नंस्वर्णपात्रेषुत्रयोदशसुविक्षिपेत् स्त्रीभ्यश्च कंचुकीर्दत्वाभोजयित्वाविसर्जयेत् एवंदे
विव्रतंकृत्वासर्वान्कामानवाप्नुयात् अशक्तौतुसदाकार्याप्रतिमामृत्तिकामयी पात्राणिवेण
वान्येवपात्रपुष्पाणिचैवहि रुक्मिण्युवाच ततश्चकेव्रतंगौरीप्राप्तासावांछितंफलं त्वमप्येतद्व्रतं
कुंतिकुरुश्रद्धासमन्विता अथभक्त्याव्रतंकुंतीसविधानंतदाकरोत् गांधारीचापितच्छ्रुत्वाव्रतंच
क्रेयथाविधि तुष्टावभक्तिभावेनतुष्टागौरीततोब्रवीत् पार्वत्युवाच कुंतितेपरितुष्टास्मिवरं
वरयसुव्रते कुंत्युवाच देहिमेसर्वसंपत्तिंसर्वसौख्यंमहोदयं अथचममपुत्राणांमहद्राज्य ५२
मनामयं व्रतमेतत्तुयःकुर्यात्सचलोकमवाप्नुयात् नदारिद्र्यंनवैधव्यंनशोकोनापिदुष्कृतं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

रखौ नस्वस्त्वं दिवा तत्र तस्य दं विदितं फलं शृणु देवि त्वयायेन त्वं कृतो हे विलोकितः त्वया
रक्ष्यं व्रतं देवि मदाराधनकाम्यया अपर्णास्मि न प्रसन्नोस्मि न त्वया च समुक्तं अपर्णा त्व
तया तेन दृष्टो हं तादृशस्त्वया तत्कुरुष्वाधुना देवि हरतालगौरीव्रतं शुभं पार्वत्युवाच आदि
ष्टं तां व्रतं नाथ विधानेन महेश्वर आरंभोस्य कदा कार्यः को विधिः कस्य पूजनं ईश्वर उवाच
मंडपे स्थापने कुर्यात्सर्वालंकारभूषिते अन्वितं कांचनैः पुष्पैः फलमुक्तान्वितैः शुभैः नै
वेद्यैः पंच [illegible] त्वाद्यैः शृणुयाममहं कथां दिने चतुर्दशे प्राप्ते स्थापयेत्प्रतिमां शुभां पक्वान्नैः
पूरितैः शुभ्रैः सार्धसार्धत्रयोदशः सार्धत्रयोदशादिने नैवेद्यमुपकल्पयेत् फलमूलानि चा
न्यानि तावंति समुपाहरेत् पूजयेच्च सुवर्णस्य पुष्पैः चान्यैः सुगंधिभिः चंदनैर्धूपदीपैश्च तांबू
लैश्च फलादिभिः ध्यायेच्च हृदये गौरीं हरहेरंबसंयुतां दक्षिणां च ततो दत्वा नत्वा देवीं विसर्जये
त् [illegible] सार्धत्रयोदशान् पादीपकान् शालिकाबिला [illegible] सुवासिन्यै स्त्रियै दत्वा तावतः स्वयमा
कान्विताः ॥

281

श्री

उ.कं. पंचभिःसह तस्याः कुंत्लमालिंघत्वा जगाम माधवः श्रमितं घसुखासीनं देवदेवं जनार्दनं
५१ उवाच कुंती सानंदा सप्रगल्भमिदं वचः कृष्णकृष्ण धन्यास्मि कृतकृत्यास्मि सनाथास्मि प
रंतप साहं संभावितास्मि त्वया सर्वजगद्गुरो यदि मे तु प्रसन्नोसि तदा च त्वं व्रतं विभो
यद्विधाय सुखं राज्यं प्राप्नुयां तनयैः सह कृष्ण उवाच कुंति ते कथयिष्यामि व्रतानामुत्तमं
व्रतं यत्कृत्वा सुखसंतानं धनधान्यसमन्वितं विधत्तं दुष्कृता पुण्या सपुत्रा राज्यमाप्स्यसि
हस्तगौरीव्रतं भद्रे कुरुष्व शुचिमानसा यत्कृत्वा सर्वतः संपत्स्यते वांछितं फलं कुंती
उवाच यदुक्तं ते व्रतं नाथ विधानं तस्य कीदृशं केन पूर्वं कृतं देव तन्मे ब्रूहि जनार्दन
श्रीकृष्ण उवाच कैलासशिखरे देवि हस्तास्थे च दिवाकरे दिवा प्रसुप्तं गौरी तु हरं संनिधि ५१
मागता सस्मिता देवदेवेशं त्र्यंबकेशं ददर्श ह अर्धदेहं वृषारूढस्य मर्द्धचंद्रकलाधरं
किमिदं तन्ममाचक्ष्व तप्यते मानसं मम ईश्वर उवाच देवि पूर्वं निषिद्धासि हस्तनक्षत्रसंगते

नेतं

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

282

ह्रुतात् । उद्दृयादुदु मंत्रेण गौरीमंत्रेण वेदवित् अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा ।
एवं समाप्य होमं तु तत्राचार्यं प्रपूजयेत् सुवर्णं रत्नवासोभिर्गां च दद्याद्यथाविधि श
य्यां सोपस्करां दद्यादाचार्याय प्रयत्नतः षोडश द्विजयुग्मांश्च सपत्नीकान्नाद्यैश्च भोजयेत्
सौभाग्यद्रव्यवस्त्राणि वंशपात्राणि षोडश दातव्यानि प्रयत्नेन ब्राह्मणेभ्यो यथाविधि
अन्येभ्योपि च वर्णेभ्यो दक्षिणां चैव प्रयत्नतः भूयसीं परया भक्त्या प्रदद्याच्छिवतुष्टये
उद्दिश्य पार्वतीशं च सर्वं कुर्यादतंद्रितः बंधुभिः सह भुंजीत नियतश्चापरेऽहनि ए
वं या कुरुते नारी व्रतराजं सुमध्यमे सौभाग्यमखिलं तस्याः सप्तजन्म न संशयः ॥ ।
इति श्रीभविष्यपुराणे तृतीयोद्यापनं इति श्रीभट्टनीलकंठात्मजभट्टशंकरकृतौ
व्रतार्के सौद्यापने हरितालिकातृतीयाव्रतं अथ हस्तार्कगते रवौ वाच्यं रंभाख्यं हस्तगौ
रीव्रतं सूत उवाच कौंतेयं चतुपेतायां हास्तिनापुरमुत्तमं मानितापांनरेंद्रैश्चलनये:

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वक्राणां तु न दोषकृत् इति व्यवहारतत्त्वे संक्रांतिमन्वाद्यव्यतीपातवैधृतीषष्ठ्यष्टमीपर्वसुनार्कभूसुते स्नानं द्वि
तीयादशमीचतुर्दशीनवमीष्वेतिमाद्यारवैधावनैधमाः अस्यापवादमाहतत्रैवप्रचेताः सार्षपं गंधतैलं
चयत्तैलं पुष्पवासितं अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन आयुर्वेदनिषिद्धतिथिवारदोषग्रहणोष्ण
पिराविषु किंचिद्दोषघ्नं युक्तं वा विप्रपादरजो चितं भानौ दूर्वाचितं भौमे भूमृद्युक्तं पुष्पयुग्गुरौ सर्व
र्षपं सर्वदा तैलमभ्यंगेषु न दुष्यति मंगलेष्वदोषः मांगल्यं विद्यते स्नाने वृद्धिपूर्त्तौ सवेषु च स्नेहमा
त्र समायुक्तं मध्याह्नात्प्राक् न दुष्यति इति मदनरत्ने पारिजाते कात्यायनोक्तेः हेमाद्रौ वृहन्मनुः
तैलाभ्यंगो नार्कवारे न भौमे नो संक्रांतौ वैधृतौ विष्टिषष्ठ्योः पर्वस्वष्टम्यां न च वेष्टः सदृष्टः प्रोक्तान्
मुक्त्वा वासरे सूर्यसूनोः तिलस्नाननिषेधस्तु षष्ठ्यादित्रिकानन्मते तथा सप्तम्यमावास्यासंक्रांति
ग्रहजन्मसु धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशेत् अथ गृहारंभः ज्योतिर्निबंधे वादरायणः
वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके सूत्रारंभः शिलान्यासः स्तंभारंभ प्रशस्यते नारदः
सौम्यफाल्गुनवैशाखमाघश्रावणकार्त्तिकाः मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः अ
त्र वृषसिंहवृश्चिकाः वैशाखश्रावणकार्त्तिकास्तेज्ञेयाः इति कालादर्शः तत्रैव कालांतरे स्थि
रमासे स्थिरे राशौ स्थिरे ज्ञे नववेश्मनां कुर्वीत स्थापनं ज्ञाको ः अन्यस्थापनमेव वा कार्त्तिकेनि

णे. नत्र

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

जो॰मु॰नि॰सिं॰ षेधस्तुलापरः कुंभे माघे विसर्ववर्षामे हि शाणमुपक्रमं मत्स्येयः प्रत्रांसनिधान्यागारं विहायच निषेधो धान्यगृहप
७६ रः पाकभोजनशालादौ मार्गशीर्षश्च फाल्गुने रथ्यायो हेमठादौ सहस्यश्च चिरे वक्ष्य आषाढनिषेधस्तुप्र
धानगृहपरः प्रधानगृहारंभं कुर्यान्नो षेडश्चा वर्षा तिते त्रैवोक्तः ज्योतिस्तवे पूर्वापरस्यां तनभांत्यपोषे
याम्योत्तरास्यं सहस्य द्वितीये कार्यंगृहं तैत्री च धर्दे गार्ग्य नीचास्तगो जीवसितो च हित्वा रत्नमालायां कर्क
नक्रहरिकुंभगते र्केपूर्वपश्चिममुखानि गृहाणि नो तुलिमेषवृषगे त्रिकपा तेंदक्षिणोत्तरमुखानि विंद
ति दैवज्ञवल्लभे ज्ञोकोधान्यंपंचता नि:यशूलत्वस्वात्मनेः स्वसंगारंरत्नधान्यमिति कालादर्शे पाठः स्वश्री
प्राप्तिं वन्हिभीतिं च लक्ष्मीं कुर्युश्चैत्राद्या गृहारंभकाले गर्गः उत्तरामृगरोहिण्यां पुष्ये मैत्रे करत्रये धनि
ष्ठाद्विते पौष्णे गृहारंभः प्रशस्यते रोहिण्यां श्रवणत्रये दितिपुगे हस्तत्रये मूलके रेवत्युत्तरफाल्गुनी
षु रगमे मैत्रोत्तराषाढयोः शास्त्रं वास्तुकुजार्कि गर्जितदिने गोकुंभसिंहेसुखे कन्यायां मिथुने नमः
चि सहोराधे र्केत्ते फाल्गुने कालादर्शे कुमारः आदित्यभौमवर्जेतु सर्वेवाराः शुभप्रदाः वास्तुशास्त्रे मार्ग
सनत्र शीर्षे तथा पौषे वैशाखे श्रावणे तथा फाल्गुने च कृतं वेश्म सर्वसंपत्प्रदं भवेत् कार्तिके माघमासे च
चैत्रे ज्येष्ठे तथाश्विने मास्याषाढे भाद्रपदे नकुर्यात्सर्वथागृहं द्वितीयाचतृतीयाच पंचमीसप्तमीत
था त्रयोदशीचदशमीपूर्णाचैकादशीततः खेचमारंभेशुभाःयस्यविद्याद्यक्रपदगाः व्यवहार रामायनम
७६

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ चं॰ प्र॰ ष्त्वासिद्धेः नापितन्त्यरिपालनं भावाभावाभ्यां तस्य निरूपणात् तस्मान्नित्य[illegible]हयोगं सर्वेषांय
११९ दायदर्भीषं उपपन्नं दुरितक्षयो वा स्वर्गो द्विपदवाच्यं सुखं भाव्यं स्त्रीकार्यम् मानाभ्यां करणत्वमित्यादि
वाक्ये पुण्यशब्दे नतदेवोक्तम् तस्माद्रात्रिसंक्रान्तौ रात्रौ दिवा च पुण्यं स्नानं विहितमिति स्थितम् यदि संक्रा
न्तिर्नक्षत्राय नेन दाह्विनीये तृतीये वा दिने संक्रान्तिनिमित्तं स्नानदानादिकर्तव्यम् तदाह भरद्वाजः न विदेत यदा
भोगपूर्वेण परेण च बलीयस्त्वान्निमित्तस्य तिथिवारं समाश्रयेत् प्रथमे रमयोयां तिद्वितीयं यां तिवा जिनः
नृतीये सविता याति पुण्यमाहुर्दिनत्रयमिति सूतकेपि संक्रान्तिनिमित्तं स्नानदानं च कार्यम् तदुक्तं कन्या
विवाहे संक्रान्तौ सूतकं न कदाचन जनने मरणे वापि त्रिद्वशौचं न विद्यते एतल्लोकविद्विष्टत्वाल्लोपदेशा
हेम् अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नत्विति निस्मरणात् अथार्कसंक्रान्तिवदन्यग्रहाणां संक्रान्तीना
मपि पुण्यकालउच्यते तत्रोक्तं मिनिराह नक्षत्रराश्योरविसंक्रमे स्युर्वोक्तरजापिरसेंदु नाड्यः भौमात्सप्तदो १६
न्निधरापलेयुगेके वनाड्यी ॥१३॥ इति भिःशुभोक्ता ॥१॥ नाड्यश्चान्तस्त्र ४॥ सप्तपलाः कुजस्य भृगुस्य तिस्रो ३॥
४मनवः पलानि। गुरोश्चन्तस्रोभ्युनि वह्निसंख्येः पलैर्युता ४ ॥ ३० नाड्यस्त्र दाहनाव २॥ नरेंद्रधाम्नाः विशे
षो नक्षत्रेति नक्षत्रे राशौ वा सूर्यसंक्रमणे सति पूर्वतः परतोपि रसेंदुनाड्यः १६ षोडश कलाः घटिकाः पु
ण्याः पुण्यकालः इंदोश्चंद्रमसः त्रिधरापलै १३ युक्तास्त्रयोदशभिः पलैर्युक्ता घटिकैका पुण्यकालः कुज
स्य मंगलस्य तु एकपलयुक्ताश्चतस्रो ४ ॥ घटिकाः पुण्याः बुधस्य चतुर्दशापलयुक्ता स्तिस्रो ३ ॥ घटिकाः
पुण्याः गुरोर्बृहस्पतेः सप्तत्रिंशत्पलयुक्ताश्चतस्रो ४ ॥ ३० घटिकाः पुण्याः शनेश्चरस्य सप्तपलयुक्ताः द्विनागघ
टयः नागाश्चाष्टौ द्विगुणाः १६ षोडश घटिकाः पुण्याः पुण्यकालइत्यर्थः अथसंक्रान्तिविशेषे दानविशे
षो निरूप्यते ब्रह्मपुराणे तुलोपुन्यागते सूर्ये विषुवद्विवसे तथा ब्राह्मणेभ्यः प्रदेयानि सस्यान्यभिनवानि च

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

चे

स्यैवम् रात्रिसंक्रांतौ रात्रेरुच्चदिवा च पुण्यं प्रत्यासत्तिविशेषात् परतो विशेष इति सिद्धं ततः तदुक्तम् ग्रहणोद्वाहसंक्रां
तियात्रार्त्तिप्रसवेषु च श्रवणेतिहासस्य रात्रौ दानं प्रशस्यते विष्णुरपि विवाहव्रतसंक्रांतिप्रतिष्ठाऋतुजन्मसु त
थोपरागपातादौ स्नाने दाने निशा शुभा नैमित्तिकं तु कुर्वीत स्नानं दानं रात्रिष्वपीति च विष्णुरत्र नक्तनिर्णयेति।
गदितः इमानि वाक्यानि केचित् संक्रांतिविषयाणीति केचित्तु तदवेक्षणम् उत्तरजन्मनियततेन या संक्रमणयोर्वेः
राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा क्वचिदिति वसिष्ठवचनेन विरोधः स्यात् न तु तथापि रात्रौ संक्रमणे भानो
र्दिवा कुर्याच्च तत्क्रियामिति गोभिलवचनविरोध इति चेन्न अस्य वचनस्य रात्रिसंक्रांतौ प्रत्यासन्नदिनपु
ण्यत्वप्रतिपादकस्य रात्रिस्नानदानसकलाभावाद्दिवाकर्यादिनस्कोर्दिवेव कुर्यादित्यर्थो न स्यात् न तु विषुवा
यनयोर्दिनमित्यत्रापि दिनपुण्यं न दिनमेवेति नेत्यत्वमिति चेन्नास्त्यम् नत्र विषुवायनयोः पूर्वग्रहण
सामर्थ्याद्दिनस्य पुण्यतमत्वं प्रतिपादितम् न तु रात्रेः पुण्यतमत्वं निरस्तमिति पूर्वमपि सूचितम् अयनेन तर
त्पुना रात्रिसंक्रमे तत्सन्निधानाद्रात्रिघटिकानां राज्यामेव पुण्यतमत्वम् केचित्तु अयनयोरविरात्रिजात
योरात्रावेव पुण्यतमत्वमाहुः तत्तु पूर्वोक्तस्यैव स्याबाधितमिति निरवद्यम् रात्रौ संक्रमणे पुण्ये दिनार्द्धं स्ना
नदानयोरित्यस्यापि आसन्नदिनार्द्धे पुण्यत्वप्रतिपादकस्य रात्रिनिवर्त्तकत्वाभावात् न तु रात्रेः पुण्यत्वाभावः
रात्रेर्दिनस्य विशिष्टत्वात्सति सूर्ये सूर्यसंक्रमणनिमित्तं स्नानादि दिवापि सावकाशमिति दिवा क्रियत इति
लोकव्यवहारसिद्धिः न तु रात्रेः पुण्यत्वम् इत्थं रात्रिपुण्यत्वविधायकभविष्यपुराणवाक्ये वैयर्थ्यं न स्यात्तथो
उभयोभयतः कलाः याः याः सन्निहिता नाड्यस्तत्पादेरपि रात्रेः पुण्यत्वस्वीकारे संकोचो नेत् कथंचित्तद्दिवा।
स्नानदानादावकृते रात्रावपि प्रत्यवायपरिहारस्य भाव्यत्वमुचितम् प्रागभावहेत्वन्ययोः स्नानादित्वात्तत्रा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐम्.चं.प्र. एषातिशयसंबंधार्थं प्रदोष समये प दे ऽर्द्धरात्रात् सर्वैदिन पुण्यत्वमुदाहार्यं च अस्मिन्नर्थे न द [illegible] पुनरुदाहर्यते पू
११८ र्वार्द्धरात्रे संक्रमे इतरे संक्रांतिवन्मकर कर्कटयोरपि दिनद्वये पुण्यत्व प्रसक्तेः हेमाद्रौ वसिष्ठ आह प्रत्यूषे वा निशीथे
वा यदि कर्कट संक्रमः पूर्वेद्युरहनि कुर्वीत स्नान दानादिकं नरः इति अथ प्रदोषे वा निशीथे वा मकरः संक्रमो
यदि अपरेऽह्नि प्रकुर्वीत स्नानदानादिकं नरः इति सर्व वर्णोपलक्षणम् प्रदोषो रजनीमुखं भविष्योत्तरेऽपि मि
थुनात्कर्कट संक्रांतिर्यदा स्यादंशुमालिनः प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः कार्मुकेन्तु इत्याद्युक्तमर्द्ध
रात्रेत दूर्द्धं वा संक्रांतौ दक्षिणायने पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति प्रातरिति विशेषेण प्रातः संध्योप
ते न दिनम् यावन्नोदयते रविरिति प्रत्यूषे चेति वाक्यद्वय विरोधः स्यात् न च कालादर्शे विशेषः प्रत्यूषे प्रदोषे चा
यन संक्रमणयोः पूर्वोत्तर दिनयोरेव पुण्यत्वेन सन्निहित रात्रेः पुण्यत्वात् तत्र संक्रमपूर्वोत्तरं त्रिंशद्धि घातिघ।
टिकासु पुण्यत्व विधायक वाक्य विरोधो दुःपरिहर उक्तेः विप्रकृष्टयोरन्होरुक्तेः पुण्यत्वे सन्निकृष्टयो रात्रिभाग
योः पुण्यत्वं कैमुत्य न्यायेन सिद्धमित्यविरोध इति न च भविष्योत्तरे प्रत्यूषे कर्कटं भानुः प्रदोषे मकरं यदि
संक्रमेत्त्वहनि नाद्यस्तु पुण्याः पूर्वोत्तराः स्मृता इति न तु त्रिंशन्मकर केचकइत्यादि वचनेनास्य विरोध इति चेन्न।
तुल्यत्वादनयोर्वचनयोर्विहित कालयोर्विकल्पः स्वीकार्यः अत्र वचन बलाद्रात्रेः पुण्यत्वेपि दिवा निरुवा।
कारूपं च प्रग्रहणवत् न तस्यां स्नानदानादि [illegible] विधिः किंतु दिन पुण्य प्रतिपादकाय। न विष्व विशेष वाक्या
द्रात्रेः सकाशाद्दिनवेलु पुण्यत्व काल विशेषाय वोद्घायन निमित्त पुण्ये विधि निमित्ताभ्यं न विधिनिषेधरूप
त्रावपीति व्यवस्थापना न वाक्य विरोधः न तदाह गोभिलः रात्रौ संक्रमणे भानो विषुवत्ययने दिवे ति दिवा पुण्य
मित्यर्थः न नन्वहिं विषुवायन व्यतिरिक्तासु सर्व संक्रांतिषु परिरात्रे रासुरीत्वाद्रात्रौ न भाग इत्यायातमितिचे ११८

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

2188

नेनैकेन मुखेन सुरस्वकुष्णायां रात्रावतु दिन आदित्येन दिवानन्नक्तमिति शिरस्तु दवास्यदि त्रिवा॰ जिनेयप्रभुतेः अप्र
र्वोशार्वरीदल इति घ्यातोह्यासोक्त सकलस्मृति पुराणानधिगमात् पूर्वोत्तरवचनयोः क्रमेण वृहद्गार्ग्यभविष्योत्तर
नाम्नाऽविलिखितत्वाच्च किंतु वाक्यद्वयेपि प्रदोषेचार्द्धरात्रेचेवेतु त्वराद्र्दे स्ववाक्यांतरविरोधोदुःपरिहार्यः नचार्थांतरक
ल्पनयापूर्वेइतिनिबंधकाराः पारिजातादयः परिकल्पनाचेत्प्रदोषइत्येववाशब्दात् अपर्याप्तेनोपमानविकल्प।
योरितिपारिजातनिस्सरणात् नद्वयं हर्षांतदार्ष्टांतिकयोरर्थः यथा प्रदोषपूर्वदिनार्द्धपुण्यत्वंतथाऽर्द्धरात्रेपरदिनेपुण्यत्वंदि
नीयोवाशब्दस्तु पाक्षार्थे निश्चयेन पर्ने त्वनेकेष्वर्थेष्विति निपातनिरुक्ते निपातेऽनेकार्थः प्रदोषेमकरसंक्रमेदिनद्व
येपि विकल्पेन पुण्यमिति केचित् अस्तंगतस्यैवेयथ्याभावात् अस्तंगते प्रदोषेचेत्तियथापूर्वदिने पुण्यमित्यादिवा।
क्यानि च मकरकर्कटव्यतिरिक्तसंक्रांतिविषये विशालावकाशावकाशानि मिथुनकर्कटसंक्रांतिः कार्मुकेतुपरि
त्यज्येत्यादिवाक्यानि तु मकरकर्कटमात्रविषयत्वात् निरवकाशानि अतश्चसावकाशानिरवकाशयोर्निरवकाशो
विधिर्बलवानितिन्यायात् मकरे परदिनस्य पुण्यत्वे कर्कटे पूर्वदिनस्य पुण्यत्वं युक्तम् अपयवाप्यसन्नसंक्रममित्यादि
यत्सामान्यविषयपोरेव पुण्यत्वं युक्तमिति एवंस्थितेविरोधपरिहारेहेतुर्व्यवस्थैव प्रतीयते अर्द्धरात्रेमकरसंक्रमेस
तिपरदिनेभोगः तथैव कर्कटसंक्रमे सति पूर्वदिने संक्रांतिभोगः स्यादित्यत्र न विवादः यदि प्रदोषेमकरसंक्रांतिः
प्रत्यूषेकर्कटसंक्रांतिस्तदोक्तवक्ष्यमाणायन॰द्वयसंक्रांतिविषयवाक्यपर्यालोचनया संक्रांतिसामान्यवाक्यप
र्यालोचनेन पूर्वोत्तरदिनयोरपि पुण्यत्वेन तत्र दानादिनिषेधेपि मकरकर्कटविषयविशेषवाक्यवलान्प्रदोषेमक
रसंक्रमे परत्रैव तन्निमित्तो विधिनिषेधौ प्राप्नुतः प्रत्यूषेकर्कटसंक्रमे पूर्वदिन एव तौ प्राप्नुत इति सामान्यविशे
षवचनव्यवस्थायां न कश्चन विशेषः अस्तंगत इत्यनेनैव सिद्धेः प्रदोषार्द्धरात्रयोः [illegible] ग्रहणं न व्यर्थं किंतु पु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वंति ५ द्यौवात्रयोवावलिनोभवेत्निफलप्रदानत्वमितिप्रकल्प्यं मंदारसौम्येज्यसितेंदुसूर्जैर्वि॰गोत्तरंस्युर्वलिनोनिस
र्गान् क्वचिद्राज्यं क्वचिन्मूर्जा क्वाप्ति द्रव्यं क्वचिद्यशः ददंतिखेचराक्षिप्रं वेशावीर्यसमान्विताः ७ दुष्टप्रदःसौम्यनि
रीक्षितश्चेद्दुष्टंफलं नोसकलं ददाति क्रूरेक्षितःसत्फलदोपिचेवं विचारणीयं किलदृग्बलस्य ८ इतिस्थानव
लादिवलयुक्तग्रहफलानि अथसूर्यस्यवोशिवेशिउभचरीयोगविचारः खेचराद्दिनमणेर्विधुवर्ज्यद्वि
दशोद्भविगाधान्यूभयेवा वोशिवे शुभभयचर्यभिधानाः प्राक्क्रमेः समुदिताइतियोगाः १ सोन्मदद्दृष्टिर्व
क्रकष्टकृत्स्यात्ययपतत्यधश्चाननपूर्वकायः वोशिर्यदाजन्मनियस्ययोगेस्तद्वाचिकिंचिन्नियमोनवाच्यः २
प्रसूतिकालेकिलवेशियोगस्तिर्यक्प्रचारःप्रस्वपस्यदृष्टेः स्याद्वाग्विलासोलसतासमेतःसत्वानुकंपीपृथुपू
र्वकायः ३ सर्वसहःस्थिरतरोनितरांसमृद्धःसत्वाधिकःसमशरीरविराजमानः नात्युच्चकःसरलदृक्प्रबलाम
लश्रीयुक्तःकिलोभयचरीप्रभवःप्रदिष्टः ४ सूर्यस्यवीर्यान्खचरानुसारादुक्तंप्रयोगात्रविचार्यसर्वं सूक्तं
समंवाप्रबलंनराणांफलंसुधीभिःपरिकल्पनीयम् ५ अथचंद्रयोगः द्विजपतेर्धनगेःसुनफाभवेद्व्ययगते
रनफाःविवर्जितेः दुरुधराखचरेरुभयस्थितैर्मनिवैरेरुदिताःमहदादरात् ६ निशाकराज्जन्मनिखेचरेंद्रा
धनव्ययस्थानगतान्नचेत्स्युः केमद्रुमंतेजनयंतियोगंलक्ष्मीवियोगंकुरुतेसनूनम् ७ निजभुजार्जितवित्तस
मन्वितोविशदकीर्तियुतोमतिमान्सुधीः नरपतेःसचिवःसुकृतीकृती ८ उदारकी
र्तिर्गुणपूर्तियुक्तःसच्छीलशालीशुभवाग्विलासः कंदर्पकेलिःसततंविनीतःप्रसन्नरःस्यादनफाभिधाने ९

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

जा०भ०
५०

द्रविणवारणवाहवसुंधरासुखयुतं कुरुते सततं नरं अहिधराजितराजितवैरिणं सुनयनानयनांचललालसं १० वि
रुद्रवृत्तिर्मलिनः कुवेषः प्रेष्यो मनुष्यो हि विदेशवासी कांतासुहृत्स्वधनैर्विहीनः केमद्रुमे भूमिपतेः सुतोपि
११ केंद्रानुगामी न च यामिनीशः सरोजिनीनायकतः करोति विज्ञानमानोन्नतिनैपुणानि कुनिष्टमध्योत्तम
तायुतानि १२ प्रालेयरश्मिः परिसूतिकाले निरीक्ष्यमाणः सकलैर्नभोगैः नरं चिरंजीवितसार्वभौमं करोति केम
द्रुममाशु हत्वा १३ चतुष्केंद्रेषु भवति खेटात् द्वयोरपि केमद्रुमराजयोगः विहाय केमद्रुमतां नितांतं कल्पद्रुमः स्यात्कि
लसत्कुलाढ्यः १४ हितिसुतयुतजीवे सूतिकाले तुलायां किल सति नलिनीनां नायके कन्यकायां यदि विधुरि
पुप्रोषैर्नेक्षितो मेषवर्ती जनयति नृपतीं द्वं हंति केमद्रुमं च १५ इति जातकाभरणे सुनफादियोगाः येषां स
तो राजयोगा नराणां प्रव्रज्या चेत्तापसास्ते भवेयुः वक्ष्ये संक्षेपेण तांस्तापसानां योगान्यत्तात्संमतान्वै मुनीनां
१ ग्रहैश्चतुर्भिर्यदि पंचभिर्वा षड्भिस्तथैकालयसंस्थितैश्च नष्टं पतिः सर्वे खलु राजयोगाः प्रव्राजको योग इति प्रदिष्टः
२ अन्यग्रहालोकनवर्जितश्चेज्जन्मेश्वरो नैव शनिं प्रपश्यन् मंदोपि नो जन्मपतिं विलग्ने यदीक्षिता विवक्षा प्रवृत्तो
नरः स्यात् ३ जन्माधिराजो रविजत्रिभागे कुजार्कजांशेर्कजवीक्षितश्चेत् करोति जातं जटिलं कुशीलं पारखंडकं
मंडनतत्परं वा ४ होराश्रशीतकरामरेंद्रसचिवाः सौरेणसंवीक्षिताः प्रणपस्तृरं भत्रिणि प्रणयकृत्तीर्थाटनोमान
वः कोणपुण्यगृहाश्रिते न्यखचरैर्नैवेक्षिते दीक्षितः स्याज्जन्मयदि प्रसूतिसमये सद्राजयोगोद्भवः ५ प्रव्राजको
कोदिवलकर्मणा वैखानसः खप्परभक्कपाली दंडीयतिश्चक्रधरश्चनग्नः सत्यस्थ मिनिनिर्जिते स्युः
६ एकस्थानस्थितैः खेटैः सर्वेश्च बलसंयुतैः निरंबरा निराहारा योगमार्गपरायणाः एकस्थाने खेचराणां

एमनम
५०

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

291

पीडा इदं तु पूर्वं प्रविचार्य सर्वं प्रश्नप्रसूत्यादिषु चिंतनीयम् २९ इति श्री ढुंढिराजविरचिते जातकाभरणे
अष्टकवर्गाध्यायः अथ योगाः पाषाणयंत्रक्रयविक्रयेषु कूटक्रियायां च विचक्षणः स्यात् कामीप्र
कामं पुरुषः सगर्वः सर्वौषधीशे नरवो समेते १ भवेन्महोजा बलवान्विमूढो गाढोद्धतः सत्यवचा मन
स्वः सुसाहसोऽक्रूरतरोऽतिहिंस्रो दिवामणौ तौलिसुते प्रयाते २ प्रियवचाः सचिवो बहुसेवया
र्जितधनश्च कलाकुशलो भवेत् अतिपरोहितकृन्नलिनीपतौ कुमदिनीपतिसूनुसमन्विते ३ पुरो
हितत्वे निपुणो नृपाणां मंत्री च मित्रार्जितधनः समृद्धः परोपकारी चतुरो दिनेशे वाचामधीशेन युते
नरः स्यात् ४ संगीतवाद्यादिषु चारुबुद्धिर्भवेन्नरो नेत्रबलेन हीनः कांतानिमित्तात्तसुहृत्समाजः
सितान्विते जन्मनि पद्मिनीशे ५ धातुक्रियापण्यमतिर्गणज्ञो धर्मप्रियः पुत्रकलत्रसौख्यः सेवासमृद्धो
तितरां नरः स्यात्प्रद्योतने भानुसुतेन युक्ते ६ आचारहीनः कुटिलः प्रतापी पण्याजीवीकलहप्रिय
श्च स्यान्मातृशत्रुर्मनुजो रुजार्त्तः शीतद्युतौ भूमिसुतेन संयुते ७ सद्वाग्विलासो धनवान्सुरूपः कृ
पार्द्रचेताः पुरुषो विनीतः कांतावरप्रीतिरतीव वक्ता चंद्रेण चांद्रौ बहुधर्मकृत्स्यात् ८ सदा विनीतो
दृढगूढमैत्रः स्वधर्मकर्माभिरतो नरः स्यात् परोपकारार्द्ररतेकचित्तः शीतद्युतौ वाक्पतिनासमे
ते ९ वस्त्रादिकानां क्रयविक्रयेषु दक्षो नरः स्याद्व्यसनी विधिज्ञः सुगंधिपुष्पोत्तमवस्त्रचित्तो द्विजा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐमजाभंधिराजेभग्नजेनयुक्ते नीचांगनानांपरिसेवनेधूर्तैश्च यातनृत्तिर्गतसाधुशीलः परान्नदः स्यात्पुरुषोर्थहीनःदौ
३९ समंदेवप्रवदंतिसंतः ११ बाहुप्रकृकुशलोवहुलक्ष्मीलालसोविविधभेषजपण्यः हेमलोहविधव- विभा
वःसंभवेयदिकुजेंदुयोगः १२ मंत्रास्त्रशास्त्रार्थकलाकलापेविवेकशीलोमनुजःकिलस्यात् चमू
पतिर्वानृपतिःप्रदेशोग्रामेपुरेवासकुजेसुरेज्ये १३ नानांगनाभोगविधानचित्तोद्यूतानृतप्रीतिरतिप्र
पंचःनरःसगर्वःकृतसर्ववैरोभृगोःसुतेभूमिसुतसंयुते स्यात् १४ शस्त्रास्त्रवित्संगरकर्मकामःस्त्रीया
त्रप्रीतिकरःप्रकामं सौख्येनहीनोनितरांमनुष्यःस्याद्भूसुतेमंदयुतेतिनिंद्यः १५ संगीतविन्नीति
पतिर्विनीतःसौख्यान्वितोत्यंतमनोभिरामः धीरोनरःस्यात्सुतरामुदारःसुगंधिभाग्वाक्पतिसौम्ययोगे
१६ कलाधिशालीवरवाग्विलासःसदासहर्षःपुरुषःसुवेषः भर्त्ताबहूनांगणवान्विवेकीसभार्गवेज्ञ
न्मनिसोमसूनौ १७ चलस्वभावश्चकालिप्रियोपिकलाकलापेकुशीलः पुमान्बहूनांप्रतिपालकश्च [illegible]
द्भवेत्प्रसूतोमिलनेज्ञशान्योः १८ विद्ययामवतिपंडितःसदापंडितैरपिकरोतिविवादं पुत्रमित्रधन
सौख्यसंयुतोमानवःसुरगुरौभृगुयुक्ते १९ शूरोर्थवान्ग्रामपुराधिनाथोभवेद्यशस्वीकुशलःक
लासु श्रीसंश्रयःप्राप्तमनोरथश्चनरःसुरेज्येरविजेनयुक्ते २० शिल्पलेख्यविधिजातकौतुकोदार
दारुणकरोनरोभवेत् अश्मकर्मकुशलोलसन्मतिर्भार्गवेरविसुतेनसंयुते २१ इतिश्रीदैवज्ञहुं
३९

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ढिराजविरचिते जातकाभरणे द्विग्रहयोगाध्यायः अथाश्वयंजा प्रमविधिप्रवीणाः सुरूपकाः कर्पभ्यां सुतरां वि

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

हीनाः नक्षत्रनाथप्रति
नि पुत्रमित्रैरेकत्र संस्थैः पुरु
षा भवंति १ भवेन्महोजा नृपकर्मकर्त्ता वा तो विधेः शास्त्रकलासु दक्षः दिवामणिज्ञामनुरथिमसं
ज्ञैः प्राणी भवेदेकगृहं प्रयातैः २ सेवाविधिज्ञश्च विदेशगामी प्राज्ञः प्रवीणः चपलोतिधूर्त्तः नरो भवे
च्चेद्रसुरेंद्रवंद्यप्रद्योतनानां मिलने प्रसूतो ३ परस्वहर्त्ता व्यसनानुरक्तो विमुक्तसत्कर्मरुचिर्नरः
स्यात् मृगांकपंकेरुहबंधुभौमाश्चैकत्र भावे यदि संयुताः स्युः ४ परेंगितज्ञो विधनश्च मंदो धातुक्रि
यायां निरतो नितांतं व्यर्थप्रयासप्रकरो नरः स्यात्त्वेज्जेयदैकत्र रवींदुमंदाः ५ ख्यातो भवेन्मंदविधिप्र
वीणः सुसाहसो निष्ठुरचित्तवृत्तिः लज्जार्थजायात्मजमित्रयुक्तो यदैकगेहे विधार्के क्षितिजे नरः स्यात् ६
रक्तार्थयुक्तः क्षितिपालमंत्री सेनापतिर्नीतिविधानदक्षः महामना सत्यवचोविलासः स्यात्सौरजीवेंदुस
हितैर्नरः स्यात् ७ भार्यान्वितोत्यंतमतिर्विनीतः कुलीनताशीलविराजमानः स्यादल्पजल्पश्च नि
रोनरश्च द्योमास्कुजित्स्वपुतिः प्रसूतो ८ धनेन हीनः कलहान्वितश्च रोगी वियोगी पितृबंधुवर्गैः
विवेकहीनो मनुजः प्रसूतो योगो यदा कोरशानैश्चराणां ९ विचक्षणः शास्त्रकलाकलापे सुसंग्रह

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ जा॰ भ॰ ऽथ प्रबलः सुशीलः कृच्छिकस्तामरपूजितानां योगे भवेन्नानयनाभयार्त्तः १० साधुद्वेषी निंदितोऽत्यंततन्त्रः कांता
५० हेतो मानवः संयुतश्चेत् दैत्यामात्यादित्यसंज्ञस्त्वेद्रावाचाटः स्याद्दन्यदेशाटनश्च ११ निरस्कृतस्त्रीयज
नेः स्वहीनोऽप्यन्येऽर्महद्द्वेषकरो नरः स्यात् षडाकृतिहीननराज्ययातश्चादित्यमंदेंदुसुतैः समेतैः १२ अप्र
गल्भवचने धनहीनोऽप्याश्रितो वनितापतेर्मनुजः स्यात् क्रूरतापियतरः परकार्यसाद्दरोऽर्कगुरुभार्गवयो
गे १३ नृपप्रियो मित्रकलत्रपुत्रैर्नित्यं युतः कांतवरो नरः स्यात् शनैश्चराचार्यदिवामणीनां योगे सुनी
त्याव्ययकृत्प्रगल्भः १४ रिपुभयपरियुक्तः सत्कथाकाव्ययुक्तः कुचरितरुचिरे वात्यंतकेऽपूयनार्त्तः नि
जजनधनहीनो मानवः सर्वदा स्यात् कविरविरविजानां संयुतिश्चेत्प्रसूतौ १५ भवंति दीनाधनधा
न्यहीना नानाविधानात्मजनापमानाः सुमोनवाहीनजनानुयाता श्चेत्संयुता दोषिसुतेंदुसौ
म्याः १६ व्रणांकितः कोपयुतश्च रत्नो कांतारतः कांतवपुर्नरः स्यात् प्रसूतिकाले मिलिता भवंति
चेदारनीहारकरामरेज्याः १७ दुःशीलकांतापतिरस्थिरः स्याद्दुःशीलकांतानजोऽल्पशीलः नरो भवे
ज्जन्मनि वेकभावे भौमास्फुजिच्चंद्रमसो यदि स्युः १८ श्रोष्यां वे हि जननीमतिप्रदुः सर्वदा कलहान्वितो
भवेत् संभवे रविभवेंदुमस्सुतास्पुतायदि नरोतिगर्हिते १९ विख्यातकीर्तिर्मतिमान्महोजा विचित्रमि
त्रो बहुभाग्ययुक्तः स छत्रविद्योति नरो नरः स्यादेकत्र संस्थैर्गुरुसोमसौम्यैः २० विद्याप्रवीणोऽपि च नी

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

२९५

चहृत्तः सद्भिर्महद्भिरुच्चैर्विशेषात् स्याद्दर्यतुच्चो हिनरः प्रसूतौ मृगांकसौम्यार्कसुतैर्जितांयुतिश्चेत् २१
कलाकलापामलबुद्धिशाली ख्याता तिनीशाभिमतो नितान्तम् नरः प्रसूतामपतिर्विनीतो बुधे दुमंदारसहि
तायदि स्युः २२ भाग्यभाग्भवतिमानवः सदा चारुकीर्तिमतिवृत्तसंयुतः भार्गवेंदुसुरराजपूजिताः संयुता
यदि भवंति संभवे २३ विचक्षणः क्षोणिपतिप्रियश्च सन्मंत्रशास्त्राधिकृतो नितांतं भवेत्सुवेषो मनुजो
महौजाः संयुक्तमंदेंदुसुरेंद्रवंद्यैः २४ पुरोधसो वेदविदां वरेण्याः सुप्राणिनः पुण्यपरायणाश्च सन्तु
की स्तलोकनलेरवने धराकावीडुमंदामिलिताय दि स्युः २५ क्षमापालकः क्षीयकुले नरः स्यात्कवित्वसंगी
तकलाप्रवीणः प्राप्यसंसाधकतेकचित्तो राचस्मतीडयावनिसूनुयोगे २६ चित्तोन्नतिः क्षीणक
लेवरश्च वाचालताचंचलता समेतः धष्टः सदोत्साहपरो नरः स्यादेकत्रयातैः कविभौमसौम्यैः २७
तनुवने कुलोचनः क्षीणकलेवरश्च प्रेष्यः प्रवासी बहुहास्ययुक्तः स्यान्नरो सहितश्च नरो परोधी मंदारसौम्यैः
ॡः सहितैः प्रसूतो २८ सपुत्रवदारादिसुखैरुपेतः क्षमापतेर्मान्यतरश्च जनानुयातः वाचस्पतिक्षोणिसु
ता सुकविक्षिः देते यदेकत्रगतैर्नरः स्यात् २९ नृपाप्तमानं कृपया विहीनं कृशांकहृत्तं गतमित्रसख्यु
तन्याचप्रांत्यगिरसलयतीत्राः संयोगभाजो मनुजं प्रकुर्युः ३० वासो विदेशे जननीत्व नार्यभार्यानये वा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ओं ज्ञा॰ भ॰ यदि तिः सुखानां दे[illegible]वे सूत्या वनिजार्कजानां योगे भवेज्जन्मनि यस्य यस्य ३१ नृपात्मकं पावकयोगीत कीर्त्तिः
५१ प्रसन्नमूर्त्तिर्विजितारिवर्गः सौम्यामरेज्यास्कुलितां प्रसूतौ चेत्संभूतिः सत्यपरो नरः स्यात् ३२ स्थानाप्येस
दैभवसंभूतः स्याद्धनत्यजन्त्यो धृतिमान्सुवृत्तः [illegible] चार्येण शोकप्रज्ञा देवेधेदेकेत्रगता भवं
ति ३३ साधुशीलरहितो न नवक्रान त्यजन्त्यनमतिः खलधूर्त्तः ईश्यानतिरने[illegible]कला ज्ञो भार्गवसूश
निसंभूतिजन्मः ३४ नीचान्वयेयस्य पितानजन्मा नरः सुकीर्त्तिः पृथिवीपतिः स्यात् सहत्रिशा[illegible]लीपरि
स्नुतिकाले मंदेज्यभृक्कामिलिता यदि स्युः ३५ अथैषां न्यासः पापान्विते शीतकरे चौजनन्यांनूनं भवेन्नैध

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	३०	३१	३२	३३	३४	३५	[illegible]
सू	सू	सू	सू	सू	सू	सू	सू	सू	सू	सू	सू	सू	सू	सू	च	च	च	च	चं	पं	चं	च	चं	च	मं	मं	मं	मं	मं	मं	बु	बु	बु	बु	
व	बु	व	बृ	व	[illegible]	मं	मं	मं	बु	बु	बु	बृ	बृ	शु	म	म	म	बु	बु	बु	बृ	बृ	शु	मं	बु	बु	बु	बृ	बृ	शु	बृ	शु	[illegible]	[illegible]	
म	बु	बृ	शु	श	बु	बृ	शु	श	बृ	शु	श	शु	श	श	बु	बृ	शु	श	शु	श	शु	श	श	बृ	शु	श	शु	श	श	शु	श	श	श	[illegible]	

नमामनंति ताद्दृगदेनेशाः पितृनाशकत्रीमिश्रे विमिश्रं फलमत्रकल्प्यम् ३६ शुभान्वितो जन्मनि शीत
रश्मिर्यशोर्थम् कीर्त्तिविवृद्धिलब्धिं करोति जातं स्वकुलप्रदीपं श्रेष्ठप्रतिष्ठं नृपगौरवेण ३७ इति
ग्रहफलम् अथ राजयोगाः सहिता सकलगर्जनशीलः शुण्डिकाचलयकृन्मतिवेत्ता अस्तवः क
लिंभालेंदुर्मंगलायकिलमंगलमूर्त्तिः १ भाग्यादिभावप्रतिपादितयद्भाग्यं [illegible] भवेन्नवजराजयोगे:

न गतैं

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नगाग्निसंख्येजीतोमयूखैः खलुयः क्रमेण ग्रामान्मनुष्यैः सनसार्द्धलक्षत्रयंय[illegible] हतन्नतापात् ११ य
स्यप्रसूतौ किरणप्रमाणो मखत्रिसंख्यैः समवेन्महौजाः भूमीपतिर्लक्षचतुष्टयं हि ग्रामानशेषान्द्रसमोनसं
पत् १२ नवत्रिसंख्याजनने मयूखैर्विख्यातकीर्त्तिर्नृपतिर्भवेत्सः प्रोद्दप्रतापाद्रुरुउग्ररूपो गाढोद्धताराति
भुजंगमेषु १३ खाब्धिप्रमाणैः किरणैः प्रसूतः क्षोणीपतिः सर्वजयप्रयाणे भवेत्तिसेनागजगर्जितानां प्रति
स्वनाः खेघनगर्ज्जितानि १४ मयूखजालैः परिसूतिकालेयस्यैववेदद्वयसन्नरस्य क्षमापि वेलामलमेखला
यामवेदिन्नायाप्रतिपालकः सः १५ जमलजलधितुल्यो वा गुणाब्धिप्रमाणो भवति किरणयोगश्चेन्नराणां
प्रसूतौ अतुलवलविशालत्रासितारातिवर्गो विजलधिवलपापाः पालकः स्यात्पृथिव्याः १६ सूतौ वेदयुगप्र
माणकिरणाश्चेत्सार्वभौमः सनायत्नेनाजलधौ गलन्नखद्ज्वलादंतावलाः शैलतो यांति छत्रविचित्रिताः क
मठतांसीनध्वजामीननंनौकांत्वं तरयास्तयाथु धरूच्वः कल्लोलमालातलौ १७ पंचाब्धितश्चेत्परतो भवंति
गभस्तयो जन्मनिमानवानां नदेवतानामपि दुर्जयास्युर्द्वीपांतरोद्गीतयशोविशेषाः १८ इतिश्रीदैवज्ञसूर्यदैवय
ज्ञविरचिते जातकाभरणे रश्मिजातकाध्यायः ॥ ७ ॥ दीप्तस्तु गगनः खगो निजगृहे स्वस्योच्चितो हर्षितः शांतः
शोभनवर्गगश्च खचरः शक्तः स्फुरद्रश्मिभाक् लग्नः स्यादिह कलः स्वनीचगगृहगो दीनः खलः पापयुक् खेदो
यः परिपीडितश्च खचरैः सप्रोच्यते पीडितः १ दीप्ते प्रतापाढ्यतिनापितारिगिलन्मदालकृतकुंजरेशः नरो भवेत्त
न्निलये सलीलं पचालयालंकुरुते विलासं २ स्वस्थे महद्वाहनधान्यरत्नविशालशाला ॥ वह्नुपत्यपुत्रैः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ॐ जा॰भ॰ सेनापतिः स्यान्मनुजो महौजा वैरिव्रजावाप्तजयाधिशाली ३ हर्षिते भवति कामिनीजनात्यंतमुखप्रणयमग्नचित्तः ध
४९ र्मकर्मचररौकमानसोद्भवचमो हितशत्रुः ४ शांते तिग्मांशौ हिमद्युतिपतीनां मंत्री स्यान्नरो वहुमित्रपुत्रः शास्त्राधि
कारी सुतरां नरः स्यात्परोपकारी सुकृतैकरश्मिः ५ शा॰ क्रे तिग्मांशौ पुरुषो विशेषात्सुगंधमाल्याभिरुचिः
शुचिश्च विख्यातकीर्त्तिः सुजनः प्रसन्नो जनोपकर्त्ता द्विजनप्रहर्त्ता ६ हतवलो विकलो मलिनः सदा रिपु
कुलप्रबलत्वसमन्वितिः खलसुख स्थलसंचलितो नरः कृशनरः परकार्यगतादरः ७ दीनेति दीनो पचयेन
नेत्रः संप्राप्त भूमीपतिशत्रुभीतिः सैन्यक्रनीतिः खलु हीनकांतिः संजातवैरो हि नरः प्रयाति ८ खलाभिधाने
हि खलैः क्षतिः स्यात्कांतातिचिंतापरितप्तचित्तं विदेशयानं धनहीनता च खलोपितालस्य मतिप्रकाशः ९
पीडिते भवति पीडितः सदा व्याधिभिर्व्यसनतोपि नितांतं याति संचलनतो निजस्थलाद्व्याकुलत्वमपि वंधुचिं
तया १० इति दीप्तादिग्रहफलानि परां विभूतिं जनयत्यवश्यं वलाधिकत्वं महसः प्रवृद्धिं नानाधनं कौ
शलगौरवाणि कुर्याद्वलं स्यानवलोपपन्नः १ आशावलंयस्य भवेत्प्रकृष्टं खेटः स कोष्टान्नियमेन नीत्वा श्रेष्ठो
पलब्धिं कुरुते दशायां पुंसां निजद्रव्यविमिश्रितां हि २ शत्रुक्षये भूराजवाजिवृद्धिं शौर्यं च रत्नांवरसंपदं च लीलाविलासं वि
मलां च कीर्त्तिं कुर्याद्वलं कालवलाधिशाली ३ आचारशौचक्रमसत्ययुजाः स्वरूपास्तेजस्विनः कृतविदो द्विजदेवभक्ताः
पुष्पांवरोत्तमप्रियाश्च ------- सौम्यग्रहे वलयुतैः पुरुषा भवंति ४ सुस्नाः सुकर्म[illegible]रता निजकार्यनिष्ठाः
साधुद्विषः सकलशास्त्रतमोगुणाढ्याः क्रूरस्वभावनिरता मलिनाः कृतघ्नाः पापग्र[illegible]वलयुतैः पिशुनाश्च ४९

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

धिनैव मध्याह्नसंध्यामपि कुर्यात् अयं तु विशेषः प्राणायामानंतरमाचमनमापः पुनंत्वित्यनेन मंत्रेण
कुर्यात् तत्र वसिष्ठ ऋषिः आपो देवता अनुष्टुप् छंदः उपस्पर्शने विनियोगः मंत्रो यथा ॐ आपः पु
नंतु पृथिवीं पृथ्वी पूता पुनातु मां पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां यदुच्छिष्टमभोज्यं यद्वा दु
श्चरितं मम सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहा अस्यार्थः आपः पृथिवीं पुनंतु पवि
त्रां कुर्वंतु पृथ्वी पूता शुद्धिः पूता सती मां देवदत्तं पुनातु न केवलमापः पृथिवीं पुनंतु ब्रह्मण
स्पतिं ज्ञानस्य पतिं अपि च परमात्मानमपि पुनंतु तद्ब्रह्मपूता पूतं मां पुनातु अत्र पृथिवीपदे
न पार्थिवो देहो विवक्षितः ततश्च आपः पृथिवीं पुनंतु इति मदीयपार्थिवदेहं पुनंत्वित्यर्थः इत्थं पं
देहपावनद्वारा मामापः पुनंतु कुतः मम यदुच्छिष्टमपावनं अभोज्यं गर्हितभोज्यं यद्वा दुश्चरि १८पं४
तं असदाचरणं असतां अप्रतिग्राह्याणां प्रतिग्रहं च तत्सर्वं तत्र सर्वत्र मामापः पुनंत्वित्यर्थः इत्यमा
शास्य या आपः आचाम्यंते ताः स्वाहा सुहुता भवंतु आपः आचमनेन मदीयदेहपावनपूर्वं मु
च्छिष्टत्वादिरूपपापेभ्यो मां पावयंत्वित्याशंसा वा कार्या अत्र पतिरिति सुपां सुपो भवंतीति द्वितीया
यां प्रथमा ब्रह्मपूता इति पूतमिति प्राप्ते लिंगव्यत्ययेन स्त्रीलिंगता सर्वमिति सप्तमीस्थाने द्वितीया शिव ५२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नरस्तस्मै दीधावति धस्त्रायोः कुरुषेत्मोवासन्तस्माणि च यद्धर्त्ते तेनरस्तस्मै दीधावति तथा रुद्रस्य अथ सुरायः
कंठमात्रमुदकमवतीर्य स्थित्वा सोमस्य प्रसूतिमादाय ॐकारेणाभिमंत्रयित्वा पिबेत् ततो निमज्ज्य मा
नस्तोकं जपेत् तस्मात्पूतो भवति ब्राह्मणसुवर्णहरणं कृत्वा हिरण्यं शालायां प्रक्षिप्य अनिमज्ज्य मा
नस्तोकं जपेत् तदेतस्मात्पूतो भवति मंत्रो यथा ॐ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो
अश्वेषु रीरिषः मा नो वीरान् रुद्र भामिनो वधीर्हविष्मंतः सदमित्त्वा हवामहे तत्र मा नस्तोकस्यायाः कुत्स
ऋषिः रुद्रो देवता जगती छंदः शतरुद्रीहोमे विनियोगः अस्याः कंडिकाया रुद्रस्य देवतात्वात् रु
द्र एव संबोध्यते हे रुद्र मा नस्तोके तनये रीरिषः नोऽस्माकं तोके ऽपत्ये तनये पुत्रे मा रीरिषः मा
नः हिंसां कुरु षेत्यर्थः तथा अस्माकं आयुषि मा रीरिषः मा हिंसां कुरु षेत्यर्थः तथा मा नोऽस्माकं
अस्मत्संबंधिनो वीरान् दर्पाऽहंकारिणः पुरुषान् तथा अस्माकं रुद्र भामिनः उग्रक्रोधयु
क्तान् पुरुषान् मा वधीः मा घातय यस्मात् हविष्मंतो वयं सदमित् सदैव त्वां हवामहे यस्मात् ह
विर्हीत्वा यत्तकरणार्थं त्वां सदैव प्रार्थयामऽत्यर्थः इति मा नस्तोकमंत्रव्याख्या इति स्नानं स
माप्य जलादुत्तीर्य धौते वाससी परिधाय प्रक्षालितपादः पवित्रपाणिराचम्य प्रातः संध्योक्तवि

मध्याह्नविधिः इति ×२
स्नान ×

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

लं च चतुर्विंशत्यक्षराणि कामे वा एककवारेण पठेदित्यर्थः अनेन क्रमेण वारत्रयं गायत्रीपाठः पर्यवसतीति
तथा प्रणवव्याहृतिशिरःसहितगायत्र्यधिकारे विष्णुधर्मोत्तरपुराणयोः अंतर्जले त्रिरावर्तयेद्गा
यत्रीं प्रत्यहं तथा मुच्यते पातकैः सर्वैः यदि न ब्रह्महा भवेत् तथा अंतर्जले व्यस्तसमस्तसमस्तव्याहृ
तिपाठपूर्वकस्नाने बौधायनः अपि वा व्याहृतीर्व्यस्ताः समस्ताश्चात्रिरंतर्जले पठन् सर्वस्मात्पापा
त्प्रमुच्यते तत्र व्यस्तसमस्तव्याहृतिभिर्यथा ॐभूः ॐभुवः ॐस्वः एतान् त्रिरावर्त्य स्नायात् तथा रहु ॐ भूर्भुवः
स्येव रूयमः अथ चांडालादिकुले शौंडिककुले म्लानिककुले दाभिकाभिशस्तकुले अन्यस्मिन् वा स्वः ४
अभोज्ये पापकर्मणः प्रतिगृह्य विधितो भूत्वा ग्रामात् प्राचीमुदीचीं वा दिशमभिनिःक्रम्य पथि
कांश्चोदेशे अप्सु परिप्लवमानः तरत्समंदीं जपति ॐकारपूर्वा व्याहृतीर्वा आवर्तयेत्स्मात्पापा
त्पूतो भवति तत्र तरत्समंदी ी मंत्रमाह तत्त्व गौतमः चतुर्वारीं तरत्समंदीयमप्सु जपेत् प्रतिग्रा
ह्य प्रतिजिघृक्षन् प्रतिगृह्य वा अभोज्यं वा भुक्त्वा माणः पृथिवीमावपेदृत्वं तु रारमणा उदकोपस्प
र्शनाच्छुचिरेके स्त्रीषु अस्य च अवत्सार ऋषिर्गायत्री छंदः सोमो देवता मार्जने विनियोगः मंत्रो य
था ॐ तरत्समंदी धावति धारा सुतस्यांधसः तरत्समंदी धावति उस्रा वेद वसूनां मर्तस्य देव्यवसः शिव:

ध: ऋचं: ५२

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

302

द्रुतं द्रुपदां वा शतं जपेत् योगी याज्ञवल्क्यः आचांतोयुनराचामेत् मंत्रवत्स्नानभोजने द्रुपदां तु
त्रिरावर्त्य तथा चैवाघमर्षणं सोयं मूप्रणवं वापि धाता आपोहिष्ठापापस्तः तथा कोकिलो राज
पुत्रस्तु द्रुपदा याज्ञरोषिः स्मृतः अनुष्टुप्छंदो आपोदेवत्यं सौत्रामण्यवभृथस्नाने च वि
नियोजनं अस्य च मंत्रस्य वाव्योर्हिकं प्रातः संध्यायामेव लोरिवतमिति तत्रैव तदनुसंधेयमि
ति तदनु अधिकपापनिवर्हणे छुरं तज्जले एव सप्रणवसप्तव्याहृतिसाहितसशिरस्कगायत्र्या प्रा
णायामत्रयं कृत्वा स्नायात् यथा सशिरस्कगायत्रीप्रकरणे शंखः प्राणायामत्रयं कृत्वा स्ना
नकाले समाहितः अहोरात्रकृतात्पापात्तत्क्षणादेव मुच्यते तथा त्रिपदासावित्रीप्रकरणे
बौधायनः अपि वा सावित्रीं पच्छोऽर्धर्चशः ततः समस्तां त्रिरंतर्जले पठन् सर्वस्मात्पापात्प्रमुच्य
ते पच्छ इति पदशः पदेन पदेनेत्यर्थः एकैकपदेन गायत्र्याः पदत्रयं पठेदित्यर्थः ॐ तत्सवितु
र्वरेण्यमित्येकं पदं ॐ भर्गो देवस्य धीमहि द्वितीयं ॐ धियो यो नः प्रचोदयादिति तृतीयं अ
र्धर्चशः इति अर्धर्चक्रमेण पूर्वार्धभागं पठित्वा उत्तरार्धं पठेदित्यर्थः तत्र ॐ तत्सवितुर्वरे
ण्यं भर्गो देवस्य धीमहि इत्यर्धं प्रथमं ॐ धियो यो नः प्रचोदयादिति अपरमर्धं समस्तां सक

इति

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

करोति चंद्र एव रात्रिं करोति ततः सूर्यचंद्रयोः उत्पत्त्यनंतरं संवत्सरोऽजायत समुत्पन्नः सूर्यचंद्रो
त्पत्त्यनंतरं रात्रिदिवसविभागे सति संवत्सरव्यवस्थाभवतीत्यर्थः अथाऽनंतरं दिवं च पृथि
वीं चांतरिक्षं च स्वश्च एतान् लोकान् स एव धाताऽकल्पयत् सृष्टवान् चराचरात्मकसकल।
लोकानेव स धाता सृष्टवानित्यर्थः तत्र स्वः शब्देन नक्षत्रलोकोपरिस्थस्वर्गलोक उच्यते दिवः
शब्देन तदूर्ध्वस्थमहर्लोकादि लोकचतुष्टयं तदनेन मंत्रेण सृष्टिस्थितिप्रलयाः प्रतिपादिताः
विदधादिति द्विवचने एकवचनं अर्णवइति अर्णः शब्दात् वसलोपश्चेति वप्रत्ययः सकारलो
पश्च इत्यघमर्षणमंत्रव्याख्या ततोऽघमर्षणस्नानानंतरं स्नानं तज्जले निमग्नीभूय द्रुपदां
त्रिरावर्त्य स्नायात् द्रुपदामंत्रमस्ताल्पो बृहस्पतिः द्रुपदानामयो मंत्रो वेदे वाजसनेयके अं
तर्जले त्रिरावर्त्य सर्वपापैः प्रमुच्यते योगियाज्ञवल्क्यः द्रुपदानाम सा देवी यजुर्वेदे प्रतिष्ठि
ताअंतर्जले त्रिरावर्त्य मुच्यते ब्रह्महत्यया हारीतः पवित्रमसि द्रुपदादिवेति चाघमर्षणमंत
र्जले त्रिरावर्त्य मुच्यते ब्रह्महत्यया बौधायनः द्रुपदादिव मुमुचानेत्येतामृचं त्रिरंतर्जले पठन्।
सर्वस्मात्पापात्प्रमुच्यते पाराशरः आपत्काले तु विप्रेण भुक्त्वा शूद्रगृहे यदि 'मानस्तोके न शु शिव.

मनस्तापेन=९

प.

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तिअग्रासीदित्यध्याहार्य्यं तेनायमर्थः ऋतंचसत्यंचपरंब्रह्मआसीत् एतेनमहाप्रलयावस्थाप्रति
पादिता महाप्रलयसमयेकेवलंपरंब्रह्ममात्रमासीदित्यर्थः ततस्तदनंतरंमहाप्रलयावस्था
यामेवरात्रिरजायतरात्रिःसमस्तमिदंसकलमंधकारमयमासीदित्यर्थः तथाचस्मृतिः आसी
दिदंतमोभूतमप्रज्ञातमलक्षणमिति ततस्तदनंतरंमहाप्रलयावसानेसृष्ट्यारंभसमये
तपसः अदृष्टात् किंभूतात् अभीद्धात् सर्वतोभावेनदीप्तात् सर्वतोगतवृत्तिलब्धादित्यर्थः
एवंभूतादृदृष्टात् पुनःसमुद्रोअजायत किंभूतः समुद्रः अर्णवः अर्णःपानीयंतदस्यास्तीति
अर्णवःपानीययुक्तःसमुद्रः अर्णवः अर्णःपानीयंतदस्यास्तीति अर्णवःपानीययुक्तःसमु
संजातइत्यर्थः प्रथमतःसकलसृष्टिनिमित्तंजलराशिरुत्पन्नइत्यर्थः तथाचस्मृतिः अपए
वससर्जादाविति ततस्तदनंतरंसमुद्रादर्णवात् धातास्रष्टाऽजायत किंभूतोधातानिमिष
तःअप्रकटीभवतोविश्वस्यवशीप्रभुःमहाप्रलयेनविलुप्तस्यास्यत्रैलोक्यस्यनिर्माणेप्रभु
रित्यर्थः सधातायथापूर्वंयथाक्रमेणसूर्याचंद्रमसौअकल्पयत्निर्मितवान् किंभूतौसू
र्य्याचंद्रमसौअहोरात्राणिविदधत् अहोरात्रानकुर्वाणौदिवारात्रिंकुर्वाणौ सूर्यएवदिवसं

[illegible marginal note]

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

305

मिषतोवशी सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः अस्या
घमर्षणमंत्रस्यव्याख्यायां हृदिप्रकंपोजायते यतःसर्ववेदसारभूतोऽयंमंत्रःप्रसिद्धोऽयंमंत्रः अस्य
पदपाठमात्रंचनास्तिब्राह्मणानिरुक्तादिकमप्यस्यनास्ति ऽस्यमेतद्दीपव्याख्यानुगुणंकमप्यु
पायमप्राप्यदेवस्यस्वकपोलमात्रेणव्याख्यानमाचरामीयंतद्दृष्टिसाहसं योगियाज्ञवल्क्ये
नतु मन्त्रभूतास्वपिउक्षिप्तस्यान्तिप्रलयनतथा सूक्तोऽस्मिन्व्याख्येमेतत्त्वमंत्रार्थएववेदतिकथ
नात् सृष्टिस्थितिप्रलयार्थतात्स्यप्रतिपादिता पुराणमहाभारतादिषुपिसृष्टिस्थितिप्रल
यप्रतिपादकार्थग्रंथभागाःसमासतस्तेषांचश्रवणेनकीर्तनेनमहान्फललाभःप्रतिपादितः
तदेतत्सकलवेदसारभूतस्यसृष्टिस्थितिप्रलयप्रतिपादकाऽघमर्षणस्तानमंत्रादिनाचतत्रा
ऽस्तिविततनानामुनिवचनप्रतिपादितफलमप्यस्त्वमुपपन्नमेव किंवास्मिन्ग्रंथेसकलकर्म
कांडोचितमंत्रव्याख्यानस्यैवमुख्यत्वाद्यस्यसारभूतमंत्रस्यैवव्याख्यानंनक्रियते तदाग्रंथस्या
सांगताभवेदित्येतादृशदोषभयमात्रेणस्वप्रतिभानुरूपमेतन्मंत्रव्याख्यानमेतत्क्रियते तथा
ऋतंचसत्यंचेतिपरमंब्रह्मउच्यते तथाचश्रुतिः ऋतमेकाक्षरंब्रह्मसत्यंज्ञानमनंतंब्रह्म

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

कृशानुं अपरिमितं वा उदितेषु नक्षत्रेषु प्रसृतं यावकं प्राश्नीयात् स्नानकृतेभ्यो ऽस्नानकृतेभ्य
श्च उपपातकेभ्यश्च सप्तरात्रात्मुच्यते द्वादशरात्रान्महापातकान्गुरुतल्पगं सुवर्णस्तेयं सुरापा
नमिति वर्जयित्वा एकविंशरात्रेणापि जयति सर्वं तरति सर्वं जयति सर्वक्रतुफलमाप्नोति सर्वे
तीर्थेषु स्नातो भवति सर्ववेदेषु स्नातो भवति सर्ववेदव्रतचीर्णव्रतो भवति सर्वैर्देवैर्ज्ञातो भ
वति आचक्षुषः पंक्तिं पुनाति कर्माणि चास्य सिध्यंति बौधायनः व्रतेनाघम
र्षणेन सुरापः पूतो भवति अघमर्षणेन व्रतेनो योगियाज्ञवल्क्यः तत्वभूतास्य पिंड
स्थितस्य तिष्ठ प्रलयं तथा सृष्टिं स्मिन् व्याहृतमेतत् तत्त्वमंत्रार्थ एष वै तथा अघमर्षणसूक्तस्य
ऋषिरेवाऽघमर्षणः अनुष्टुप्च भवेच्छंदो भाववृत्तश्च दैवतं अश्वमेधावभृथके विनियोगः प्र स
कीर्तितः सर्वपापप्रणोदार्थं स्मृतिकारैरुदाहृतः व्यासः अघमर्षण एवार्षं छंदोनुष्टुप् तथै
व च देवतो भाववृ[illegible] हृदयमेधे प्रकीर्तितः अघमर्षण ऋषिर्भाववृत्तो देवता ऽनुष्टुप् छं
दः अश्वमेधावभृथे विनियोगः मंत्रो यथा ऋतं च सत्यं चाभीद्धात्तपसो ऽध्यजायत ततो रा
त्रिरजायत ततः समुद्रो ऽर्णवः समुद्रादर्णवादधि संवत्सरो ऽजायत अहोरात्राणि विदधद्विश्वस्य

विनियोगः ३=

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

बा

वाविशेषतः अग्निं प्रविश्य शुध्यंति स्नात्वा वा महति कृतेनो रहस्यकरणे चेदं मासमभ्यस्य पौरुषं अघम
र्षणं सूक्तं वाप्सु षेंतो जले स्थितः वृद्धयमः अथ ब्रह्महत्यां कृत्वा प्राचीमुदीचीं दिशमुपनिःक्रम्य
प्रमत्तेनेंधनेनाग्निं प्रज्वाल्य अघमर्षणं चाष्टसहस्रमावर्त्य जुहुयात् तस्मात्पापात्पूतो भवति
हारीतः अघमर्षणमंतर्जले त्रिरावर्तयित्वा मुच्यते ब्रह्महत्यया अत्रिः क्षत्रियावैश्याभिगमने अ
घमर्षणं त्रिरावर्त्य तज्जले शुध्यति वृद्धापस्तंबः अकार्यकरणे चैव अथाभक्ष्यभक्षणे अ
घमर्षणसूक्तेन पीत्वापः शुध्यते द्विजः अत्रिः अपेयं पीत्वा अभक्ष्यं भक्षयित्वा अकार्यं कृत्वा अ
घमर्षणेनापः पीत्वा शुध्येत् वसिष्ठः मनसा पापं कृत्वा अघमर्षणं पठेत् वृद्धापस्तंबः क्षत्रिया
गमने वैश्यागमने चैव तापसी त्रिरावर्त्य शुद्धः स्यात् शूद्रागमने अघमर्षणं तापसीमिति त्र्यवमि
त्र्यर्थः शंखलिखितौ ब्रह्महा त्रिरात्रोपोषितोंऽतर्जलेऽघमर्षणं त्रिरावर्तयेत् योगियाज्ञवल्क्यः
त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणं अंतर्जले विशुध्येत दत्वा गां तु पयस्विनीं प्रकाशविष
धा ये बौधायनः तीर्थं गत्वा स्नात्वा ततः शुचिवासा उदकांते स्थंडिलमुद्धृत्य सकृत्क्लिन्नेन वा
ससा घृतपाणिना आदित्याभिमुखो अघमर्षणं स्वाध्यायमधीयीत प्रातःशतंमध्या शिव.

कृतपूर्वेण: तथाशूद्रागमनेघमर्षणेनापः पीत्वाशुध्येत् ×६

अकार्यकरणे चैव अभक्ष्यभक्षणे ×६

त्रिराव्रतेनेनत्रितयः = १ स्नानाचरणमित्येतदुपदिष्टं स्वयंभुवा अघमर्षणसूक्तेनाश्वमेधावभृथेन च २

महैव तैर्मन्त्रैर्मार्जनं प्राणसंयमः अघमर्षणसूक्तेन अश्वमेधावभृतसमं जलनिमग्नः प्राणान्सं
यम्य त्रिरावर्त्याघमर्षणसूक्तेन स्नायादित्यर्थः शंखः नास्त्यघमर्षात् अंतर्जले गौतमः अंतर्जले वा स्नावमानः ४
अघमर्षणं त्रिरावर्तयन् सर्वपापेभ्यो विमुच्यते अत्रिः अपि चाप्सु निमज्जानः त्रिः पठेदघमर्षणं
यथाश्वमेधावभृथं तथैतन्मनुरब्रवीत् वसिष्ठः अपि चाप्सु निमज्जानः त्रिः पठेदघमर्षणं
यथाश्वमेधावभृथं तादृशं मनुरब्रवीत् वृद्धापस्तंबः अपि चाप्सु निमज्जित्वा त्रिः पठेदघमर्ष
णं यथाश्वमेधयज्ञोऽस्ति मनुस्तादृशमाह तत् बौधायनः त्रिरात्रं वाप्सुपवसन् त्रिरह्नो ऽप्युपयन्त्र
यः प्राणानात्मनि संयम्य त्रिः पठेदघमर्षणं यथाश्वमेधावभृथमेवं तन्मनुरब्रवीत् योगीया २
ज्ञवल्क्यः त्र्यहं चोपवसेद्यस्तु त्रिरह्नोऽप्युपयन्नपः मुच्यते पातकैः सर्वैर्जप्त्वा त्रिरघमर्षणं रहस्ये
व्रतयमः मातरं भगिनीं गत्वा मातृस्वसारं स्नुषां सखीं अगम्यागमनं गत्वा पापां वपेदघमर्षणेन
तु अंतर्जले त्रिरावर्त्य एतस्मात् पूतो भवति तथा अयथागुरुतल्पगमनं कृत्वाऽघमर्षणमंतर्जले
त्रिरावर्त्य तदेनस्मात् स्नातकात् पूतो भवति अत्रयापगौरवमाकलय्यैतेनैमासेकं यावत्स्वपत्तं जले मनसा
निमग्नीभूयाऽघमर्षणसूक्तं त्रिरावर्त्य स्नातव्यं तथा च लघुयमः महापातककर्त्तारश्चत्वारो
संयः४

308

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तिः तत्र प्रजापतिऋषिर्वाक्पतिर्देवता यजुश्छंदो नासिकयजमानपवने विनियोगः द्वितीयमंत्रो यथा
ॐ वाक्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने
तच्छकेयं अत्र वाक्पतिर्बृहस्पतिः अपरा सकलैव व्याख्या चित्पतिव्याख्यानेन तुल्या तथा प्रजापति
ऋषिः सविता देवता यजुश्छंदो नासिकयजमानयापवने विनियोगः तृतीयमंत्रो यथा ॐ देवो मा सवि
ता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयं
तत्र च देवः सविता सूर्यः अपरं सर्वं चित्पतिमंत्रेण तुल्यं इति चित्पत्यादिमंत्रव्याख्या ततो जलेनि
मग्नीभूय अघमर्षणमंत्रं त्रिरावर्त्तयेत् तत्राघमर्षणमंत्रस्य माहात्म्यं बौधायनः ऋतंच धा:
सत्यंचेत्यघमर्षणमंत्रं त्रिर्जले पठन् सर्वपापात्प्रमुच्यते व्यासः ऋतंचेति जपन्नप्सु स्नात्वा यमाम
रणांतिकं मनोवाक्कायजं सर्वं मर्षयेदघमर्षणमिति योगियाज्ञवल्क्यः त्रीणि लोकानि मां
स्तोन्दिद्विः पठेदघमर्षणं यथाश्वमेधावभृथ एवं तन्मनुरब्रवीत् तथा यथाश्वमेधः क्रतुरा
ट् सर्वपापापनोदकः तथाघमर्षणं सूक्तं सर्वपापप्रणाशनं हारीतः पातकोपपातकानां स
न्निपातेऽघमर्षणमेव जपेत् अथातः सर्वदैवपवित्राणामभवंतीत्यधिकारे वसिष्ठः स्नान शिव:

न

४०

क्रमस्तापात ४२
यथाश्वमेध इति पूर्ववत् यो
गियाज्ञवल्क्यः ४१

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तीर्थावाहनं अस्यापि मंत्रस्य व्याख्यादिकमत्रैव मध्याह्नस्नाने लिखितत्वादिह पुनर्न लिखि
तमिति तत्रैवानुसंधेयमिति तीर्थावाहनानंतरं आपोहिष्ठेति तिसृभिर्मार्जनं कुर्यात् अ
स्यापि मंत्रस्य व्याख्यादिकं प्रातःस्नाने एव लिखितत्वादिह न लिखितमिति तत्रैवानुसंधे
यं एतन्मार्जनानंतरं चित्पतिरित्यादिमंत्रत्रयेण पुनर्मार्जनं तत्र प्रजापतिऋषिः प्रजाप
तिर्देवता यजुश्छंदो नास्ति यजमानपावने विनियोगः मंत्रो यथा ओं चित्पतिर्मा पुना
त्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छके
यं अस्यार्थः चित्पतिः प्रजापतिः मां पुनातु पवित्रं करोतु केन पवित्रेण कुशेन किंभू
तेन अच्छिद्रेण अखंडितेन न केवलं कुशेन सूर्यस्य रश्मिभिः अपि मां पुनातु हे पवित्रपते पवि
त्राणां पूतं जनं ते तव अहं सूनुः तस्य मम किंभूतस्य पवित्रपूतस्य पवित्रेण पवित्रीकृतस्य यत्कामो
यदभिलाषी तच्छकेयं प्राप्नुयां किं तदभिलाषितं पुनेऽप्यात्मानं पावयामीत्यभिलाषितं अयं
वाक्यार्थः प्रजापतिना कुशसूर्यरश्मिभ्यां पावितस्य मम जलेनात्मानं पावयामीति यदभिल
षितं तत्राहं शक्तो भवामि चित्पतिशब्देन प्रजापतिरुच्यते तत्र प्रजापतिर्वै चित्पतिरिति श्रु

पाहि रक्ष अत्रापि पाहीति मध्यमपुरुषांतक्रियापदस्य मा कोत्तत्वान्मामिति कर्मपदं त्वमिति क
र्तृपदं चाध्याहरणीयं कस्मात्पाहि देवकृतैषः देवा हिंसारूपात्पापात् पुनः किंभूतात् गुरुरावाः
बहुपापफलप्रदानात्मकात् अत्रापि देवहिंसारूपपापोपदर्शनं पंचमस्यायत्नापनेयपापो
पलक्षणार्थं अयमत्रवाक्यार्थः यतो मया वैश्वदेवाद्यकरणपापं प्रत्विजः सहकारिणः कृ
तादेवत्वेषणोऽपनीतं अतो हे अवभृथ त्वं मां देवहिंसारूपात्पापात् रक्ष यत्केनचिदुक्तमव
भृथस्नानमप्यापो करणीयं तत्रचतुपाद्य अवभृथे ह्याचरंतीति श्रुतिः प्रमाणत्वेनालीवितात
दयुक्तं अवभृथस्नानावभृथेष्टयोर्भिन्नत्वात् अनयाचक्रस्या अवभृथेष्टेरेव तु पाद्यचरणप्र
तिपाद्यते न त्ववभृथस्नानस्यापि गुरुरावाः इति गुरुपदं बहुत्वाच्च कराद्दान इत्यस्माद्धातो
र्मतिप्रत्ययनिपूर्वानिपश्चेतिवार्तिप्रत्यये कृते गुरुपर्वात्पचम्यारूपं देवरिष इति रिषा हिंसा
यामित्यस्मात् देवपर्वात्क्विपि कृते पंचम्यारूपं इत्य वभृथनिचुंपुणमंत्रव्याख्या ततः
समुद्रेते इति मंत्रेण चमनं अस्य च मंत्रस्य व्याख्यादिकमप्यपरिलिखितं प्रातःस्नानएव
लिखित्वाद् लिखितं इति तत्रैवानुसंधेयमिति इत्याचमनानंतरं इमं मे गंगे यमुने इति मंत्रेण पुन शिव
रपुनते ५.२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पानायइति विशेषणोवोरुच्यः इति शन्नोदेवीमंत्रव्याख्या ततोजलेनिमज्यमंत्रंपठित्वानिर्मज्जनात्
तत्रप्रजापतिऋषिर्यज्ञोदेवतायजुष्टाछंदोनास्तिजीषकुंभमज्जनेविनियोगः मंत्रोयथा अवभृ
थनिचुंपुणनिचेरुरसिनिचुंपुणः अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेव ३
१४ रिषस्पाहि अस्यार्थः हे अवभृथयज्ञसमाप्तिस्नानकिंभूतनिचुंपुणव्रलहादिभिरपिनीचैराव
र्थमाणंभवानीतिनिचुंपुणः त्वंनिचेरुरसित्वंनीचानपिरोषिअपादापसिपापंतपेत्यर्थः नि
चुंपुणअसिभवसिअशोतिसप्रमपुरुषदर्शनात् त्वामित्यध्याहृयते अहंएनःपापंअव
यासिषंअपनीतवानस्मि अत्रापिअवयासिषमित्यत्रअवइत्यनेनव्यवाहितेनसंबंधः उत्त
मपुरुषदर्शनात् त्वमित्यध्याहार्यं किंभूतमेनः देवकृतंदेवविषयेकृतंवैश्वदेवाकरणेन
१ कृतंकेरवयासिषंदेवैर्द्विदी... तेनोविहितैः किंचमर्त्यकृतमर्थेनअवयासिषं अत्रापि
अववेति अनंतराख्यितेनसंबंधः मर्त्यामनुष्याः तद्विषयेकृतंअतिथिपूजनेनकृतमि
त्यर्थः केरवयासिषंमनुष्यैर्युतकर्माणिक्रियतेभ्यतेः अत्रवैश्वदेवातिथिपूजनयोः उपादा
नंपंचमहायज्ञोपलक्षणार्थं यतोऽहंनित्यहोमादिकरणेनपापमपनीतवान् अतोमा
या

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

सरं शिलान्यासः अकर्त्रे वो गृहाणां श्रवणे मृगे पौष्णे हस्ते च रोहिण्यां पुष्यादित्ये उत्तरा च [illegible] वास्तुप्रदीपे अधो
मुखैर्भैर्विदधीत वर्त्म शिलास्तंभे ऊर्ध्वमुखेश्च पट्टं तिर्यङ्मुखैर्द्वारकपाटयानं गृहप्रवेशो मृदुभि ध्रुवैश्च
लक्षैः स्नानं च पाकशयनं च भोज्यं गजालयं वाजिगृहं धनस्य देवस्य पूर्वादि दिशि क्रमेण मध्ये सभामस्य
निवेशनाय शिल्पिशास्त्रे कन्यासिंहे तुलायां भुजगपतिमुखं चैशमुकोणे निखातं वायव्ये स्याच्च दास्ये
त्वलिधनमकरे वह्निखातं वदंति कुंभे मीने च मेषे निरृति दिशि मुखं खातवायव्यकोणे मुखे वृष
मिथुनगते कर्कटे रक्षखातं तत्वचिंतामणौ यत्र देवगृहादीनां च चिंता कृतानोधिकं तत्रैव चिंतये वा
मानगुणान्यवाद्यादिकान् राजमार्तंडः आयव्ययौ मासशुद्धिं न गणागारे न चिंतयेत् शिलान्यासा
दिन कुर्यात्तु धागारे पुरातने व्यवहारतत्वे निषिद्धे पि काले पुत्रानुकूले शुभे दिने तृणकाष्ठगृ
हारंभे मासदोषो न विद्यते चंडेश्वरः पूर्णादि च षष्ठीयावत् पूर्वास्यं वर्जयेद् गृहं उत्तरास्यं न कुर्वीत
नवम्यादि चतुर्दशी अमावास्या षष्ठीयावत् पश्चिमाशां विवर्जयेत् नवम्यादौ न याम्यं यावत्
कृष्णचतुर्दशी ध्रुवं द्वाष्यवास्तवाकर्तव्यं वास्तुरोपणं सायाह्नवर्जे दिवसे रात्रौ त्वकामहा
नित्रां वा राहुः दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत् प्रथमां शेषाः प्रदक्षिणेन स्तंभ[illegible]वसम
न्याप्याः कालादर्शे वास्तुशास्त्रे खाते चैव शिलान्यासे वृषचक्रं प्रशस्यते नंद्यावर्त्त शान्तिरत्ने चतु
र्हस्तप्रमाणेन खातं वा गर्त्तसमं ततः कुंभोदकः सेचयेत् शान्तिपाठपुरःसरं ततईशानदिकुमार्गे

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

सात्वतंरत्नयंकजं सांद्रंच कुंभं स्थिरं शुभ्रकाश्वा वास्तुपूजनपूर्वकं कुंभोपरि शिलान्यासः कर्त्तव्यः स्तंभनंतरं अथगृह
प्रवेशः बृहस्पतिः नंदायां दक्षिणद्वारं भद्रायां पश्चिमेन तु जयायामुत्तरे द्वारं पूर्णायां पूर्वतो विशेत् वसिष्ठः कृ
त्वाग्रतः पृष्ठतो वामतोर्कं विप्रान्पूज्यानग्रतः पूर्णकुंभं हर्म्यं रम्यं तोरणास्रग्वितानैः शोभं स्वस्तिगीतवाद्यै
र्विशेच्च व्यवहारतत्त्वे सौम्यायने ष्पावणमार्गपौषजन्मर्क्ष लग्नोपचयोदयांशे वामंगतेर्के गृहवास्तुपू
जां कृत्वा विशेद्धस्तमभकूटशुद्धे वास्तुशास्त्रे लग्नात्प्रागादिनो दिक्षौ होरा शिनियोजयेत् एकमेकं
न्यसेत्कोणे सर्पवामं विचिंतयेत् वसिष्ठः चंद्रज्ञार्यसितेन वासरेषु श्रीकरस्तनमहार्घ्ये लाभदं सूर्यभू
जदिवसे स्थिरप्रदं किंतु चौरभयमचनिर्दिशेत् रत्नकोशे भध्येधनिष्ठामृदुवारुणेषु त्वापमुवदो
त्तरासु चोत्तरासु अक्षीणचंद्रे शुभदो नृपस्य तिथ्याविरिक्ते च गृहप्रवेशः नारदः प्रवेशो मध्यमो ज्ञे
यः सौम्यकार्त्तिकमासयोः माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः एकपाटमनाधन्नमदत्तंव
लिभोजनं गृहं नाप्रविशेद्धीमांकरोहितं ततः प्रवेशस्तु वास्तुपूजां कृत्वा कार्यः जीर्णोद्धारे तथोद्याने तथा
गृहनिवेशने नवप्रसादभवने प्रसादपरिवर्त्तने द्वाराभिवर्द्धने तत्त्वप्रसादेषु गृहेषु च वास्तूप
शमनं कुर्यात्पूर्वमेव विचक्षणः इति मात्स्ये तत्रैव कृत्वाग्रतो द्विजवरानथ पूर्णकुंभं दध्यक्षताम्र
दलपुष्पफलोपशोभं दत्वा हिरण्यवसनानि तथा द्विजेभ्यो मांगल्यशांतिनिलयं स्वगृहं विशेच्च गृहो
क्तहोमविधिना बलिकर्म कुर्यात् प्रासादवास्तुशमने च विधिर्य उक्तः संतर्पयेत् द्विजवरानथ भक्ष्य

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

315

ओम् नि० सि० होमपूर्वकं पाणिकर्मणि शुद्धिः स्यादिति तस्मिन्नशुध्यति अलाभे सुमुहूर्तस्य रजोदोषे च संगते श्रियं सं-
४५ पूजनं कुर्यात् पाणिग्रहणमंगले हैमीं माषमितां पद्मां श्रीसूक्तेन विधिनार्चयेत् प्रपूज्य पादसंयुक्ता
अभिषेकं समाचरेत् अथैकक्रियानिर्णयः ज्योतिर्निबंधे बृहस्पतिः एकमातृकयोरेकवत्-
सरे पुरुषस्त्रियोः न समानक्रियां कुर्यान्मातृभेदे विधीयते एतेनैकस्य पुंसो विवाहद्वयमेक-
दिने निषिद्धं मातृभेदाभावात् नारदः पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये न तयोर्व्रतमुद्वा-
हात्मंडनादपि मुंडनं वराहः विवाहस्त्वेकजातानां षण्मासाभ्यंतरे यदि असंशयं त्रिभिर्वर्षै-
स्तत्रैका विधवा भवेत् मदनरत्ने वसिष्ठः दरभ्रातृविवाहकृत्यं स्वसुरैर्नेपाणिग्रहणं विधेयं
मदन षण्मासमध्ये मुनयः समूचुर्न मुंडनं नोपि कार्यं मृतदयवा दस्तत्रैव ऋतुत्रयस्य मध्ये वेद
स्याद्वस्य प्रवेशनं तद्वाहे कोदरस्यापि विवाहस्तु प्रशस्यते सारावल्यां फाल्गुने चैत्रमासे
तु पुत्रोद्वाहोपनायने भेदाद्वत्सरस्य कुर्वीत नर्त्तुत्रयविलंबने संहिताप्रदीपे ऊर्ध्वं विवा-
हात्तनयस्य नैव कार्यो विवाहो दुहितुः समार्धं अप्राप्य कन्यापक्षसुरालयं च वधूप्रवेशया-
त्वगृहं नचादौ मदनरत्ने वसिष्ठः छिन्नोमनंत्वेकगृहेपिनेष्टं शुभमेतुपश्चान्नवभिर्दिनै-
स्तु आवश्यकं शोभनमुत्सवो वा द्वारेथवाचार्यविभेदतो वा एकोदरस्थसुतानां नामि रामायनमः

५२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

शांतिं विधाय गां दत्वा वाग्दानादि समाचरेत् पुनः शिवे शांतिं किं नाय करांतिः तथैव मेधातिथिः सं
कटे समनुप्राप्ते यात्रावत्वैव तयोगिरा शांतिं कृत्वा गणेशस्य कृत्वा तां शुभमाचरेत् प्रतिकूले न क
र्तव्यो गर्भे ह्यावहं तु त्रयं प्रतिकूले एकवर्षे त्वामित्याहुर्वृद्धिविवर्जिते प्रतिकूले सपिंडे तु स्या मासमेकं
विवर्जयेत् ज्योतिःसारे दुर्भिक्षे राष्ट्रभंगे च पित्रोर्वा प्राणसंशये प्रौढायामपि कन्यायां नानुकू
ल्यं प्रतीक्ष्यते मेधातिथिः पुरुषत्रयपर्यंतं प्रातिकूल्यं स्वगोत्रिणां प्रवेशाच्च निर्गमस्तद्वत्तथा मुंड
न मुंडने प्रेत्यकर्मणि निर्वत्य चरेन्नाभ्युदयक्रियां आचतुर्थं ततः पुंसि पंचमे शुभदं भवेत्
अथ रजोदोषनिर्णयः माधवीये प्रारंभात्प्राक् विवाहस्य माता यदि रजस्वला निवृत्तिस्तस्य
विज्ञेया सह स्वश्रुतिचोदनात् प्रारंभो नांदीश्राद्धात् नांदीमुखं विवाहादौ वित्यादिनात्तस्य
वप्रारंभोक्तेः मेधातिथिः चौले च व्रतबंधे च विवाहे यज्ञकर्मणि भार्या रजस्वला यस्य प्राय
स्तस्य न शोभनं वधूवरान्यतमयोर्जननी चेद्रजस्वला नस्याः शुद्धेः परं कार्यं मांगल्यं मनुर
ब्रवीत् वृद्धमनुः विवाहव्रतचूडासु माता यदि रजस्वला तदा न मंगलं कार्यं शुद्धे कार्यं शु
भे शुभः गर्गः यस्योद्वाहादि मांगल्ये माता यदि रजस्वला तदा न तत्प्रकर्तव्यमायुः क्षयं
करं यतः नांदीश्राद्धोत्तरं रजोदोषे तु कर्यादिकारिकासु सूतिकोदक्योः शुद्ध्ये गां दद्या

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

317

स्योदाहरणमिदं कर्मप्रोक्ता क्रियाध्याहरस्य तु स्यात्स्वं पचतीतिवैयाकिकाध्याहरतु
हरति सोदेइति । भ्रमस्य पूर्वकस्य तु सर्वाहमित्येति तिलेषु तैलमित्याद्युदाहरणव्यापकस्यो
दाहरणमाहु: चर्मणीत्यत्रेति प्राप्तिवदिकार्थमात्रइत्यर्थः दूरांतिकार्थेभ्यः इत्यस्योदाहरु
वर्ज्ज्यादधिकरणेव्युत्पादोध्याः क्रस्याभिषयस्येति इत इन्त तः शब्दोविषयोवर्ज्जितम
र्थस्य क्रांतस्यार्थः । भ्रमत्वाप्रिन्नोविषयइति षष्ठी । समासः विषयशब्देन
प्रकृतिरुच्यते क्रांतस्येनः प्रकृतित्वादिति । अधीतीव्याकरणइति भावेक्तप्रत्य
येनतइत्यादि भावक्तेतिकर्त्री रीतोक्ते पक्षाद्गणमूतक्रियया संवध्यमाने ।
तिसोविहरंगत्वात्सती व्याकरणमनमितिहितं कर्त्रीकत्वमिति वहुनीयाप्राप्तमा " स४
मधीतीव्याकरणइत्यादौतु कालकर्मणोः वहिरंगत्वादिहाग्रहणमिति सप्तम्य
भावः नचैवनत्रद्वितीयापित स्यादितिवाच्यं लक्षणानुरोधेन द्वितीयाविधानेव्या
त्रिपदाभ्रयणात एतत्रकौस्तुभेस्थितं साध्यसाध्यप्रयोजनेच यत्रार्थ्ज्ञानवि ४६

CC0. Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

रेलाघवस्यानुकूलत्वात् अन्वर्थ्याहि न तृतीये वा नु रूढेन संज्ञाहितत्वात् न तल्यइति ^
तु लयासंभिन्नतुल्यः नैवयोध्यर्गे स्वादियतकला उपमावेति तोलनं तला आस्मिन्नेव
सूत्रे तोल ङेनिपातनान्साधुरिति माधवः उपमितिरूपमा आनत्क्षाव सगीइत्यङ्गीति
तमिति हितयोगे च स्वनाशिव च हितार्थमित्या मिथ्यपेवि कल्पइतिभावः व्याख्याना
दिति सूत्रे अर्थग्रहणेऽपि पष्चकृ निमित्तं तथा च दंद्ध राजाये न लघी शब्देन बहुव्रीहि
रितिभावः इति व्यती आधीयते स्मिन्निन्याधारः आधारोऽधिकरणमिति सूत्रे प्रकृता
८ धारेसुप संख्यानां धिकरणोपकर स्माधारः कर्तृकर्मद्वारा तयोः क्रियाधारः
निलभ्यते इयं च संज्ञा ता न क्रियाधारयो नेत भवति कलापांकत्वकर्म संज्ञाभावा
धिनत्वात् अतोऽप्च के कर्मधिकरणेति एवंच भूतले घट इत्यादौ आधारत्वेन क्रियाधा
रत्वो बोध्यः विवेति ततत्र्यसंहितायामिति सूत्रे भाष्ये स्पष्टं तथा मा सहद्व्यादध्यर्थसा
मीपिकमाधिकरणं च तुर्य मी यचेचाधिष्ठति कटे आस्ते इति कर्तृकर्मद्वारा क्रियाधा x

दधुपपघ्ने इति न तु नतिस्तथापि विशेष्यत्वेन त्वयं हेयान्ते स्यादिति चेत् अप्राप्तिरिति निमित्तपर्या
येति वर्णग्रहणस्य फलमाह रामेत्यादिना एतत् न वार्त्तिकेन षष्ठी हेतुप्रयोगे सर्वनाम्न
स्तृतीया चेति सूत्रद्वयं गतार्थमिति बोध्यं बहुलमसंदिग्धे गोत्रसाम्यं मन्त्र हं त्रिषु स्योपो
स ॥४१॥ दिगदेशकालस्त्वपः सोपीपर्यप्रत्ययः सोन स्यपि प्रत्यये स्ताति प्रभृतिरयं चन दंतेन योगह
त्वर्थः अन तु चोः स्तात्यनं तन बत्वेपि लघवानसेधेन अस्तात्यर्थे नेत्याहुः पंचम्या
अपवादः इति ततः पश्चात् स्ते स्ते चेति भाष्यप्रयोगात् पश्चात् शब्दयोगे तु पंचम्यपि
साधुः अस्मादेव भाष्यप्रयोगात् पश्चाच्छब्दे नाव्ययीभावो न भवति इति वक्ष्यते प्रत्ययग्र
हणं किं इह मा भूत् प्रागग्रामात् प्रत्यग्ग्रामात् कृतेपि प्रत्ययग्रहणे कुतो नेति चेदत्राहुः
कैयटादयः प्रत्ययग्रहणसामर्थ्यं त्रिपमार्गे प्रत्ययमात्रे प्रत्ययग्रहणार्थं विज्ञास्यते कृते
लुपे प्रत्ययलक्षणस्याभावः अन्यारादी त्यत्रांचूत्तरपदस्यापीदं प्रयोजनं मन्त्र ननुत्तरस्या
न्यमतत्त्वमेव प्रयोजनं त्वादिति प्रत्ययग्रहणं प्रयोजनमिति मनोरमायां स्थिते तत्रइति

चिंत्य ५ न ५ ३०

भवति शेषषष्ठ्याः समासेऽन्तोदात्तत्वं २४ ना

ष्ट्याः समासे बोध्यानि तत्र चकारः कर्तृकर्मणोः कृति कारके स्यादिं कृदन्त रूपदं प्रकृति स्वरेण म

ध्योदात्तत्वं स्यात्तद्धितं तत्पाञ्च स्वरार्थं यम ... निषेधः किंच मानुः स्तनानित्यादौ

समासाभावेऽपि फलं नहि तत्र कर्तृकर्मषष्ठी तल्लभ्यते न लोकेति निषेधात् ॥ आह च तिक्तापान

विविषया षष्ठी च प्रतिषेध्यते शेषलक्षणा या षष्ठ्या समासः स तत्र नेष्यत इति तानवमतोरसा

यां स्थिते षष्ठी हेतु ॥ अत्र हेतुशब्दानुवर्तते तदाह हेतौ द्योत्ये इति ॥ अन्नस्येति हेतावित

तीया या प्राप्ता यतनेन षष्ठी हेतुप्रयोगे किं ॥ अन्नेन वसति हेतौ द्योत्ये किं ॥ अन्नशब्दा

त् षष्ठी यथा स्यादित्येके ॥ अन्नस्य हेतो रसुभुंजानमः स्तत्र युक्त ... षष्ठी तृतीयेन स्या

मित्याह ... सर्वनाम्नस्तृतीया च ... सर्वनाम्न इति प्रयोगापेक्षया षष्ठी वंच

म्यां तु हेतुशब्दात् षष्ठी तृतीये न स्यातामिति प्राप्ते नाह सर्वनाम्नो हेतुशब्दस्येति

कस्माद्भवति तेनापेक्षायां ॥ अर्थात् सर्वनाम्नो हेतुमात्रमिति ... ॥ अत्र स्यानवृक्तः ... घ२५

पि सर्वनाम्नः इति पदसंबंधं च नानावयपि हेतुशब्दस्य विशेषणत्वे सामानाधिकरण्या

द्वितीयभावषष्ठांशयुक्तः द्वितीयतृतीयभावयोः संधिः स्यात् अयं षष्ठांशयुक्तस्तृतीयभावः स्यात् अयं षष्ठांशयुक्तस्तृ-
तीयचतुर्थभावयोः संधिः स्यात् एवं त्रयः ससंधयो भावा जाताः तदनंतरं अग्रे त्रयः ससंधयो भावाः साध्याः त-
द्यथा पूर्वनीतषड्भूमं रूपमध्ये संशोध्य अनेन राश्यादिना सुखभावो युक्तश्चतुर्थपंचमभावयोः संधिः स्या-
त् अयमेव संधिः पुनस्तेन युक्तः पंचमभावः अयं तेन युक्तः पंचमषष्ठभावयोः संधिः स्यात् अयं तेन युक्तो
षष्ठो भावो भवति अयं तेन युक्तः षष्ठसप्तमभावयोः संधिः स्यात् एवं भावसंधिनि प्रयोजनमाह खेटे भाव
इति एवं षट् ससंधयो भावा जाताः एते भार्धयुक्ता भार्द्धषड्राशयस्ते युक्ताः संतः अवशिष्टषड्भावाः ससंधयः।
स्युः एवं भावसंधिनि प्रयोजनमाह खेटे भावइति यो ग्रहो यद्भस्थो भवति स चेद्भावस्य राश्यंशकलाविकला-
भिस्तुल्यः स्यात् तदा पूर्णः तद्भावस्य शुभमशुभं वा फलं पूर्णं विंशतिविश्वात्मकं प्रददाति संधितुल्ये ग्रहे शू-
न्यफलं भवति २७ भुक्तमिति भुक्तभोग्ययदिष्टकालनाडीभ्यो लेभ्यो न्यूनं स्यात् तदेष्टनाडीपलानि त्रिंशद्गु-
णितानि कार्याणि सायनसूर्यस्य राश्युदयेन भाज्यानि फलं लवाद्यं ग्राह्यं हीनं भुक्तं भास्करे कार्यं तद्यथा यदा
रवेर्भुक्तमानितं भवति तदा लवाद्यं फलं सूर्यहीनं कार्यं यदा भोग्यमानीतं भवति तदा लवाद्यं फलं सूर्ये म-
ध्ये युक्तं कार्यं तत्तल्लग्नं स्यात् रात्रौ लग्नसाधनं चेत् क्रियते तदा राशिषट्कयुतात् रवेः सकाशात् लग्नं साध्यं रात्रौ
दशमलग्नसाधनेपि राशिषट्कयुतात् रवेः सकाशात् भुक्तभोग्यं साध्यं २५ अत्रोदाहरणं अस्य जन्मभूमौ उद-
याः तात्कालिकोर्कः २।७।३०।६ अयनांश १९।२६ भुक्तांशाः ४।२२।५१।५६ अस्य भोग्यांशाः ७।८।५४ मकरस्य राश्युदय
यो २९८ गुणितः १२।११।२२।१२ अयं त्रिंशद्भक्तः जातो भोग्यकालः ०।२२।४४ अयं इष्टघटि १२।१९ पलेभ्यः

२

७३९ शोधित: शेषं ८९।०।३।३६ मकरस्याग्रे कुंभोदय: २३९ शेषाच्छोधिते शेषं ४५।०।३।३६ कुंभादग्रे मीनोदय: २०३
शेषाच्छोधिते शेषं २५५।३।३६ मीनादग्रे मेषोदय: २०३ शेषाच्छोधिते शेषं ५२।३।३६ मेषादग्रे वृषोदय: २३९ अ
यं शेषान्न शुध्यति अत: शेषं ५२।३।३६ खआहतं १५७९०।३।० अशुद्धोदयेन २३९ भक्तं लब्धं अंशादिकं ६६।५।
१९ इदं अशुद्धस्य वृषस्य मेषादुत्तरस्य राशिसंख्यायुक्तं १।६६।५।१९ इयं सायनांशै: १।२६।२६ हीनं जातं लग्नं ०।२०।१।
१६ राशिषट्कयुतं जायाभुवनं ६।२०।१।१६ अथ दशमलग्नसाधनं तत्र लंकोदय: दिनार्द्धं १३।१४ आदिनगतघ
टिमि १०।१९ ३ हीनं जातं पूर्वं नतं ०।२५।३ अयमिष्टकाल: लंकोदयै: कृत्वा सायनार्काद्भुक्तभागा: गृ
हीया: उपरितनांक: त्रिंशद्गुणित: लब्धं भुक्तकाल: जातो भुक्तकाल: २०१।४० अयमिष्टघटीभ्यो २५।३ न शुद्ध
मत: शेषपलं २५।३ त्रिंशद्गुणितं ७५९० लंकोदयेन मकरे मानत: पलेन २२३ भक्तं फलं लवादिकं ३।२२।१६ इदं सायना
दिसूर्यमध्ये ९।०।२३।१६ हीनं जातं दशमलग्नं ८।५।४।० इदं राशिषट्कयुक्तं सुखभवनं ३।५।४।० लग्नहीनं चतुर्थभा
वस्य शेषं १।१६।५७।१४ इदं षड्भक्तं लब्धं राश्यादि ०।२५।४९।३४ अनेन युक्तं लग्नं जातो लग्नस्य विरामसंधि १।०।५९
।५३ अयं षष्ठांशेन युतो जातो द्वितीयभाव: १।१३।४५।१३ अयं षष्ठांशेन युतो जातो द्वितीयभावस्य संधि: १।२६।३५।० एवम
ग्रेपि विज्ञेयं एते राशिषट्कयुता अवशिष्टा: षट्संधयो भावा जाता: श्लोक: खेटे संधिद्वयान्तस्थे फलं तद्भावजं भवेत् हीने

ल	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व
०	१	२	३	४	५	६	७	८	९	१०	११
२०	१३	९	५	६	१३	२०	१३	९	५	६	१३
१	४५	२९	४	२६	४९	१	४५	२८	४	२६	४९
१६	३	४४	०	४६	३	१६	३	४४	०	४६	३२
सं	सं	सं	सं	सं	सं	सं	सं	सं	सं	सं	सं
१	७	२	९	४	६	०	७	८	९	१०	१०
[illegible]	२६	२२	३	२६	०	२६	२६	२१	२२	२६	०
५९	४९	१९	२२	३९	५९	५९	३९	१८	२८	३९	५९
५६	७	२१	१८	९	५	५५	७	२१	२३	९	५५

अयनांशोदय:	अयलंकोदय:
मी ० मे २०	मे २७८ मी
	वृ २९९ कुं
	मि ३२३ म
	क ३२३ ध
	सिं २९९ वृ
	कं २७८ तु

धिके द्विसंधिस्थे भवेत्पूर्वापरे फलं टीका यथा
हि तनुभावसंधे: सकाशाद्दधिके सति धनुभावसं
धे: सकाशान्न्यूने सति चेद्यदा ग्रहो धनभावे वर्त्तते धनभा
वजं फलं भवेत् तथा तनुभावसंधे: सकाशाद्धीने
तदा तनुभावेस्य फलं यदा द्वितीयभावसंधे:
सकाशाद्दधिके तदा तृतीयभावस्य तृतीयभावफलं दद्या
दित्यर्थ: २६ श्लोक: ग्रहसंध्यन्तरं कार्यं विसंध्यान्तरेण
तत्र भजेत् भावसंध्यन्तरेणाप्तं फलं विंशोपका: स्मृता:

३

CC0, Gurukul Kangri Collection, Haridwar ... USA

एवं जाग्रत्स्वप्नप्रपंचोपि मय्यपि माया विजृंभितः ५

प्र०टी० ॥ ६ ॥ तत्वानु० यो मद्भक्तः स मे प्रिय इति अत्र जीवन्मुक्त एव भक्त उच्यते प्रकाशं च प्रवृत्तिं चेत्यादिभिर्गुणातीत

१ लक्षणमुच्यते इत्थं तेन जीवन्मुक्तो दर्शितः इति गीतायां निराशिषमनारंभं निर्नमस्कारमस्तुतिं

क्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुरिति महाभारते यथा स्वप्नप्रपंचोयं मयि माया विजृंभितः

इति यो वेदवेदांतैः सोतिवर्णाश्रमी भवेदिति पुराणे सेयं जीवन्मुक्तिः तत्त्वज्ञानवासनाक्षयमनो

नाशाभ्यासात् सिद्ध्यति तत्र तत्त्वज्ञानस्याभ्यासो नाम पुनः पुनः केनाप्युपायेन तत्त्वानुसंधानं तदुक्तं

तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधा इति यद्यपि तत्त्वज्ञानाभ्या

सोपि वासनाक्षयमनोनाशाभ्यासोपेक्षितः तथापि विविदिषासंन्यासिनः सदुपसर्जनभूतः श्रवणाद्य

भ्यास एव प्रधानः विद्वत्संन्यासिनस्तु तत्त्वज्ञानाभ्यास उपसर्जनभूतः वासनाक्षयमनोनाशाभ्या

सः एव प्रधानः चित्तविश्रांतिहेतुत्वात् इत्यविरोधः कृतोपास्तिकस्य मुख्याधिकारिणस्तदपेक्षाभा

वेप्यकृतोपास्तेरस्मदादेस्तदभावे चित्तविश्रांत्यभावात् उत्पन्नमपि तत्त्वज्ञानं विषयाबाधात्

भासरूपमज्ञाननिवर्तकमप्यसंभावनादिसंभावान्न तत्सुखकरमिति वासनाक्षयमनोनाशाभ्यासो

पेक्षितः वासनासामान्यलक्षणं तद्भिन्नानां तस्य योजनं तल्लक्षणं च वशिष्ठश्चाह दृढभावनया त्यक्त

पूर्वापरविचारणं यदादानं पदार्थस्य वासना सा प्रकीर्तिता वासना द्विविधा प्रोक्ता शुद्धा च मलि

नातथा मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी अज्ञानसुघनाकारा घनाहंकारशालिनी

स्यात् पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः पुनर्जन्मांकुरं त्यक्त्वा स्थिता संभृष्टबीजवत् देहार्थं

CC0, Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation USA

ॐ सा च मुक्तिर्द्विविधा विदेहमुक्तिर्जीवन्मुक्तिश्चेति तत्र तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्त्तमानशरीर
पाते विदेहमुक्तिः तदुक्तं भोगेन त्वितरे क्षपयित्वा संपद्यत इति अन्ये तु भाविशरीरानारंभो [illegible] विदे
हमुक्तिः सा च ज्ञानोत्पत्तिसमकालं ज्ञानेनाज्ञाननिवृत्तेः संचितकर्मणां नाशात् आगामिकर्मणा
मश्लेषाद्भोगेन प्रारब्धक्षयात् शरीरांतरारंभकस्यासंभवात् भाविशरीरानारंभ[illegible]स्य ज्ञान
समकालत्वं युज्यते तदुक्तं तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्देहं ज्ञानसमकाल
मुक्तः कैवल्यं याति [illegible]हतशोक इति एवं वेदार्थांश्चक्रुः श्रवणादिभिरुत्पन्नसाक्षात्कारस्य
विद्वत्संन्यासिनः कर्तृत्वाद्यखिलबंधप्रतिभासनिवृत्तिः जीवन्मुक्तिः भोगादृक्प्रारब्धप्राब
ल्येपि योगाभ्यासेन तदभिभवसंभवात् प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात् अन्यथा पु
रुषप्रयत्नवैयर्थ्येन चिकित्साशास्त्रमारभ्य मोक्षशास्त्रपर्यंतस्यानारंभप्रसंगात् अत ए
माशयमागत्य अन्येद्युष्कं करोति ॥ तत्र द्वौ दोषप्रकोपकालौ एकस्मिन्काले हृदये तिष्ठति अपरस्मिन्नामाशये

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1284

यइति॥ कण्ठे स्थितो दोषो होरात्रादहरहः समायाति। तृतीये दिने आमाशयभागसत्त्वप्रकोपकाले तृतीयकं ज्व
रं करोति॥ एककालं तु द्वैकालौ स्वभावात्॥ एवमेव शिरःस्थितो दोषो होरात्रात्कण्ठमायाति। ततः पुनरहोरा
त्रादहरहः समायाति। चतुर्थे दिने आमाशयभागसत्त्वप्रकोपकाले चतुर्थकं ज्वरं करोति। एककालान्तु द्वै
कालौ स्वभावादेवान्यतु दोषस्यागमनं क्रमेण निजस्थानगमनं क्रमात्कथं तृतीयचतुर्थदिवसयोर्ज्वरागम
नं। उच्यते॥ दोषो हि प्रकोपसमये वेगं परित्यज्य लाघवात्तत्स्थानं वेगादिनं एव याति॥ पत्र आह॥ दोषः प्रकोपका
ले हि वेगवत्त्वेन लाघवात्॥ वेगवासरं एव प्रयत्नस्थानमधिगच्छति॥ सन्धिषु स्थितः प्रलेपकं करोति॥ सन्ध्ययश्चा
माशयेऽपि सन्ति तेषु स्थितः प्रलेपकं सर्वदा करोति।॥ निवृत्तः पुनरायाति विषमो निपतन्ते दिने॥ स्वभावं कारणं तत्र
मन्यन्ते मुनिपुंगवाः॥ स्वभावस्य कारणत्वे कफस्थानविभागनिरपेक्षाश्चतुर्थकादिविपर्ययाश्च विज्वराः स्वस्व
काले प्रभवन्ति॥ अधिशेते यथा भूमिं बीजं काले प्ररोहति॥ अधिशेते तथा धातुं दोषः काले प्रकुप्यति॥ सुश्रुतो
प्याह॥ स चापि विषमो देहं न कदाचित् विमुञ्चति॥ ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते॥ वेगे तु समतिक्रा
न्ते गतोऽयमिति लक्ष्यते॥ धात्वन्तरस्थो लीनत्वात् सौक्ष्म्यान्नैवोपलभ्यते॥ द्विदोषोल्बणसन्तृतीयस्य लक्षणमा
ह॥ कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः॥ वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः॥ त्रिकग्राही वेदनया एम०
त्रिकं गृह्णातीत्यर्थः॥ वातकफात्मकः पृष्ठात्। पृष्ठग्राही भवतीत्यर्थः॥ स्वप्रलोपे कर्मरूपविकारेणोचेति ४७

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

यस्यवात्मसमोलोकोधर्मस्सचमनस्विनः
सर्वधर्मेणचर्जितं देवाब्राह्मणंविदुः ५

पा.मा. ध्यायनिरतः शुचिः कामक्रोधौवशेयस्यतंदेवाब्राह्मणंविदुः योध्यापयेदधीते
७४ वायाजयेद्वायजेतवा दद्याद्वापियथाशक्तितंदेवाब्राह्मणंविदुः दमादयाच
विज्ञानंसत्यंचैवदमःशमः अध्यात्मनिरतंज्ञानमेतद्ब्राह्मणलक्षणमिति
चतुर्णामपिवर्णानामितिषट्कर्माभिरतइतिवचनद्वयेनसाधारणासाधार
णधर्मौसंक्षिप्योपदर्शितौ यद्यप्यध्यापनादित्रयमेवविप्रस्यासाधारणंना
ध्ययनादित्रयंतस्यवर्णत्रयसाधारणत्वात्तथापिषट्कर्माभिरतत्वंविप्रस्यैवे
तिनकोपिविरोधः तत्रसाधारणाध्ययनादित्रिकंलिंगेन बुद्धिस्थंसाधारणमाह

संध्यास्नानंजपोहोमोदेवतानांचपूजनम् आ
तिथ्यंवैश्वदेवंचषट्कर्माणिदिनेदिने ३२ रा.म.
७४
कंसंक्षिप्याह संध्येति संध्यास्नानमित्यत्रयवागूपाकन्यायेनस्नानसपुरा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

दत्तं स्यादिति मेमतिरिति विदुरपि स्वाध्यायेनाग्निहोत्रेणायज्ञेनानवसानया नचान्नो
तिगृहेल्लोकान्यथा च तिथिपूजनादिति वैश्वदेवाद्यर्थमोदनं पाचयित्वा तेन होमे
कृते तस्यैव शिष्ट ओदनः सकृतशेषो वस्तुमेव भुंजीत न तु स्वभोजनार्थं पाचयेत् तदाह
भगवान् यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः भुंजते ते त्वघं पापा ये पचंत्या
त्मकारणादिति हुतशेषमित्यत्र हुतशब्दो महाभारते व्याख्यातः वैश्वदेवादयो हो
मा हुतमित्युच्यते बुधैरिति तस्य शेषो हुतशेषः स च हुतशेषशब्दो देवर्षिमनुष्या
दिभ्यो यथोक्तविभागेन दत्तावशिष्टमुपलक्षयति तदुक्तमत्र देवानृषीन्मनुष्यांश्च पितॄन्गृ
ह्याश्च देवताः पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् अघं स केवलं भुंक्ते
यः पचत्यात्मकारणात् यज्ञशिष्टाशनं ह्येतत्सतामन्नं विधीयत इति ब्राह्मणो ना
वसीदतीत्यत्र विवक्षितस्य ब्राह्मणस्य लक्षणं महाभारते दर्शितं सत्यं दानं तपः शौचमा
नृशंस्यं दमो घृणा दृश्यंते यत्र विप्रेंद्र स ब्राह्मण इति स्मृतः जितेंद्रियो धर्मपरः स्वा

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

एवं व्याख्येयं स च न्यायः पंचमाध्याये प्रथमपादे प्रतिपादितः यवाग्वाग्निहो
त्रं च जुहोति यवागूं पचतीति श्रूयते तत्र संशयः किमग्निहोत्रयवागूपाकयो
रनियतः उत नियतः यद्यपि नियतस्तत्रापि पाठेन नियम्यते उतार्थेन तत्र
विधेरनुष्ठानमात्रपर्यवसानात् क्रमस्य नियामकाभावादनियत इत्येकः
पूर्वपक्षः पूर्वाधिकरणे चाध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयती
त्यत्र पाठस्यानियामकत्वाभ्युपगमात् अत्रापि संभवाद्यथापाठक्रमं निय
म इत्यपरः पूर्वपक्षः यवाग्वेति तृतीयाश्रुत्या होमसाधनत्वावगमात् असति
च द्रव्ये होमानिष्पत्तेरर्थाद्यवागूपाकः पूर्वो भवतीति सिद्धान्तः एवमत्रापि
स्नानस्य शुद्धिहेतुत्वाच्छुद्धस्यैव संध्यावंदनाधिकारित्वात् स्नानं पूर्व
भावीति द्रष्टव्यं न च स्नानेन तत्पूर्वभाविनां ब्राह्ममुहूर्तोत्थानानि हि तु चिंतना

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰मा॰ दीनां सर्वेषामुपलक्षणं तत्र याज्ञवल्क्यः ब्राह्मे मुहूर्ते उत्थाय चिंतयेदात्मनो हितं ध
७५ मार्थकामान्स्वे काले यथाशक्ति न हापयेदिति मनुरपि ब्राह्मे मुहूर्ते बुध्येत धर्मा
र्थौ चानुचिंतयेत् कायक्लेशांश्च तन्मूलान्वेदतत्वार्थमेव च वेदतत्वार्थः परमा
त्मा तथा च कूर्मपुराणे ब्राह्मे मुहूर्ते उत्थाय धर्मार्थौ चानुचिंतयेत् कायक्लेशं त
दुद्भूतं ध्यायीत परमेश्वरमिति विष्णुपुराणेपि ब्राह्मे मुहूर्ते उत्थाय मानसेम
तिमान्नृप विबुद्धश्चिंतयेद्धर्ममर्थं चाप्यविरोधिनम् अपीडयानयोः काम
मुभयोरपि चिंतयेत् परित्यजेदर्थकामौ धर्मपीडाकरौ नृप धर्ममप्यसुखोद
र्कं लोकविद्विष्टमेव चेति सूर्योदयात्प्राक् प्रहरे यो मुहूर्तो नत्राद्यो ब्राह्म्यः
द्वितीयो रौद्रः तत्र ब्राह्मे चिंतनीयार्थविशेषं दर्शयति विष्णुः उत्थायोत्थाय
बोद्धव्यं किमद्य सुकृतं कृतं अर्थं वा दापितं वापि वाक्यमावापि भाषिता उ रा॰म॰
७५

त्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं मरणव्याधिशोकानां किमद्य निपतिष्य
ति ध्यायीत परमेश्वरमिति यदुक्तं तत्र प्रकारविशेषो वामनपुराणे दर्शितः
ब्रह्मा मुरारिस्त्रिपुरांतकश्च भानुः शशी भूमिसुतो बुधश्च गुरुश्च शुक्रः शनि
राहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातमित्यादि इति ब्राह्ममुहूर्ते आत्महित
चिंतनप्रकरणम् ॥ हितचिंतनानंतरं श्रोत्रियादिकमवलोकयेत् तत्र पा
पिष्ठादिकं न तदाह कात्यायनः श्रोत्रियं सुभगं गां च अग्निमग्निचितं तथा
प्रातरुत्थाय यः पश्येत्तत्काले सुफलं लभेदिति ततो मूत्रपुरीषे कुर्यात् त
दाहांगिराः उत्थाय पश्चिमे रात्रे ततस्त्वाचम्य चोदकं अंतर्धाय तृणैर्भूमिं
शिरः प्रावृत्य वाससा वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः कुर्यान्मूत्र
पुरीषे तु शुचौ देशे समाहित इति तत्र तृणनियमं विशिनष्टि शिरः प्रावृत्य
कुर्वीत शकृन्मूत्रविसर्जनं अयज्ञियैर्नवार्द्रैश्च तृणैः संछाद्य मेदिनीमि यः

दापद्भ्यः स विमुच्यते पापिष्ठं दुर्भगं चांधं नग्नमुत्कृत्तनासिकं प्रातरुत्थाय यः पश्ये x५

1289

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा० मा० ति तत्र कालभेदेन नियममाह याज्ञवल्क्यः दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मु
७६ खः पश्चिमाभिमुखो रात्रौ संध्ययोस्तु यथा दिवा कुर्यान्मूत्रपुरीषे च रात्रौ चेद्द
क्षिणामुख इति कर्णशब्दः दक्षिणः पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजे
दिति स्मृत्यन्तरे पवित्रस्य दक्षिणकर्णस्थापनाभिधानात् यज्ञोपवीतस्था
पितत्वेनैव स्थापनं स्यात् ग्रंथान्तरस्तु विकल्पेन स्थानांतरमाह कृत्वा यज्ञो
पवीतं पृष्ठतः कंठलंबितं विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहितमि
ति तत्र कर्णे निधानमेकवस्त्राभावविषयम् तथा मांख्यायनः यद्ये
कवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति ननु कोदिङ्
नियमो न व्यवतिष्ठते ग्रन्थैरन्यथास्मरणात् तत्र यमः प्रत्यङ्मुखस्तु पू
र्वाह्ने सायाह्ने प्राङ्मुखस्तथा उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामु
खः अत्र केचिद्विकल्पमाश्रित्य व्यवस्थापयंति तदकं सामान्यविशेष राम ७६
शास्त्रयोर्विकल्पायोगात् सामान्यशास्त्रं हि याज्ञवल्कीयवचनम्

यु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

दिवसेकृत्येषूदङ्मुखत्वविधानात् यमवचनंतुविशेषशास्त्रं उदङ्मुखत्व
स्यमध्याह्नविषयत्वेनात्रसंकोचप्रतीतेः मास्तुतर्हि विकल्पः यमवचनो
क्तोत्तरत्वस्याभविष्यतीति येनतदपिनयुक्तं प्राक्प्रत्यङ्मुखत्वनिवारणा
येवदेवलेनसंदेवेति [illegible] विशेषितत्वात्संदेवोदङ्मुखः प्रातःसाया
ह्नेदक्षिणामुखश्चेति अत्रप्रातःसायाह्नशब्दौदिवारात्रविषयौ तथाचम
नुः मूत्रोच्चारसमुत्सर्गंदिवाकुर्यादुदङ्मुखः दक्षिणाभिमुखोरात्रौसंध्य
योस्तुयथादिवेति एवंतर्हियमोक्तयोः प्राक्प्रत्यङ्मुखत्वयोःकागतिः सूर्या
भिमुखत्वनिषेधगमकोक्तिरितिब्रूमः तदुक्तंमहाभारते प्रत्यगादित्यम
निलंप्रत्यग्गांचप्रतिद्विजं मेहंतियेचपथिषुभवंतिचगतायुषइति यत्तुदे
वलेनोक्तं विण्मूत्रमाचरेन्नित्यंसंध्यासुपरिवर्जयेत् नान्तरुद्धेनरवि
षयं नवेगंधारयेन्नोपरुद्धः क्रियांकुर्यादितिस्मरणात् यदपिमनुनो

1292

पा.मा. ॐ छायायामंधकारे वा रात्रावहनि वा द्विजः यथासुखमुखं कुर्यात्प्राणबाधभयेषु
७७ चेति तदपि नीहारांधकारादिजनितदिङ्मोहनविषयं देशनियमो विष्णुनाभि
हितः नैर्ऋत्यादिषुविक्षेपमतीत्याभ्यधिकं भुवः दूरादावसथान्मूत्रं पुरीषं च समा
चरेदिति आपस्तंबोपि दूरादावसथान्मूत्रपुरीषे कुर्यात् दक्षिणां दिशं परां चेति
मनुरपि दूरादावसथान्मूत्रं दूरात्पादावनेजनं उच्छिष्टान्ननिषेकं च दूरादेव स
माचरेत् सरावर्ज्यदेशानाह न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे न फाल
कृष्टे न जले न चित्यां न च पर्वते न जीर्णदेवायतने न वल्मीके कदाचन न सस
त्वेषु गर्त्तेषु न गच्छन्नपि चास्थितः न नदीतीरमासाद्य न च पर्वतमस्तके वायव
ग्निविप्रमादित्यमपः पश्यन् स्त्रियस्तथा गाः न कदाचन कुर्वीत विण्मूत्रस्य वि
सर्जनमिति यमोपि तुषांगारकपालानि देवतायतनानि च राजमार्गश्मशा राम
नानि क्षेत्राणि च खलानि च उपरुध्येन सेवेत छायावृक्षं चतुष्पथं उदकं चो ७७

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

दक्षांतेचपथ्यानंचविवर्जयेत् वर्जयेद्धृदम्लानिचैत्यान्यल्पानिचेति हारी
तः ग्रामान्नरहःकुर्याद्दिवारात्रौचसर्वदा तथाम्यांलक्ष्मीप्रकः स्मानकाशेह्रियेते
श्रियेति आपस्तंबोपि नसोपानत्कोमूत्रपुरीषेकुर्यादिति यमोपि प्रत्यादित्यं
नमेहेतनपश्येदात्मनःशकृत् दृष्ट्वासूर्यनिरीक्षेतगामग्निंब्राह्मणंतथेति न
तोलोष्ठादिनापरिमृज्यगुदमेहनेगृहीतशिश्नश्चोत्तिष्ठेत् तथाचभरद्वाजः अ
पापकृष्यविधृत्यचैलोष्ठकाष्ठतृणादिना उदङ्मुखोवासोद्धृतिष्ठेत् दृढंविधृतमेह
नः इतिविण्मूत्रोत्सर्गप्रकरणम् अथशौचविधिः तत्रयाज्ञवल्क्यः गृहीतशि
श्नश्चोत्थायमृद्भिरभ्युद्धृतैर्जलैः गंधलेपक्षयकरंशौचंकुर्यादतंद्रितइति देव
लोपि शुचिःसमुद्धरेत्शिश्नंप्रस्रावोच्चारयोरपि उद्धृतंचनिर्मलंस्यमदंभो
भिर्मुहुर्मुहुरिति दक्षोपि तीर्थेशौचंनकुर्वीतकुर्वीतोद्धृतवारिणेति अस्पु
पुरणसंभवेविशेषमाह विवस्वान् रात्रिमावाम्जलंस्यक्त्वा कुर्याछौचमन

CC0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1294

पा॰मा॰ द्भिः पश्चात्तच्छोधयेत्तीर्थमन्यथा त्वशुचिर्भवेदिति शौचयोग्यां मृत्तिकामाह यमः
७८ आहरेन्मृत्तिकां विप्रः कूलात्ससिकतां तथेति तत्रैव विशेषमाह मरीचिः श्वेतेस्तु
त्कात्तु मृच्छौचे रक्ता क्षत्रे विधीयते हारिद्रवर्णा वैश्यस्य शूद्रे कृष्णेति निर्देश इति
उक्तविशेषासंभवे या काचिन्मृदुक्ता तदाह मनुः यस्मिन्देशे तु यत्तोयं या च यत्रै
व मृत्तिका सा च तत्र प्रशस्ता स्यात्तया शौचं विधीयत इति विष्णुपुराणेपि वर्ज्य
मृद्विशेषा दर्शिताः वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा शौचावशि
ष्टां गेहाच्च नाददीयाल्लेपसंभवां अन्यप्राण्यवपन्नां च हलोत्खातां सकर्दमा
मिति अन्तर्जलमृत्तिकाप्रतिषेधस्तु वापीकूपादिविषयः अत एवाह यमः
वापीकूपतडागेषु नाहरेद्बाह्यतो मृदं आहरेज्जलमध्यात्तु परतो मणिबंधना राम
दिति देवलोपि काश्चिन्निषिद्धा मृदं दर्शयति अङ्गारतुषकीटास्थिशर्करा ७८
वालुकान्विता वल्मीकोपरिगाताः स्युः कुड्यापृष्ठश्मशानजा ग्रामवासां

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1295

नगालस्यां वालुकापंकरूपिणीं आह तामस्य शौचार्थं आददीत न मृत्तिकामि
ति एतन्नियममाह देवलः धर्मवित् दक्षिणं हस्तमधःशौचे न योजयेत् तथा च
वामहस्तेन नाभेरूर्ध्वं न शोधयेदिति वृत्तोऽपराशरो दिङ्नियमोभिहितः उद्धृ
तोदकमादाय मृत्तिकां चैव वाग्यतः उदङ्मुखो दिवा कुर्यात् रात्रौ चेद्दक्षिणा
मुख इति मृत्संख्यामाह शातातपः एका लिंगे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः
मूत्रशौचं समाख्यातं शौचे तद्द्विगुणं भवेदिति मनुरपि एका लिंगे गुदे तिस्रस्त
थैकत्र करे दश उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता एतच्छौचं गृहस्थ
स्य द्विगुणं ब्रह्मचारिणः वानप्रस्थस्य त्रिगुणं यतीनां तु चतुर्गुणमिति बोधाय
नोपि पंचापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः उभयोः करयोः सप्त लिंगे
द्वे परिकीर्तिता एकस्मिन् विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दशेति विंशत्यादिकं ब्र
ह्मचारिविषयं द्विगुणं ब्रह्मचारिणामित्युक्तत्वात् आदित्यपुराणे श्रीमू

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

या॰मा॰
७२

द्वयोरर्धमानं शौचं शौक्तं मनीषिभिः दिवाशौचस्य निश्यर्धं पथि पादं विधीयते आ
र्त्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितमिति बौधायनोपि देशं कालं तथात्मा
नं द्रव्यं द्रव्यप्रयोजनं उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेदिति आतुरास
न्तिके शौचे नित्यकर्त्तव्यतादर्शिता शौचं कुर्यात्स्वस्थेन धीरो बुद्धिपूर्वमसंकरं पा
णिनाच्छिद्रकं संगृह्य विधिपूर्वकं विशुद्धप्रयत्नेन सूर्यपोचोद्धृतेन संस्प
र्शेन बुद्धिपूर्वं प्रयत्नेन यथा नैव स्पृशेदिति दक्षोपि षडन्यान स्वच्छौतेन दे
याः शौचे मृत्तनामृदः न शौचं वर्षधाराभिराचरेन्तु कदाचनेति मरीचिरपि
तिसृभिः क्रान्तलान्त्या देवोधोर्ध्वे त्वक्ते तथैव च हस्तोत्वामश्लावंधान्च लेपगं
धापकर्षणमिति यथाविधिकृते शौचे गंधश्लेन्ना पगच्छति तत्राह मनुः या
वन्नापैत्यमेध्याक्तो गंधो लेपश्च तत्कृतः तावन्मृद्वारि चादेयं सर्वासु द्रव्य
शुद्धिष्विति मनस्तु भावेन देवलस्त्वाह यावत्तु शुद्धिं मन्येत तावच्छौचं
विधीयते प्रमाणं शौचसंख्यायां न विष्टेरुपदिश्यत इति पितामहोपि तथा

1296

राम
७२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वनुपनीयंते द्विजाः शूद्रास्तथांगनाः गंधलेपक्षयकरं शौचमेषां विधीयत इति
अत्र स्त्रीशूद्रग्रहणमकृतोद्वाहाया अपि प्राप्यर्थं अनुपनीतद्विजस्ताद्वर्य्यात्कृ
तोद्वाहयोस्तु स्त्रीशूद्रयोः पूर्वोक्तादित्यपकर्षणीयत्वेनार्द्धशौचस्यावस्था
पितत्वात् मृत्तिकापरिमाणमाह शातातपः आर्द्रामलकमात्रास्तु ग्रासा इंदव
ते स्मिताः तथैवाहुतयः सर्वाः शौचे देयाश्च मृत्तिका इति यत्तु दक्षांगिरोभ्यां
परिमाणान्तरमुक्तं अर्धप्रसृतिमात्रं तु प्रथमा मृत्तिका स्मृता द्वितीया च तृ
तीया च तदर्द्धेन प्रकीर्त्तिता प्रथमा प्रसृतिर्ज्ञेया द्वितीया तु तदर्द्धका तृती
या मृत्तिका ज्ञेया त्रिभागकरपूरिणीति तत्र सर्वत्र न्यूनमध्यमपरिमाणेन
गंधापत्तये सत्यधिकपरिमाणं द्रष्टव्यं सत्यपि गंधक्षये शास्त्रोक्तसंख्यापूर
णीया यथाह दक्षः न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता प्रायश्चि
त्तेन युज्येत विहितातिक्रमे कृत इति एवमुक्तशौचकरणेपि यस्मादशु
द्धिर्नोपलभ्यते तस्माच्छुद्धिरित्याह व्याघ्रपादः शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यं

1298

पा॰मा॰
८०

ततस्तया मृज्जलाभ्यां स्नातं वाऽऽभावशुद्धिस्तयोरन्तरं गंगातोयेन कृत्स्नेन मृत्कूटैश्च
नगोपमैः आमृत्योश्चाचरन् शौचं भावदुष्टो न शुध्यति शौचस्य द्विविधस्याप्यो
क्तस्यापि सर्वकर्माधिकारहेतुतामन्वयव्यतिरेकाभ्यां दक्षो दर्शयति शौचे य
त्नः सदा कार्यः शौचमूलो द्विजः स्मृतः शौचाचारविहीनस्य समस्ता निष्फ
लाः क्रियाः इति इति शौचप्रकरणम् अथाचमनविधिः तत्र वृद्धपराशरः
कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः निबद्धशिखकच्छस्तु द्विज आच
मनं चरेत् कृत्वोपवीतं सव्येंऽसे वाङ्मनःकायसंयतः इति याज्ञवल्क्योपि अं
तर्जानुः शुचौ देश उपविष्ट उदङ्मुखः प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुप
स्पृशेदिति गोभिलोपि शुचौ देशे आसीनो दक्षिणं बाहुं जान्वन्तरा कृत्वा यज्ञो
पवीत्यामणिबंधनात् पाणी प्रक्षाल्य वाग्यतो हृदयस्पृशस्त्रिश्चतुर्वापः प्रा
चामेद्द्विजः परिमृज्यात् पादावभ्युक्षेत् सखानि चोपस्पृशेत् शीर्षण्यानि मूर्द्ध रा॰म॰
नि च दद्यादिति तत्र त्रिश्चतुर्वेत्यत्राधिको विकल्पः ब्रह्मतीर्थं तीर्थांतरेभ्यो ८०

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

विविनक्ति याज्ञवल्क्यः कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रकरस्य च प्रजापतिपितृ
ब्रह्मदेवतीर्थान्यनुक्रमादिति एतद्देवशंखलिखिताभ्यां स्पष्टीकृतं अंगुष्ठमू
लस्योत्तरतः प्रागग्रायां रेखायां ब्रह्मतीर्थं प्रदेशिन्यंगुष्ठयोरंतरा पित्र्यं क
निष्ठातलयोरंतरा प्राजापत्यं पर्वांगुलिपर्वाग्रे दैवमिति आचमनीयमुद
कं विशिनष्टि शंखः अद्भिः समुद्धृताभिस्तु हीनाभिः फेनबुद्बुदैः वह्निनानवत
प्ताभिरक्षाराभिरुपस्पृशेदिति याज्ञवल्क्योपि अद्भिस्तु प्रकृतिस्थाभिर्हीना
भिः फेनबुद्बुदैः हृत्कंठतालुगाभिश्च यथासंख्यं द्विजातयः शुध्येरन्
स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः इति मनुरपि हृद्गाभिः पूयते विप्रः कंठगा
भिस्तु भूमिपः वैश्योद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरंततः इति प्रचेताप्यपि
अनुष्णाभिरफेनाभिः पूताभिर्वस्त्रचक्षुषा हृद्गाभिरशब्दाभिस्त्रिश्चतुर्वा
द्भिराचमेदिति तत्रापवादमाह यमः रात्राववीतितेनापि अद्भिरुक्तामनीषि

णां । उदकेनाङ्गुलीनां च तथोल्लेनोत्सेपेथिनामिति उदकस्य ग्रहणप्रकारं परिमाणं चाह
भरद्वाजः । आयतं पर्वतः कृत्वा गोकर्णाकृतिवत्करम् । संहताङ्गुलिना तोयं गृहीत्वा पाणि
ना द्विजः । मुक्ताङ्गुष्ठकनिष्ठेन शेषेणाचमनं चरेत् । माषमज्जनमात्रास्तु संगृह्याद्भिः पिबे
दप इति । स च पाणिस्थो द्विरोष्ठप्रष्टव्यः । त्रिः पिबेद्द्विरेणापीति पुराणवचनात् । उदके
पानानन्तरभाविनीमितिकर्तव्यतामाह दक्षः । संमृज्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो
मुखम् । संहताभिस्त्रिभिः पूर्वमास्यमेव उपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं स्पृ
ष्ट्वा त्वनन्तरम् । अङ्गुष्ठानामिकाभ्यां तु चक्षुः श्रोत्रे ततः परम् । कनिष्ठाङ्गुष्ठयोर्नाभिं
हृदयं तु तलेन वै । सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेदिति । वृद्धगौतमस्त्व
न्यथा स्पर्शनमाह । तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयं । मध्यमाङ्गुष्ठयोगेन स्पृ
शेन्नेत्रद्वयं ततः । अङ्गुष्ठानामिकयायोगेन श्रवणौ स्पृशेत् । कनिष्ठाङ्गुष्ठयो
गेन स्पृशेत्स्कन्धद्वयं ततः । नाभिं च हृदयं तद्वत्स्पृशेत्पाणितलेन तु । संस्पृशे
त्ततः शीर्षमयमाचमने विधिरिति । एवमन्येऽप्यन्यथान्यथा वर्णयन्ति तत्रयः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

याथार्थं व्यवस्था दृश्यया आचमननिमित्तान्याह मनुः कृत्वा मूत्रं पुरीषं वा खान्या
चांत उपस्पृशेत् पीत्वापोऽध्येष्यमाणश्च वेदमश्नंश्च सर्वदेति कूर्मपुराणेऽपि चांडा
लम्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्टभाषणे उच्छिष्टं पुरुषं स्पृष्ट्वा भोज्यं चापि तथाविधं
आचामेदश्रुपाते वा लोहितस्य तथैव च अग्नेर्गवामथालंभे स्पृष्ट्वा प्रयतमेव च
स्त्रीणामप्यात्मनः स्पर्शे नीवीं वा परिधाय चेति स्त्रीशूद्रोच्छिष्टभाषण इत्येतज्ज्ञा
नादिविषयं तथा च पद्मपुराणे चांडालादीन् जपे होमे दृष्ट्वाचामेद्द्विजोत्तम इति
मनुरपि सुप्त्वा क्षुत्वा च पीत्वा च निष्ठीव्योक्त्वानृतं वचः रथ्याश्मशानं वाक्रम्य आ
चामेत्प्रयतोऽपि सन्निति बृहस्पतिरपि अधोवायुसमुत्सर्गे आक्रंदे क्रोधसंभवे मा
र्जारमूषिकस्पर्शे प्रहासेऽनृतभाषणे निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नुपस्पृशेदि
ति यमोऽपि उत्तीर्योदकमाचामेदवतीर्य तथैव च एवं स्यात्तेजसा युक्तो वरुणेना
भिपूजित इति हारीतोऽपि नोत्तरेदनुपस्पृश्य जलानीति वसिष्ठोऽपि कृत्वेति

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1302

पा·मा· क्षुते स्वप्ने परिधानेश्रुपातने पंचस्वेतेषु चाचामेच्छ्रोत्रं वा दक्षिणं स्पृशेदिति दक्षिण
८२ कर्णस्पर्शनमाचमनासंभवे वेदितव्यं तथा च मार्कण्डेयपुराणे सम्यगाचम्य तोयेन
क्रियाः कुर्वीत वै शुचिः देवतानामृषीणां च पितॄणां चैव यत्नतः कुर्वीतालंभनं चा
पि दक्षिणश्रवणस्य वा यथाविभवतो ह्येतत्पूर्वाभावे ततः परं मतं न विद्यमाने
पूर्वोक्त उत्तरप्राप्तिरिष्यत इति दक्षिणकर्णस्पर्शः सा च प्रभासादीनि तीर्थानीत्या
दिना वक्ष्यते अथ बौधायनोक्तं द्रष्टव्यं नीवीं विस्रंस्य परिधायोपस्पृशेदार्द्रं
तृणं भूमिं वा गोमयं वा संस्पृशेदिति यदुक्तं श्रान्ते द्विराचमननिमित्तं दर्शितं होमे
भोजनकाले च संध्ययोरुभयोरपि आचांतः पुनराचामेज्जपहोमार्चनादिष्विति
याज्ञवल्क्योपि स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे आचांतः पुनराचा
मेद्वासो विपरिधाय चेति बौधायनोपि भोजने हवने दाने उपहारे प्रतिग्रहे राम
हविर्भोजनकाले च नाद्विराचमनं स्मृतमिति कूर्मपुराणेपि प्रक्षाल्य पाणि ८२

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1308

पादे च भुंजानो द्विरपः स्पृशेत् शुचौ देशे समासीनो भुक्त्वा द्विरुपस्पृशेत् अशेषो वि
लोमकोस्पृष्ट्वा वासो विपरिधाय च रेतोमूत्रपुरीषाणामुत्सर्गे ऽनृतभाषणे जृंभि
त्वाध्ययनारंभे कासश्वासागमे तथा चत्वरं वा श्मशानं वा समागम्य द्विजोत्तमः
संध्ययोरुभयोस्तद्वदाचांतोप्याचमेत्पुनः इति ... अनृतभाषणं निष्ठुरभाष
णं अत्राचमनापवादमाह बौधायनः दंतवद्दंतलग्नेषु दंतसक्तेषु धारणा ग
लेषु नाचमेत्तेषां संस्थानवच्छुचिरिति दंतलग्नदंतसक्तयोर्निर्हार्यानिर्हार्य
रूपेणाभेदः अत्राह देवलः भोजने दंतलग्नानि निर्हृत्याचमनं चरेत् दंत
लग्नमसंहार्यं लग्नं मन्येत दंतवत् न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः भ
वेच्चाशौचमत्यर्थं तस्मादेवाद्धृणो कृत इति ग्रस्तेषु स्वस्थानेषु तेषु निगीर्णेषु द्वि
रप्यः तथा मनुः दंतवद्दंतलग्नेषु जिह्वास्पर्शे कृते न तु परिच्युतेषु च स्थाना
न्निगिरन्नेव तच्छुचिरिति एतच्च रसानुपलब्धौ वेदितव्यं तथा शंखः दंत

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा.मा. वद्दंतलग्नेषु रसवर्ज्जमन्यत्र जिह्वाभिमर्शनादिति फलमूलादिषु विशेषमाह व्या
८३ तातपः दंतलग्ने फले मूले भक्तस्नेहावशिष्टके तांबूले चेक्षुदंडे च नोच्छिष्टो भव
ति द्विज इति यद्यपि शातातपेन तांबूले चेक्षुसोमे च भुक्तस्नेहावशिष्टके दंतलग्नस्य सं
स्पर्शे नोच्छिष्टस्तु भवेन्नरः त्वग्भिः पत्रैर्मूलपुष्पैस्तृणकाष्ठमयैस्तथा सुगंधि
भिस्तथा द्रव्यैर्नोच्छिष्टो भवति द्विजः एतच्च भुक्तस्य सौरभार्थं पर्यापभक्ष्यविषयं
तांबूलसाहचर्यात् दंतलग्नस्य संस्पर्श इति हार्यस्य दंतलग्नस्य जिह्वया सं
स्पर्श इत्यर्थः याज्ञवल्क्योपि मुखजा विप्रुषो मेध्यास्तथाचमनबिंदवः श्मश्रु चास्यगतं दंत
ततः× सक्तं त्यक्त्वा ततः शुचिरिति मुखनिःसृताबिन्दवो यदंगे निपतंति तदाचमनापादकाः तथा
चमनजः स्पृशंति बिंदवः पादौ य आचामयतः परान् भौमि× नी×कैस्ते समा ज्ञेया न
तैरप्रयतो भवेदिति अत्र पादग्रहणमवयवांतरस्याप्युपलक्षणार्थं तथाचमनः प्र राम
यांत्याचमनतोयाद्याः शरीरे विप्रुषो नृणां उच्छिष्टदोषो नास्त्यत्र भूमितुल्याः स्मृतास्तु ८३

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नाइति स्मृत्युविषये विशेषमाहापस्तंबः नश्मश्रुभिरुच्छिष्टो भवत्यंतरास्ये सद्भिर्याव
न्न हस्तेनोपस्पृशतीति आचमनेवर्ज्यानाह भृगुः विनायज्ञोपवीतेनतथाधौतेनवा
ससा मुक्तकेशिरवाप्याचामेत्कृतस्वेदनः क्रिया सोष्णीषीवद्धपर्यंकः प्रौढपाद
श्रयानतः दुर्देशप्रपदस्थश्चैवनाचामेद्बुद्धिमान्यादिति बौधायनोपि पादप्रक्षा
लनाच्छेषेणनाचामेद्भूमौस्त्रावयित्वाचामेत् नचबहुवदाभस्फेनाभिर्नोष्णाभि
र्नाज्ञाताभिर्नविवर्णाभिर्नकलुषाभिर्नैकहस्तेनगच्छन्नतिष्ठन्नप्रह्वोनप्रणतो
नमुक्तशिखोनावद्धकच्छोनवहिर्जानुर्नवेष्टितशिरानवद्धकच्छोनपठन्नचो
ष्णीषीवापिनाचामेत् वस्त्रेणावध्यवाशिरइति आपस्तंबोपि नवर्षधारास्वा
चामेदिति यमोपि अपःकरनखस्पृष्टायश्चाचामतिवैद्विजः सुरांपिवतिसं
व्यक्तंयमस्यवचनंयथेति ब्रह्मांडपुराणेपि कंठंशिरोवाप्रावृत्यरथ्यापणग
तोपिवा अकृत्वापादयोःशौचमाचांतोप्यशुचिर्भवेदिति गौतमोपि नांजलि

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नापिबेन्न तिष्ठन्नुद्धृतोदकेनाचामेदिति न तिष्ठन्निति स्थलविषयं जले च तिष्ठन्नप्या
पा॰मा॰ चामेत् तथा च विष्णुः जान्वोरूर्द्ध्वं जले तिष्ठन्नाचांतः शुचितामियात् अधस्ताच्छत
८४ कृत्वोपि समाचांतो न शुध्यतीति कौशिकोपि अपवित्रकरः कश्चिद्ब्राह्मणो यउप
स्पृशेत् अकृतं तस्य तत्सर्वं भवत्याचमनं तथा वामहस्ते स्थिते दर्भे दक्षिणेनाचमे
द्यदि रक्तं तद्भवेत्तोयं पीत्वा चांद्रायणं चरेदिति गोभिलोपि हस्तद्वये पवित्रं प्रशंस
ति उभयत्र स्थितैर्दर्भैः समाचामति यो द्विजः सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवे
दिति स्नानानंतरभाविन्याचमने पदोर्विशेषमाह स्नात्वाचामेत्तदा विप्रः पादौ कृ
त्वा जले स्थले उभयोरप्यसौ शुद्धस्ततः देवो भवेदिति हारीतः आर्द्रवासा जले कु
र्यात्तर्पणाचमने जपं शुष्कवासाः स्थले कुर्यात्तर्पणाचमने जपं इति स्थलवि
षये विशेषो दर्शितः स्मृत्यंतरे अलाबुताम्रपात्रे च करकं च कमंडलुं स्वयं गृहीत्वा राम
स्वयमाचामेन्नरो नाप्रयतो भवेत् करकालाबुकाद्येषु ताम्रचर्मपटेनेच स्वह ८४

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1307

त्वाचमनं कार्यं स्नेहलेपांश्च वर्जयेत् करपात्रे च यत्तोयं यत्तोयं ताम्रभाजने सौवर्णे राज
ते चैव नैवाशुद्धं तु तत्स्मृतमिति एवं कृते न लालस्याचमनस्य प्रशंसामाह व्याघ्रपा
त् य एवं ज्ञात्वा लग्नो नित्यमुपस्पर्शनमाचरेत् ब्रह्मादिस्तंबपर्यंतं जगत्स परितर्प
येदिति वृद्धपराशरोपि त्रिः प्राश्नीयाद्यदंभस्तु प्रीतास्तेनास्य देवताः ब्रह्मा विष्णुश्च
रुद्रश्च भवंतीत्यनुशुश्रुमः गंगा च यमुना चैव प्रीयेते परिमार्जनात् पादाभ्यां प्री
यते विष्णुर्ब्रह्मा शिरसि कीर्त्तितः नासत्यदस्रौ प्रीयेते स्पृष्टे नासापुटद्वये स्पृष्टे लो
चनयुग्मे तु प्रीयेते शशिभास्करौ कर्णयुग्मे तथा स्पृष्टे प्रीयेते त्वनलानिलौ स्कं
धयोः स्पर्शनादेव प्रीयंते सर्वदेवताः नाभिसंस्पर्शनान्नागाः प्रीयंते चास्य नित्य
शः संस्पृष्टे हृदये चास्य प्रीयंते सर्वदेवताः मूर्द्धसंस्पर्शनादस्य प्रीतस्तु पुरुषो भ
वेदिति आचमनाकरणे प्रत्यवायो दर्शितः पुराणसारे यः क्रियाः कुरुते मो
हादनाचम्यैव नास्तिकः भवंति हि वृथा तस्य क्रियाः सर्वा न संशय इति इत्या

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा.मा. वमनप्रकरणम् अथ दंतधावनविधिः तत्रात्रिः मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः
८५ तदार्द्रकाष्ठं शुष्कं वा भक्षयेद्दंतधावनमिति व्यासोपि प्रक्षाल्य हस्तपादौ च मुखं च सुस
माहितः दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वंतरा ततः तिक्तं कषायं कटुकं सुगंधं कंटका
न्वितं क्षीरिणो वृक्षगुल्मादेर्भक्षयेद्दंतधावनमिति विष्णुः कंटकी क्षीरवृक्षोत्थं द्वाद
शांगुलसंमितं कनिष्ठांगुलिकास्थूलं पर्वार्द्धकृतकूर्चकं दंतधावनमुद्दिष्टं जिह्वो
ल्लेखनिका तथा सुसूक्ष्मं सरलं दंतस्य समदंतस्य मध्यमं स्थूलं विषमदंतस्य त्रिवि
धं दंतधावनं द्वादशांगुलकं विप्रे कार्यमाहुर्मनीषिणः क्षत्रविट्शूद्रजातीनां न
वषट्चतुरंगुलमिति अंगिराः आम्रपुन्नागबिल्वानामपामार्गशिरीषयोः भक्षये
त्प्रातरुत्थाय वाग्यतो दंतधावनमिति वटाश्वत्थार्कखदिरकरवीरांश्च वर्जये
त् जात्यश्च बिल्वखदिरं मूलं तु ककुभस्य च अथ मेदप्रियंगुं च कंटकिन्यस्तथैव दा.म
वच प्रक्षाल्य भक्षयेत्सर्वं प्रक्षाल्यैव च संत्यजेत् उदङ्मुखः प्राङ्मुखो वा कषायति ८५

1308

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

कं तथा प्रातर्भुक्त्वा च यतवाक्भक्षयेद्दंतधावनमिति कात्यायनो दंतधावनकाष्ठा
नि मंत्रेण मंत्रं च दर्शयति आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ब्रह्मप्रज्ञां च मे
धां च त्वन्नो धेहि वनस्पत इति वर्ज्यान्याहोशनाः नांगुलिभिर्दंतान्क्षालयेत् द
क्षिणाभिमुखो नाद्यान्नीलं धवकदंबकं तिंदुकं गदवं धूकमोचाकरंजवर्जिताः
कर्पासं दंतकाष्ठं च विष्णोरपि हरेच्छ्रियं न भक्षयेत्पालाशं कार्पासं शाकमेव च ए
तानि भक्षयेद्यस्तु दीनः पुरुषः स जायत इति वर्ज्यतिथीनाह विष्णुः प्रतिपद्दर्शष
ष्ठीषु चतुर्दश्यष्टमीषु वा नवम्यां भानुवारे च दंतकाष्ठं च वर्जयेदिति यमोपि चतु
र्दश्यष्टमी दर्शः पूर्णिमा संक्रमो रविः एषु स्त्रीतैलमांसानि दंतकाष्ठं च वर्जयेत् श्रा
द्धे जन्मदिने चैव विवाहेऽजीर्णदोषतः व्रते तथोपवासे च वर्जयेद्दंतधावनमिति स्मृ
तोपि श्राद्धे यज्ञे च नियमान्नाद्यात्प्रोषितभर्तृका श्राद्धकर्तुर्निषेधोयं न तु भोक्तुः
कश्चित्तु न श्रुतामे दंतकाष्ठानां निषिद्धायां तथा तिथौ अपां द्वादशगंडूषैर्विद
ध्याद्दंतधावनमिति वृद्धयाज्ञवल्क्यः उष्टकालेऽपि पापापशांतये लिभिस्त्व

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰मा॰ या मध्यमानामिकांगुष्ठौ वर्जयेद्दंतधावनमिति इति दंतधावनप्रकरणम् अथ
८६ स्नानजपहोमादेर्दर्भपाणिना कर्त्तव्यत्वात्तदादौ दर्भविधिरुच्यते तत्र हारीतः अच्छिन्ना
ग्रान्सपत्रांश्च समूलान्कोमलान्शुभान् पितृदेवजपार्थं तु समाहृत्यात्कुशान्द्वि
जः कुशहस्तेन यज्जप्तं दानं चैव कुशैः सह कुशहस्तेन यो भुंक्ते तस्य संख्या न वि
द्यत इति पुराणेपि कुशपूतं भवेत्स्नानं कुशेनोपस्पृशेद्द्विजः कुशेन चाहृतं तो
यं सोमपानेन संमितमिति गोभिलोपि कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्द
नः कुशाग्रे शंकरं विद्यात्त्रयो देवा व्यवस्थिता इति कौशिकः शुचौ देशे शुचिर्भू
त्वा भूत्वा पूर्वोत्तरामुखः ॐकारेणैव मंत्रेण कुशाः स्पृश्या द्विजोत्तमैरिति उत्पा
दनमंत्रस्तु विरिंचिना सहोत्पन्न परमेष्ठिनिसर्गज नुद पापानि सर्वाणि दर्भ स्वस्ति
करो भवेति कर्मभेदेन विनियोगमाह कात्यायनः हरिता यज्ञिया दर्भाः पीतकाः
पाकयज्ञिकाः समूलाः पितृदैवत्याः कल्माषा वैश्वदेविका इति कुशाभावे शं राम
खः कुशाभावे द्विजश्रेष्ठः काशैः कुर्वीत नित्यतः तर्पणादीनि कर्माणि काशाः ८६

130

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

कुशसमाः स्मृता इति यमोपि कुशाः काशास्तथा दूर्वा यववाब्रीहय एव च बल्वजाः पुंडरीका
णि सप्तधा बर्हिरुच्यत इति वृद्धहारीतः चितौ दर्भाः पथि दर्भा ये दर्भा यज्ञभूमि
षु स्तरणासनपिंडेषु षट्कुशान्परिवर्जयेत् ब्रह्मयज्ञेषु ये दर्भा ये दर्भाः पितृतर्पणे
हता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते अपूता गर्हिता दर्भा ये वाछिन्ना नखैः स्मृताः
क्वथितानग्निदग्धांश्च कुशान्यत्नेन वर्जयेदिति कुशोत्पाटनकालनियममाह हा
रीतः मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः अयातयामास्ते दर्भा नियोक्तव्याः पु
नः पुनरिति पवित्रधारणे फलमाह मार्कंडेयः कुशपाणिः सदा तिष्ठेद्ब्राह्मणो
दंभवर्जितः स नित्यं हंति पापानि तूलराशिमिवानल इति शातातपः जपे होमे च दा
ने च स्वाध्याये पितृतर्पणे अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैरिति पवित्रप्रका
रमाह कात्यायनः अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च प्रादेशमात्रं विज्ञेयं पवि
त्रं यत्र कुत्रचिदिति मार्कंडेयोपि चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं एकैक
न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं त्रिभिर्दर्भैः शांतिकर्म पंचभिः पौष्टिकं तथा चतुर्भि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा.मा. आभिचारं च कुर्वन् कुर्यात्पवित्रकमिति अत्रिः ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिर्विधीयते 1312
८७ भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयत इति इति दर्भविधिप्रकरणम् तदेवं संध्यास्ना
नमित्यस्मिन्वचने स्नानशब्दोपलक्षितानि ब्राह्ममुहूर्त्तोत्थानादीनि कुशविधांता
नि कर्माणि निरूपितानि अथेदानीं मलवत्त्वनोक्तं स्नानं प्रपंच्यते तत्र कूर्मपुराणे
प्रक्षाल्य दंतकाष्ठं वै भक्षयित्वा यथाविधि आचम्य प्रयतो नित्यं प्रातःस्नानं समाच
रेदिति व्यासः उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः स्नायान्नदीषु शुद्धासु शौ
चं कृत्वा यथाविधीति दक्षोपि अस्नात्वा नाचरेत्कर्म जपहोमादि किंचन लाला
स्वेदसमाकीर्णः शयनादुत्थितः पुमान् अत्यंतमलिनः कायो नवच्छिद्रसमन्वितः स्र
वत्येव दिवारात्रौ प्रातःस्नानं विशोधनं प्रातःस्नानं प्रशंसंति दृष्टादृष्टफलं हि तत्
सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकमिति व्यासः स्त्रीणामपि विना नित्यं प्रातः राम
स्नानान्न संशयः अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिंतितं प्रातःस्नानेन पापानि ८७
ध्वंसंते नात्र संशय इति दक्षोपि अस्नात्वा नाद्याद्दिवा मोहाद्रात्रौ अशितेः कृतं अतःस्ना

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नेनतत्सर्वंशोधयंतिद्विजातयइति स्नानप्रकारश्चतुर्विंशतिमतेभिहितः स्नानम
दैवतैर्मंत्रैर्वासस्तोकमनुत्तमम् कुर्याद्व्याहृतिभिर्वापियथशक्तिचेदंजलं वापिवेति
कात्यायनोपि यथाहनित्यं प्रातर्नित्यंस्नायाद्दंतद्विजः दंतान्प्रक्षाल्यनद्या
दौगेहेचेत्तदमंत्रवदिति अम्बुवादितिमंत्रसंक्षेपोभिहितः यतःसत्वात्ग्र
ल्पत्वाद्धोमकालस्यवकृत्वात्स्नानकर्मणः प्रातःसंक्षेपतः स्नानंहोमलोपोवि
गर्हितइति कालनियममाहजाबालिः सततंप्रातरुत्थायदंतधावनपूर्वकं
आचरेदुपसिस्नानंतर्प्पयेद्देवमानुषानिति चतुर्विंशतिमतेपि उषस्युष
स्यस्नानंसंध्यायामुदितेपिवा प्राजापत्येनतत्तुल्यंसर्वपापप्रणाशनमि
ति उदितेप्युदयाभिमुखइत्यर्थः उदयस्योपरिस्नानंचेत्संध्यापूत्कृष्ये
नस्नानपूर्वकत्वात्संध्यायाः संध्योत्कर्षश्चयोगियाज्ञवल्क्येननिषिद्धः सं
धौसंध्यामुपासीतनास्तगेचोदितेरवाविति यथोक्तकालेस्नानंकुर्वन्नप
मर्षणंकुर्यात्तदाह शौनकः स्नात्वाचांतोवारिमध्येत्रिःपठेदघमर्षणमि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ति ब्रह्मांडपुराणे स्नानांगतर्पणं विहितं नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते
तर्पणं तु भवेत्तस्य अंगत्वेन प्रकीर्त्तितमिति यमोपि देहस्थो ह्यमतः कृत्वा पूरये
दुदकांजलिम् गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेदिति कार्ष्णाजिनिः ना
भिमात्रे जले स्थित्वा निक्षिपन्नूर्ध्वमासन इति तर्पयेदिति शेषः नृसिंहपुराणे
पितॄनृषिगणान्देवानद्भिः संतर्पयेत्ततः देवान्देवगणांश्चापि मुनीन्मुनिग
णानपि पितॄन्पितृगणांश्चापि नित्यं संतर्पयेत्तत इति चतुर्विंशतिमते स्ना
नादनंतरं तावत्तर्पयेत्पितृदेवताः उत्तीर्य पीडयेद्वस्त्रं संध्याकर्म ततः पर
मिति भरद्वाजोपि वस्त्रोदकमपेतंते ये मृता दासकर्मिणः तस्मात्सर्वप्रयत्ने
न जलं भूमौ निपातयेदिति वस्त्रनिष्पीडनमंत्रस्तु ये के चास्मत्कुले जाता
अपुत्रा गोत्रिणो मृताः ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकमिति इति स्ना
नप्रकरणम् स्नानानंतरं वासः परिदध्यात्तु तथा च मत्स्यपुराणे एवं स्ना
त्वा ततः पश्चादाचम्य च विधानतः उत्थाय वाससी शुक्ले शुद्धे तु परिधाय

1314

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वैति कर्मकुर्यादिति शेषः योगी याज्ञवल्क्यः स्नात्वैवं वाससी धौते अक्लिन्ने परि 1315
धाय च प्रक्षाल्योरू मृदाद्भिः हस्तौ प्रक्षालयेत्ततः इति अत्र विशेषमाह व्यासः
नोत्तरीयमधः कुर्यान्नोपर्यधस्तमम्बरं नान्तर्वासो विना जातु निवसेद्वस
नं बुधः इति अत्र मार्कण्डेयपुराणे अवमृज्यान्न च स्नानो गात्राण्यम्बरपाणि
भिः न च निर्धूनयात्केशान्वासश्चैव न निर्धुनेदिति अत्र कारणमाह गोभि
लः पिबन्ति शिरसो देवाः पिबन्ति पितरो मुखात् मध्यतः सर्वगन्धर्वा अधस्तात्स
र्वजन्तवः तस्मात्स्नातो नावमृज्यात्स्नानशाटेन पाणिनेति व्यासोपि ति
स्रः कोट्योर्धकोटी च यावन्त्यङ्गरुहाणि वै वसन्ति सर्वतीर्थानि तस्मान्न परिमार्ज
येदिति जाबालिः स्नानं कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि प्राणायामत्र
यं कृत्वा पुनः स्नानेन शुध्यतीति वस्त्रविषये विशेषमाह भृगुः ब्राह्मणस्य
सितं वस्त्रं नृपतेरक्तमुल्वणं पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यत इति प्रजा
CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰मा॰ पतिरपि धौतं वासः प्रशंसन्ति तत्परिलोमदर्शं तथा कषायं धातुरक्तं वा नोल्वणं तत्र कर्हि 1316
८२ चिदिति देवलोऽपि स्वयं धौतेन कर्तव्या क्रिया धर्म्या विपश्चिता न तु रजकधौतेन
नाहतेन न कुत्रचिदिति नाहतेनेति समस्तं पदं अहतलक्षणमाह पुलस्त्यः
ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं अहतं तद्विजानीयात्सर्वकर्मसु पावनमि
ति बौधायनोऽपि कर्तव्यमुत्तरं वासः पंचस्वेतेषु कर्मसु स्वाध्यायोत्सर्गदाने
षु भुक्त्याचमनयोस्तथेति एतत्सर्वकर्मोपलक्षणार्थं अनुत्तरीयस्य कर्ममा
त्रनिषेधात् तथा च मगुलोक्तं विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च श्रौ
तं स्मार्तं तथा कर्म न नग्नश्चिन्तयेदपि नग्नो मलिनवस्त्रः स्यान्नग्नश्चार्द्रपटः
स्मृतः नग्नो द्विगुणवस्त्रः स्यान्नग्नो रक्तपटः स्मृतः नग्नस्तु दग्धवस्त्रः स्या राम
न्नग्नः स्यूतपटस्तथेति विष्णुपुराणेऽपि होमदेवार्चनाद्यासु क्रियासु प ८२
ठने तथा नैकवस्त्रः प्रवर्तेत द्विजो नाचमने जपे गोभिलोऽपि एकवस्त्रो

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1317

नप्रंजीतनकुर्याद्देवतार्चनमिति अत्रांतकल्पमाह योगियाज्ञवल्क्यः अत्नामेधो
न्नवल्लस्सज्ञाल्लहोमाविकानिच कुतपंयोगपट्टंच विद्यासात्तनवेभवेदिति कुत
पंयोगपट्टंवाधारयेदितिशेषः इतिवस्त्रधारणप्रकरणम् अथोर्द्धपुंड्रविधिर्द्वे
सप्तग्रामोद्दर्शितः पर्वताग्रेनदीतीरेममक्षेत्रेविशेषतः सिन्धुतीरेचवल्मीके
तुलसीमूलमाश्रिता मृदएतास्तुसंग्राह्यावर्जयेत्त्वन्यमृत्तिकाः श्यामंशांतिक
रंप्रोक्तंरक्तंवश्यकरंभवेत् श्रीकरंपीतमित्याहुर्वैष्णवंश्वेतमुच्यते अंगुष्ठःपुष्टि
दःप्रोक्तोमध्यमायुष्करीभवेत् अनामिकान्नदानित्यंमुक्तिदाचप्रदेशिनी एतैरं
गुलैर्भेदैःकारयेन्ननखंस्पृशेत् वर्त्तिदीपाकृतिंवापिवेणुपत्राकृतिंतथापद्म
स्यमुकुलाकारंतथैवकुमुदस्यच मत्स्यकूर्माकृतिंवापिशंखाकारमतःपरं दशां
गुलप्रमाणंतुउत्तमोत्तममुच्यते नवांगुलंमध्यमंस्याद्दशांगुलमतःपरं सप्तष
ट्पंचभिःपुंड्रंमध्यमंत्रिविधंस्मृतं चतुस्त्रिद्व्यंगुलैःपुंड्रंकनिष्ठंत्रिविधंभवेत्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰मा॰ ललाटे केशवं विंद्यान्नारायणमथोदरे माधवं हृदि विन्यस्य गोविंदं कंठकूपके
९० उदरे दक्षिणे पार्श्वे विष्णुरित्यभिधीयते तत्पार्श्वे बाहुमध्ये तु मधुसूदनमंतु स्मरेत्
त्रिविक्रमं कंठदेशे वामे कुक्षौ तु वामनं श्रीधरं वाहुके वामे हृषीकेशं तु कंठके
पृष्ठे तु पद्मनाभं च ककुद्दामोदरं स्मरेत् द्वादशैतानि नामानि वासुदेवेति मूर्द्ध-
नि पूजाकाले च होमे च सायंकाले समाहितः नामान्युच्चार्य विधिना धारयेदूर्द्ध्व-
पुंड्रकमिति मत्स्यपुराणेपि ऊर्द्ध्वपुंड्रं मृदा शुभ्रं ललाटे यस्य दृश्यते स चांडालो
पि शुद्धात्मा पूज्य एव न संशय इति इत्यूर्द्ध्वपुंड्रप्रकरणं प्रातःस्नानप्रसंगेन स्ना-
नानंतरमप्युच्यते तत्र शंखः स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः तयोस्तु
वारुणं मुख्यं तत्पुनः षड्विधं मतमिति तत्र मुख्यस्नानस्य षट्प्रकारत्वमग्निपु- दाम
राणे दर्शितं नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं क्रियास्नानं तथा ष- ९०
ष्ठं षोढा स्नानं प्रकीर्तितं एतेषां लक्षणमाह शंखः अस्नातस्तु पुमान्नार्हो जप-

ग्निहवनादिषु प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्त्तितं चांडालशवपूयादि
स्पृष्ट्वा स्नातो रजस्वलां स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् पुष्य
स्नानादिकं यत्तु दैवज्ञविधिचोदितं तद्धि काम्यं समुद्दिष्टं सकामस्तत्प्रयोज
येत् जप्तुकामः पवित्राणि अर्चिष्यन्देवताः पितॄन् स्नानं समाचरेद्यत्तु क्रि
यांगं तत्प्रकीर्त्तितं मलापकर्षणं नाम स्नानमभ्यंगपूर्वकं मलापकर्षणार्था
य प्रवृत्तिस्तस्य नान्यथा सरस्सु देवखातेषु तीर्थेषु च नदीषु वा क्रियास्नानं
समुद्दिष्टं स्नानेन तत्र मता क्रियेति यद्यपि मध्याह्नस्नानस्येदानीमवसरः
तथापि प्रातःस्नानवत्तस्यापि नित्यत्वात्प्रसंगेनाभिधीयते तस्य नित्यत्वं च व्याघ्रपा
देनोक्तं प्रातःस्नायी भवेन्नित्यं मध्यस्नायी तथा भवेदिति कूर्मपुराणे ततो म
ध्याह्नसमये स्नानार्थं मृदमाहरेत् पुष्पाक्षतान्कुशतिलान्गोमयं शुद्धमेव
च नदीषु देवखातेषु तीर्थेषु च सरस्सु वा स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणे
षु च स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च परकीयनिपानेषु न स्नायाद्वै

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पा॰मा॰ कदाचन पंचपिंडानसमुद्धृत्य स्नायाद्वा भ्रंशमवाप्नुयादिति तत्राधिकार्यनधिका
९१ रिणौ व्यासो विभजते स्नानं मध्यंदिने कुर्यात्सुजीर्णेऽन्ने निरामयः न मन्त्रकालं कु
र्वीत रोगी नाज्ञानेऽभक्ष्ये नाकुल इति आश्रमभेदेन स्नानव्यवस्थामाह दक्षः प्रातर्म
ध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिण
इति अन्वयव्यतिरेकाभ्यां स्नानस्य समंत्रतामाह व्यासः मंत्रपूते जले स्नानं प्रो
क्तं स्नानफलप्रदं वृथा वा विमग्नानां यादसामिव तत्फलं योगियाज्ञवल्क्यः
मत्स्यकच्छपमंडूकास्तोये मग्ना दिवानिशं वसंति चैव ते स्नानान्नाप्नुवंति फ
लं क्वचिदिति समंत्रत्वं द्विजातिविषयं यदाह विष्णुः शूद्रस्य विनाक्लेव मंत्र
वत्स्नानमिष्यते तूष्णीमेव हि शूद्रस्य स्त्रीणां च कुरुनंदनेति स्नानार्थं मृदमाह
रेदिति यदुक्तं तत्र विशेषमाह शातातपः शुचिदेशात्तु संग्राह्या शर्कराश्मा
दिवर्जिता रक्ता गौरा तथा श्वेता मृत्तिका त्रिविधा स्मृता वल्मीकाखूत्करा राम
न्नेपाज्जलान्तःपथि वृक्षतयोः कृतशौचावशेषाच्च न ग्राह्याः सप्त मृत्तिकाः मृ ९१

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1321

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1322

ताकथा॥कंठेसंबधातेयेनसवैकुंठप्रियोभवेत॥८२॥इतिपरमइदं
सर्वसिद्धांतसिद्धंसपदिनिगदितंतेशास्त्रपुंजंविलोक्यजगतिशुकक
थातोनिर्मलंनास्तिकिंचित॥८३॥विषयरससुखहेतोर्द्वादशस्कंधसा
रं॥परनाथोनिपततपाश्रृशोतिभक्त्यापक्षेनांकपयतिशुद्धवेष्णवाग्रे
तोसम्यक्विधिकारसात्फलंलभतेयथार्थ्यान्नहिभुवनेकिमप्यश
साध्यं॥८४॥इतिश्रीपद्मपुराणेउत्तरखंडेश्रीभागवतमाहात्म्यनि
रूपणेश्रवणविधिकथनंनामषष्ठोध्यायः॥६॥इदंपुस्तकंलिखितंप
चुनीलालेनलेखराजात्मजेनश्रीकृष्णदासेनवारिपुस्यमध्येसंवत
१८६४वैशाखकृष्णदिदशम्यांरविवासरेआत्मार्थंपरउपकारपठनार्थं

दंभि ज्ञापयोः हेमदेवाइदूपदेशेऽनयोः स्वरस्य इत्वादि ऋलोपश्च इस इकारस्य दीर्घः तादंभेवा दं
भेदंभेज्ञिपवृत्रणोदिदंभिषति जिज्ञपिषति ज्ञीप्सति धीप्सति धिप्सति समाननामिसमीपाद
सात्परः सो वसादिः कि दवा च्यः इति सप्रक्रिया अथ यङ्‌प्रक्रिया॥ अतिशायेदं तादेर्येङ्‌ द्वि
स्वरस्यादेरेकस्वराद्धातोरतिशये यङ्‌प्रत्ययो भवति तस्मिन्सति धातोर्द्विर्वचनं भवति यङि
यङिस्तति लुकि च पूर्वस्य नामिनो गुणो भवति सधातुः ङितात्मनेपदं अपश्च इति शायेनाभ
वतीति बोभूयते बोभूयेत बोभूयतां अबोभूयत बोभूयांचक्रे बोभूयिषीष्ट बोभूयिता बोभूयि
ष्यते अबोभूयिष्यत अबोभूयिष्ट भुज पालनाभ्यवहारयोः बोभुज्यते बोभुज्येत बोभुज्य
तां अबोभुज्यत अनपि च हसात्ते हसात् इत्तरस्य यङो लुक् भवति अनपि विषये धातुंश लोपति
नि ते समाननामिनां गुण हडीनवा [illegible] बोजांचक्रे बोभुजिषीष्ट बोभुजिता बोभुजिष्यते अ
बोभुजिष्यत अबोभुजिष्ट [illegible] लिट् [illegible]
योः जो [illegible] यते विद ज्ञाने वेविद्यते आनः। यङि लुकि च सति पूर्वस्याकारस्याकारो
भवति अकितः इपचषपाकेपाप च्यते अपापच्चिष्ट [illegible] आदनेस्वरादीनां

वि विश्रुकत भु [illegible]

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

अटादीनां यङ्वक्तव्यः अटं अशं ऊर्णुञ् ऋ एते अटादयः स्वरादेः परः अट गतौ अट
ट्यते अश भोजने अशाश्यते आशाशिष्ट ऊर्णुञ् आच्छादने ऊर्णोनूय्यते नदराः संयो
गादयो द्विर्नेर्गुणोर्तिसंयोगाद्योः यकारे परे रेफस्य द्वित्वं वाच्यं अरार्यते जभंजपां
नेकजमानस्य जपादीनां च पूर्वस्य नुगागमो भवति यङि लुकि च तं निजप व्यक्तायां
वाचि जभ गात्रविनामे यभ मैथुने दह भस्मीकरणे दंश दशने भंज आमर्दने
दश पीडायां इते जपादयः तनु विस्तारे तंतन्यते अतंतनिष्ट गम्लृ गतौ जंग
म्यते अजंगमिष्ट भ्रमु चलने बंभ्रम्यते अबंभ्रमिष्ट जंजप्यते जंजभ्यते अजसे
प्यनुस्वारः अनुदेशिनां आदेशो नित्यं यंयभ्यते दंदह्यते दंदश्यते बंभज्यते
नो लोपः पंपश्यते वंलयांतस्य वानुकमवस्थौ ल्पेमंमव्यते चल कंपे चंचल्य
ते चरफलोरुच्चासस्यानयोर्यङि लुकि च सति पूर्वस्य नुगागमो भवति अकारस्य
चउकारः चर गति भक्षणयोः चंचूर्यते फल निष्पत्तौ पंफुल्यते रय दाने दंदय्यते दाद
यते रीगृदुपधस्य ऋकारोपधस्य धातोर्यङि सति पूर्वस्य रीगागमो भवति किल्वा

चं   उतथल   सरसृ   सासमव्यते

स्माकः पूर्वसदृक्त

यदि सृक्षे वर्चि वृदृमिलस्य जाके

वसता

करोवा

स्याक:

1325

दाकारमावः तरीतृस्यते अत्वण्त्वाभावो वाच्यः वरीवृत्स्यते जरीगृहस्यते कृपेरो लः ऋ लृ च
लीक्लृप्यते ऋत्वतोपि रीक् वाच्यः वरीवृश्च्यते परीपृच्छ्यते वरो येङि न तं पुस्तारणं वा व्यपतेपदं सं
तुद्धृत्तं भ्रंशं दंशं कषं चपत स्कंदां यङि लुकि स्वति च पूर्वस्यानीगाम्मो वाच्यः पनीपद्यते अपनी
पदिष्ट स्रंसु ध्वंसु भ्रंसु भ्रु धः। पतने सनीस्रस्यते दनीध्वस्यते बनीभ्रश्यते दनीदश्यते करी
वंचंगतो चनीकस्पते वनीवच्यते अवनीवचिष्ट पनीपत्यते चनीस्कद्यते ऋतोरिः
ऋकारस्य रिङ् आदेशो भवति यङि सति ततो द्वित्वं ये चेक्रीयते हजवरले वव्रीयते
दादेरिः अपितदाघामागैहाकुपिवतोस्या नामिकारो भवति किङति हसे परे देदीति
यते देधीयते मेमीयते जेगीयते जेहीयते पेपीयते षोऽन्तकर्मणि सेसीयते तेष्टीयते
घ्रां ध्मोरीं अनयोरीकारो भवति यङि सति जेघ्रीयते देध्मीयते हांते दिंसा यां घ्रीमा
वो वक्तव्यः जेघ्रीयते अजेघ्रीयिष्ट ढिरवक्तोस्यरूटे तेः कृत्वं वा वाच्यं जंघंन्यते अजंघ
निष्ट गनस्येभ्यः कौटिल्ये यङ् वक्तव्यः कं कं वूजति वा वूजपते चंचयो यङि कीवाच्यः
चेयस्तानयालनद्योः चेकीयते अचेकीयिष्ट कंवते यङि चुत्वाभावो वाच्यः कुंस
हे कोकूयते अकोकूयिष्ट शीङो यङ् वृत्तिये वक्तव्यः शाशय्यते शाशयां चक्रे

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

अशाशायिषत्सीत्ति यङ्प्रक्रियाः अथ यङ्लुक्प्रक्रिया वा स्याद्लुगन्तं वन्नेनेअ
म्येत्स्नूकप्रत्ययसंयोगं विनापि वा यङो लुक् भवति लुकि सति पितिस्मिवेकाचो
वन्नेवाः बोभवीति बोभोति बोभूतः बोभुवति बोभूयात् बोभवीतु बोभोतु अबोभ
वीत् अबोभोत् बोभवांचकार बोभूयात् बोभविता बोभविष्यति अबोभविष्यत् द
देः पे गुणं बाधित्वा नित्यत्वात् वुक् अबोभूवीत् अबोभूत् दादेः पेट्ट ति सिलोपः
लुग्वाच्यः तेन गुणे ह्रस्व योन इति निषेधो अबोभूत् अबोभूवुः पापचीति पाप
क्ति पापक्तः पापचति पापच्यात् पापचीतु पापक्तु ...स्ताद्धि हि। पापग्धि अपाप
चीत् अपापच्चिषुः द्वैः स्तवे पि नोपधायाः गुणः बोभुजीति बोभोक्ति बोभुक्तः बोभु
ज्यात् बोभुजीतु बोभोक्तु बोभुग्धि अबोभुजीत् अबोभोक् बोभुजांचकार अबोभु
जीत् अबोभुजिष्टां वावदीति वावक्ति वावक्तः वावद्यात् वावदीतु वावक्तु वावद्धि अ
वावदीत् जाघटीति जाघट्टि जाघट्टः जाघटीतु जाघट्टु अजाघटीत् अजाघटु
अजाघट् जाघटिता अजाटीत् ऋकारं नाम्नउपधानां च यङ्लुकि सति पूर्वस्य
रुक्री रुरीगागमो वक्तव्यः चर्करीति चरिकरीति चरीकरीति चर्कर्ति चरिकर्ति

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ह्रन ह्वतने

ञम ज्रपां नुकु

चर्कृतः चरिकृतः चरीकृतः चर्कर्ति चर्कर्ति चरीकर्ति वर्वृतीति वरिवृतीति वरीवृतीति व
र्वर्त्ति वरिवर्त्ति वरीवर्त्ति वंचगन्तौ पदस्यं नुधं स्तुरुति नीगा गामः वृनी वंची ति जंबांनी
ति जंगमी षि मोनो धान्तोः धात्तोर्मकारस्य नकारो भवति वमयो ऽसेपदान्ते च जंग
न्सि जंगन्यः जंगन्य जंगमी मि जंगन्मि जंगन्वः जंगन्मः जंगमि ता अजंगमीत् दृहि
के स्यंदंतेः कुतेवा च्यां जंघनीति जंहंति जंघंतः जंघ्नति जंघनति जंहति ता अजंघनी
त् अजंघांनीत् जाहेति दृरुवः ग्नतः जाहाति जाहीतः जाहति जाहीयात् जौहेतु जाहातु
जाहीतात् ईर्वोस्तौ जाहीहि जाहिहि जाहाहि अजाहेत् अजाहात् अजाहीतां अजाहसीत्
जहातेः दृर्वस्य टी ह्योंवेति केचित् जाहेति जहेति जाहातिप वंदाहेति उतिपर्वलुक्
क्रिया अप्यनाम धातु प्रक्रिया नाम्नो यईचास्य नोम्नोरुह्याया मयेंब्रपुत्रस्याभवति
त संन्नियोगे चाकारस्य ईकारः अत्मनः पुत्रमिच्छति पुत्रीयति पुत्रीयेत् पुत्रीयतु
अपुत्रीयत् पुत्रीयांकार पुत्रीय्यात् पुत्रीयिता अपुत्रीयीत् न्याटौ पुत्रस्ये ठोकारौ
कारयोर् वोर्वोव न्यौ गामिच्छतीति गव्यति गव्येत् गव्यतु अगव्यत् गव्यांचकार

गोनु स्वंव अदेसह्रो। अउौ नुआ वअदेसहे गो गोश्हहै। अविधक्रिनामा एलकर नामसंज्ञाकारी

यतः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1328

यतः यकारस्य अकारस्य लोपो भवति। अनपि यकारे रेफे

हस्तांशस्य लोपो वा नपि गवां च कार गव्यात् गव्यितां गवितां। गव्यीत ताभिर्वृति
तद्यति तद्यां चकार तद्वां चकार। तद्यीत तद्वदीत मद्यति पुष्पद्यति पुष्पद्यां
चकार। पुष्पद्यीत। स्रस्यति धनीयति धनीयां चकार। धनीयीत पुत्रकाम्य
ति पुत्रकाम्यां चकार। पुत्रकाम्यीत। पुत्रकाम्यिषां करणे चतामः करणे यत्र
प्रत्ययो भवति। कंडूं करोति कंडूयति। कंडूयत। नमः करोति नमस्यति नमस्यांच
कार। नमस्यीत। तपः करोति तपस्यति तपस्यां चकार। तपस्यीत। दीर्घलवणयो
तृष्णायां यः [illegible] दीर्घस्यति। दीर्घस्यां चकार। दीर्घस्यीत। ल
वणस्यति। लवणस्यीत। शब्दादिभ्यो यङ्। शब्दायते शब्दायां चकार। शब्दा
यिष्ट। वैरायते। वैरायिष्ट। कलहायते कलहायां चकार। कलहायिष्ट। अभ्रायते मेघा
यते। मेघायिष्ट। उष्म वाष्पाभ्यामुद्वमने यङ् वाच्यः। उष्मायते उष्मायिष्ट। उ
ष्ममुद्वमति वाष्पमुद्वमति वाष्पायते। वाष्पायिष्ट। णिङ् करणे नाम्नो णिङ् प्रत्य
यो भवति करणे। [illegible] चट्टितड्डितादिलोपः। कामे भयपदार्थः। चटं करोति चट

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

ते चेत्तेः श्रंतुनुरत्न चिती संज्ञाने चेतयति चेतयेत चेतयतु अचेतयत चेतयांचका
र चेत्यात चेतयिता चेतयिष्यति अचेतयिष्यत् अचीचितत् चिति स्मृत्यां इदितः चिंत
यति चिंतयेत चिंतयतु अचिंतयत चिंतयांचकार चिंत्यात चिंतयिता चिंतयिष्यति अ
न चिंतयिष्यत लघोरभावान्न दीर्घः अचिचिंतत् अर्चयति अर्चयेत अर्चयतु अर्चयत अ
र्चयांचकार अर्च्यात् अर्चयिता अर्चयिष्यति अर्चयिष्यत स्वरादेः परः स्वरादेर्द्वितोः
परो द्वितीयोऽवयवो द्विरुक्तो न संयोगादिर्भवति नद्राः संयोगादयो द्विर्न इति रेफस्य न द्वि
त्वं आर्चिचत् कृतसंशब्दे उपधायाश्च ऋकारस्य इरादेशो णिप्रत्यये वा च्यः कीर्त्तयति की
र्त्तयेत कीर्त्तयतु अकीर्त्तयत कीर्त्तयांचकार कीर्त्यात कीर्त्तयिता कीर्त्तयिष्यति अ
कीर्त्तयिष्यत अचिकीर्त्तत गण संख्याने अकारांतः गणयति गणयेत गणयतु अगण
यत गणयांचकार गण्यात गणयिता गणयिष्यति अगणयिष्यत अलोपस्य स्थानिवत्वान्न
वृद्धिः अलोपिनो नादुःकार्यं कथंगणयोरदुःकार्यं वेति केचित् अजीगणत् अजगणत् क
सस्वरादिर्वृद्धिः थ वाक्यप्रबंधे कथयति कथयेत कथयतु अकथयत कथयांचकार कथ्यात कथ
यिता कथयिष्यति अकथयिष्यत अचीकथत इति चुरादिप्रक्रिया इति दश

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

सत्वरस्य हिरः

१ गण्डक्रमः धातोः प्रेरणे प्रयोजकव्यापारे वाच्ये धातोर्णिच् प्रत्ययो भवति कुर्वन्तं कारयतीति यः

स्तः प्रयोजकः डुकृञ् करणे कारयति कारयेत् कारयतु अकारयत् कारयांचकार कारया

न्कारयिता कारयिष्यति अकारयिष्यत् अचीकरत् डुपचष् पाके पाचयति एवं करोति

नमस्य प्रेरयति अपीपचत् हन् हिंसागत्योः हनो घत् हन्तेर्घत्वादेशो भवति ... ण

... घातयति अजीघतत् शद्लृ शातने शदेः शत् शादेशादादेशो भवति जौ परे शा

तयति अशीशतत् रातो जौ पुक् ऋ गता विन्यस्य आकारान्तस्य च पुगागमो भवति जौ परे

अत उपधा डुदाञ् दाने दापयति अदीदपत् डुधाञ् धारणपोषणयोः धापयति अदीधपत् पुगन्तस्य गुणो

वक्तव्यः ऋ गतौ अर्पयति स्वरादेः परः अर्पिपत् ष्ठा गतिनिवृत्तौ स्थापयति तिष्ठतेः ... धा आदेशः ...

इकारो अपि ... वक्तव्यः ... अतिष्ठिपत् पा पाने पादेर्युक् पा शा ह्वा सा ... वेञ् वेञां युगा तूपम

गमो भवति पाययति पिबतेरङ् पूर्वकारो पधालोपो वक्तव्यः अपीप्यत् शोतन्तूकरणे के

उपमांजना ... श्यत् ... शाययति अशीशयत् ह्वो ह्वेदेने ह्वाययति अचिह्वयत् षो अन्तकर्मणि

साययति असीषयत् ह्वेञ् स्पर्द्धायां शब्दे च ह्वाययति ह्वयतेरङि संप्रसारणं पुगभावश्च

वक्तव्यः ह्वेञ् संप्रसारणस्य ह्वयतेरङि गुणवृद्धी वाच्ये अजुहावत् पूर्ववत् दीर्घाभावः

दीर्घनिषेधे उपमांजना

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

अजुहूवत् व्येञ् संवरणे व्याययति अविव्ययत् वेञ् तंतुसंताने। वाययति अवीवयत् प्रीञ् धूञो
नुक्। अलयीनुगागमो भवति ज्ञौ परे प्रीञ् तर्पणे प्रीणयति अपिप्रिणत् धूञ् कंपने धूनयति अ
दूधुनत् स्मिङ् ईषद्धसने स्मिङो देशात्वं ज्ञौ वा चं विस्मापयति अविस्मयत् नहे ज्ञौ वा पो वक्त
व्यः। रुहे वीजजन्मनि रोहयति रोपयति अरूरुहत् अरूरुपत् क्लृपू सामर्थ्ये कृपे रो लः कल्प
यति उपधा ऋवर्णस्यादिः ऋ वा वक्तव्यः अचीक्लृपत् अचकल्पत् वृतु वर्त्तने॥ वर्त्तयति अवीवृत
त् अववर्त्तत् मृजू शुद्धौ मार्जयति अमीमृजत् अममार्जत् इङा देज्ञौ पुक इङः क्रीजीनामात्वं
भवति ज्ञौ परे ह्रीव्लीरीक्नूयीक्ष्मायीनां पुगागमो भवति ज्ञौ परे इङ् अध्यापयते अध्यापयति अध्या
पिपत् डुक्रीञ् द्रव्यविनिमये क्रापयति क्रापयते अचिक्रपत् जिजये ज्ञापयति अजीजपत् ह्रील
ज्जायां ह्रेपयति अजिह्रिपत् व्ली वरणे व्लेपयति अविव्लिपत् रीङ् तरणे रेपयति रेपयतः रेपयं
ति अरीरिपत् क्नूयी उन्दे शब्दे च वक्तव्यः क्नोपयति अचुक्नुपत् क्ष्मायी वि
धूनने क्ष्मापयति अचिक्ष्मपत् लीङ् श्लेषणे लीयते ज्ञौ वात्वं वा विलापयति व्यलीलपत्
ली लोः नुग्लुकौ वा विलीनयति व्यलीलिनत् ला नृत्ये लापयति लापयेत अलीलप
त् लालयति अलीललत् अलीललत् अलीललत् नरितः ऋकारेतो नेकस्वरस्य शास्वादिः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

१३३२

उतो कार्यं न भवति टौ कृ गतौ टौकयति टौकयेत् टौकयतु अटौकयत् टौकयांचकार टौ
क्यात् टौकयिता टौकयिष्यति अटौकयिष्यत् टौकन । टै याचृ याचनायां याचयति
२ अयाचयत् शास्तु अनुशिष्टौ शासयति अशशासत् तुषेज्जौ टी धौ व नेच्यः तुष वैकृत्ये
दुषयति अदूदुषत् दुषेज्जौ वा गुणो वाच्यः दोषयति दोषयेत् दोषयतु अदोषयत् दोषयां
चकार दोष्यात् दोषयिता दोषयिष्यति अदोषयिष्यत् दूषत् दरिद्रा दुर्गतौ दरि
द्रयति अददरिद्रत् चट् चेष्टायां मितां ह्रस्वः ॥ धातुपाठे मितः संस्येवं पठितानां ह्रस्वो भव
ति घटयति अजीघटत् व्यथ दुःखभयचलनयोः व्यथयति व्यथयेत् व्यथयतु अव्यथ
यत् व्यथयांचकार व्यथ्यात् व्यथयिता व्यथयिष्यति अव्यथयिष्यत् विव्यथत् एवं
पंच पंचा ॥ एतौ रूपं जनी जृष् क्नु स रंजो अमन्ताश्चेति मिताः जनयति अजीजनत् जृष
वयोहानौ ष इ नजरयति अजीजरत् क्नुस ह्वे शब्दे दीप्त्यौः क्नुसयति अचुक्नुसत् रंज रागे
रंजेर्जौ नलोपो वाच्यः रजयति अरीरजत् शम दम उपशमे शमयति दमयति अशीश
मत् अदीदमत् ज्ञा अवबोधने ज्ञाने जौ वा ह्रस्वः ज्ञापयति ज्ञपयति अजिज्ञपत् ज्वल
ग्लौ स्नाश्च वामितः ज्वलयति ज्वालयति अजिज्वलत् ग्लापयति ग्लपयति अजिग्लपत् स्ना

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1333

निसर्षपाः सवचाः ॥ हिंगुगवुस्थिमरिचाः समभागा छागमूत्रसंपिष्टाः ॥ धूपनविधिना शमयन्त्येते
सर्वान्ज्वरान्निपतन्म ॥ गृहजाकिनीपिशाचप्रेतविकारानेनयंधूपः ॥ गुग्गुलजटाजटाधारी । भूतकेशीजटा
मसी । गुड्डनिर्माल्यपुष्पादि । मयूरचंद्रकंममूरगुच्छुः ॥ इतिमाहेश्वरधूपः ॥ सोमंसानुचरंदेवंसमातृ
गणमीश्वरम् ॥ पूजयन्प्रयतः शीघ्रंमुच्यतेविषमज्वरात् ॥ सोमंउमयासहितं सानुचरंनंदीगणसहितं ॥ प्र
यतः पवित्रः ॥ विष्णुंसहस्रमूर्द्धानंचराचरपतिंविभुम् ॥ स्तुवन्नामसहस्रेणज्वरान्सर्वान्व्यपोहति ॥ सहस्रमू
र्द्धानमितिसहस्रशीर्षेत्यादिवेदाभिहितंनामसहस्रेणभारतोक्तेनेत्यर्थः ॥ ज्वरस्यापिदेवतापूजाकार्या ॥ व
नस्पतिर्विरुहः ॥ नीचापतनंदेवाधिष्ठितंपुरुपोलमन्त्रेणश्रीशैलादि ॥ ॥ इति विषमज्वराधिकारः ॥ अथ
जीर्णज्वराधिकारः ॥ तत्रजीर्णज्वरस्यसामान्यलक्षणमाह ॥ योद्वादशभ्योदिवसेभ्यऊर्द्ध्वंदेहेपत्रयेमे[illegible]णाय
ऊर्द्ध्वम् ॥ न्दशानतनोतिस्तुजिमंदवेगोभिषभ्यैस्तुक्तोज्वरएषजीर्णः ॥ ज्वरस्येवविशेषंवातबलासकमाह ॥ निसंमं
हृज्वरोऽतन्द्रुः स्तनः कृशोऽल्पासिध्यति ॥ स्तब्धांगः श्लेष्मभूयिष्ठोनरोवातबलासकी ॥ वातबलसकीनरंदेहमभवे
त् ॥ स्तनः शोथी श्लेष्मभूयिष्ठोवहुलश्लेष्मकः ॥ अथजीर्णज्वरस्यसामान्यचिकित्सा ॥ जीर्णज्वरीनरः कुर्याच्छो
धनंसंकरचनं ॥ लंघनान्नभवेत्तस्यज्वरस्तुस्याद्बलीयतः ॥ पुराणेऽपिज्वरेदोषापथ्यपानैः पुनस्तथा ॥ लंघ
येन्नरतसस्वास्पूर्वामेवाचरेत्क्रियाम् ॥ तथापूर्ववत् ॥ निदिग्धिकानागरकामृतानांक्वाथंपिवेन्मिश्रितपिप्पली

नंदीगण

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1334

कफम्॥ जीर्णज्वरारोचककासशूलश्वासाग्निमान्द्यार्दितपीनसेषु॥ हृत्कृच्छ्रजानमथ आपः सा पतंते नोपयुज्य
५१ ते॥ इति त्रिकण्टकक्वाथः॥ पिप्पलीमधुसंयुक्तः क्वाथः शिशिलोद्भवो द्भवः॥ जीर्णज्वरकफध्वंसी पंचमूल
कृतोऽथवा॥ अमृतायाः कषायं तु शीतलीकृतमीरितम्॥ मधुपादयुतं पीतं जीर्णज्वरहरं परम्॥ पिप्प
लीमधुसंमिश्रं गुडूचीस्वरसं पिबेत्॥ जीर्णज्वरकफप्लीहकासारोचकनाशनम्॥ जीर्णज्वरे निमान्द्ये च व
शासने गुडपिप्पली॥ कासाजीर्णारुचिश्वासहृत्पाण्डुकृमिरोगहृत्॥ द्विगुणे 8 पिप्पलीचूर्णाद्गुडोऽत्र
भिषजां मतः॥ पिप्पलीमधुसंयुक्ता मेदःकफविनाशिनी॥ श्वासकासज्वरहरी पाण्डुप्लीहो[illegible]पहा॥
आमलकं चित्रकं पथ्या पिप्पली सैन्धवं तथा॥ चूर्णितोऽयं गणो ज्ञेयः सर्वज्वरहरः परः॥ भेदी रुचिकरः श्ले
ष्महन्ता दीपनपाचनः॥ इति आमलक्यादिचूर्णम्॥ द्राक्षामृताशठीशृंगीमुस्तकै रक्तचन्दनम्॥ नागरक
टुकापाठाभूनिम्बः सदुरालभाः॥ उशीरं धान्यकं पर्पटं वालकं कण्टकारिका॥ पुष्करं पिचुमर्दं च हरणाष्टांग
मिदं स्मृतम्॥ जीर्णज्वरारुचिश्वासकासश्वयथुनाशनम्॥ इन्द्राहिरण्याहृशांतः क्वाथः॥ त्रिवृद्धा पंचवृ
द्धा वासहृद्धाथवा क्रमात्॥ गायत्रीरेतांसं पिप्पलीः पिबेद्दश दिनानि हि॥ तथैवापनयेद्धेता सर्वं विंशति
वासरान्॥ पिबतां ज्वरणाभिः 8 सा लालु रोगस्व शाम्यति॥ कासः श्वासोऽग्निमान्द्यं च कफाधिकं च नश्यति॥ एम०
तत्र पिप्पलीवर्द्धिपर्याकफवृद्धिदुग्धवृद्धिपर्याग्नि॥ इति वर्द्धमानपिप्पली॥ वातश्लेष्मज्वरे कासारोचके॥ ५१

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

३

1335

३ मे॰ टी॰

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

सतिविन्नवृत्तिःस्यात् किं पुनर्वक्तव्यं अन्यथा वृत्ति भवत्येवेत्यर्थः आलोके दर्शने द्योत इत्यमरः ३ वि
चारानंतरं किमकरोत्यत आह प्रत्यासन्न इति जीमूतेन मेघेन स्व स्यात्मनः कुशलं द्योमत्सकुरां प्रवृत्तिं
ज्ञापयितुं प्रीतः संतुष्टः संपादितसत्कारोसौ सत्कार्ये संपादयिष्यति संतुष्टः सन् रसयत्तस्मै मेघा
य स्वागतं शोभनमागमनं व्याजहार उवाच प्रीत्या स्नेहेन अस्तु स्वस्ति इष्टं वचनं यत्र तत् मां गत्य व
चः कुशलं तवेत्यादि कीदृशाय तस्मै प्रत्यग्रैः नवीनैः कुटजानां गिरिमल्लिकानां पुष्पैः कल्पितो
दत्तोर्घः यस्मै स तथा कीदृशः नभसि श्रावणे प्रत्यासन्ने निकटस्थे सति दयिता कांता तज्जीवितं
तस्याः जीवनं धारयिता तद्दर्शयति प्रत्यासन्ने नभसीति पाठे घनव्याकुलेन चेतसि कुनः प्रथितेस
तीत्यर्थः कापि जीविता लंबनार्थमिति ज्ञात्वैव नन्वर्थः प्रयोजनं जलप्रवृत्ति विशेषणं तथा
त्यजस्य सन्निधानत्वेन निजनिवासे कया सा विस्मरिष्यतीति मेघेन स्वप्रवृत्तिं ज्ञापयितुं द
ज्ञात्वैव तस्मै स्वागतमप्याक्षीत् नभः संश्रावणो नभा इत्यमरः नभाः श्रावणिकश्च
ह मातरस्य ग्रहं क्षिद्धिं मयपद्मत्वं महावल इति महाज्वरहरं ॥ अथ कुंभकग्र॥

1440

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1441

॥ इतिवेदांतसिद्धांतमुक्तावलीसमाप्ता ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

असंभावनादिनिवर्त्तकमननाद्युपकृताद्वाक्यविचाराच्छक्तितात्पर्यग्राहकानुकूलव्यापारादनुष्ठितादप्रतिबद्धं ज्ञानं जायत एवेत्यर्थः ननु ज्ञानान्मुक्तिरिति कोर्थः किं ज्ञानमेव मुक्तिसाध
नं उत ज्ञानमपि नाद्यः विद्यां चाविद्यां चेत्यादिसमुच्चयप्रतिपादकवाक्यविरोधात् न द्वितीयः कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादिविरोधादित्याशंक्य नेत्याह न चेति समुच्चय
पक्षमत्र पराकरोति न च वाच्यमित्यत्र हेतुमाह तद्धैतदिति तद्ब्रह्म एतत् अहमिति पश्यन् साक्षात्कुर्वन् एतस्मादेव दर्शनादृषिर्नामतो वामदेवः प्रतिपेदे ह किल ज्ञानफलं सर्वभावापत्ति
प्रतिपादकान्मंत्रानुददर्शेत्यर्थः यथा भुंजन् तृप्यतीत्युक्ते भुक्तितृप्त्योर्मध्ये कार्यांतरं न प्रतीयते तथात्र पश्यन्नेव प्रपेदे इत्यत्रापि दर्शनसर्वभावापत्त्योर्मध्ये कार्यांतरप्रतीतिर्वर्त्तमा
नार्थशतृप्रत्ययनिर्देशेन नास्तीत्यर्थः यदा ब्रह्मवेद तदैव ब्रह्म भवतीति ब्रह्मभवनवेदनयोरेककालत्वप्रतीतेः कालविलंबोपि नास्तीत्यर्थः कर्मैव मुक्तिसाधनमिति पराचष्टे तमेवेति न
च स्मृतिविरोधः संसिद्धिशब्देन तत्त्वज्ञानस्यैवोक्तत्वात् कषायैः कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तत इत्याद्यागमात् कर्मणां तत्त्वज्ञानसाधनीभूतांतःकरणशुद्धिहेतुत्वप्रतीतेः एतेन समुच्चयप्र

न च जातमपि ज्ञानं साधनांतरापेक्षया फलदाने विलंबत इति वाच्यं तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे ब्रह्म वेद ब्रह्मैव भवति तरति शोकमात्मविदित्यादिश्रुतिभ्य आत्मज्ञान
तत्फलयोः समानकालनिर्देशात् मध्ये साधनांतरकालविलंबयोरभावप्रतिपत्तेः तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेत्यादिसाधनांतरप्रतिषेधश्रवणाच्च तस्मात्स
संन्यासात्मज्ञानमेवामृतत्वसाधनं यत्नतः संपादनीयं तदभावे यतो महती विनष्टिः श्रूयते इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीर्महती विनष्टिरित्यत्र उत्पन्ने च ब्रह्मात्मज्ञाने विदु
षः फलेन सह विद्योद्गारः स्मर्यते॥ विद्याविग्रहमग्रहेण पिहितप्रत्यंचमुच्चैस्तरामुत्कृष्योत्तमपूरुषं सुनिधिया मुंजादिषीकामिव कोशात्कारणकार्यरूपविहृतात्पश्यामि निःसंशयं नासी
द्दस्ति भविष्यति क्वनु गतः संसारदुःखोदधिः पश्यामि चित्रमिव सर्वमिदं द्वितीयं तिष्ठामि निष्कलचिदेकवपुष्यनंते आत्मानमद्वयमचिंत्यसुखैकरूपं पश्यामि दग्धरशनामिव च प्रपंचं॥

तिपादकवाक्यविरोधोपि परास्तः तत्रैव वाक्यशेषेण व्याख्यामृत्युनिवर्त्तकत्वमेवाविद्याशब्दवाच्यानां कर्मणां प्रतीयत इति ज्ञानमेव मुक्तिफलमिति स्थितं यदा चैवं तदावश्यं संसा
रभीरुणा तन्निवृत्तिसाधनं ज्ञानं श्रवणादिसाधनैः संपादनीयमित्युपसंहारव्याजेनाह तस्मादिति तस्मात्त्याग एव हि सर्वेषां मुक्तिसाधनमुत्तममिति शास्त्रमाश्रित्याह स संन्यासे
ति यत्नतः संपाद्यत्वे हेतुमाह तदभाव इति इह इति पदं पूर्वार्द्धस्थितमत्रापि योजयित्वा श्रुतिं पठति इह हि इह संसारमंडले ब्रह्मात्मत्वेन न चेद्विदितवांस्तो वयं ततो हमवेदिः स्यां ब्रह्मा
त्मसाक्षात्काररहितः स्यां अस्तु तर्हि ततः को दोष इति तत्राह महतीति विनष्टिरिति जन्ममरणादिलक्षणानंतपरिमाणा विनष्टिः स्यात्तस्मादवश्यमात्मसाक्षात्कारः संपादनीय एवेत्यर्थः
तत्त्वज्ञाने सति संसारो निवर्त्तत एवेत्यत्र विद्वदनुभवमपि प्रमाणयति उत्पन्ने चेति कारणादिकोशादनात्मराशेर्विविच्य केवलब्रह्मात्मानुभवो मम संवृत्तः संसारश्चासन्निवृत्त इत्य
र्थः तथापि जीवनाभासोप्यनुवर्त्तत इत्याह पश्यामीति न चैतावता मुक्तेः किंचिद्वैकल्यमित्याह तिष्ठामीति ननु संसारदर्शनब्रह्मदर्शनयोर्विरुद्धत्वात्कथमेककालावस्थानमिति त

अद्वैतदर्शनेनद्वैतप्रपंचोबाध्यतएवेत्यर्थः विरोधशंकांप्रत्याह अद्वैतमपीति अद्वैतानुभवस्यनकदाचिदपिपारोक्ष्यंयथापरित्यक्ताहिनिर्मोकोहिर्भासते एवंसंसारबाध्यमपिसत्प्रतिभा
सतइत्यर्थः स्वभावपरित्यागापत्तेर्नविपरीतताशंकेतिभावः एवंचजीवन्मुक्तिरपिममप्रसिद्धाइत्याह एवंचेति तत्त्वज्ञानावस्थायांशरीरंबाध्यमितिकिंवक्तव्यंतत्त्वज्ञानात्प्राक्अ
पिद्वैतप्रपंचप्रतिभासोयोममनाभूत्तत्राप्याश्चर्यमेवेदानींममवर्ततइत्याह आश्चर्यमिति ननुकिमत्राश्चर्यंश्रौतबोधःपूर्वंबाधकोनाभूत्इदानींचतेनबाधितइतितत्राह किमिमा

अद्वैतमप्यनुभवामिकरस्थविल्वतुल्यंशरीरमहिनिर्ल्वयनीववीक्ष्ये एवंचजीवनमिवप्रतिभासनंचनिःश्रेयसाधिगमनंचममप्रसिद्धं आश्चर्यमद्यममभाति
कथंद्वितीयंनिखेनिरस्तनिखिलेशिवचित्प्रकाशेआसीत्पुरेति किमिमाःश्रुतयोनपूर्वंयेनद्वितीयमभवत्तिमिरप्रसूतं एवंशास्त्राचार्यप्रसादापरोक्षीकृत
तीव्रब्रह्मात्मतत्त्वस्यगुरुभक्त्यभिनयोपिस्मर्यते अतोपीयंविद्याजायतएवतथाहि॥त्वत्पादपंकज समाश्रयणंविनामेसन्नप्यसन्निवपरःपुरुषःपुरासीत्
त्वत्पादपद्मयुगलाश्रयणादिदानींनासीन्नचास्तिनभविष्यतिभेदबुद्धिः यस्मात्त्वमपापरवशोममदुश्चिकित्स्यंसंसाररोगमपनेतुमसिप्रवृत्तः त्वत्पादपंक
जरजःशिरसादधानस्त्वामाशरीरपतनादहमप्युपासे ननुविद्ययाः विद्योपमर्दैपिकथंसंसारस्येहलोकपरलोकसंचारलक्षणस्यनानाविधयोनिप्राप्तिप
रिहाराभ्यामनेकविधदुःखसंकुलस्यनिवृत्तिःस्यात्तद्धेतोःकामकर्मादेस्तदवस्थत्वात् नचाविद्यानिवृत्त्यातदुपादेयस्यापिसर्वस्यनिवृत्तिरावश्यकी
तिवाच्यंवैशेषिकाणामुपादाने पिक्षणंकार्यावस्थानवदनिवृत्तिशंकायादुरपन्हवत्वात् नचक्षणांतरेनंक्ष्यत्येवेतिनदोषः तत्क्षणवदुत्तरक्षणेप्यनुपप
त्त्यभावस्यानुमातुमशक्यत्वात् तस्मादज्ञानेनिवृत्तेपिसंसारोननिवर्त्तिष्यते प्रमाणाभावादितिव्यर्थःप्रयासःमैवंकर्ममूलमनर्थानां तत्त्वज्ञानेनबाध्य
तेक्षीयंतेचास्यकर्माणितथाचश्रुतिशासनंज्ञानेजातेपिकर्ममूलकःसंसारोनुवर्त्तिष्यतइतियदुक्तंतन्न अविद्यावत्कर्मणोपिज्ञानेनबाधितत्वात् अविद्यावत्तत्कार्ये
णापिविद्यायाविरोधित्वाविशेषात् नहिसंभवतिरज्जुसाक्षात्कारेतदविद्यानिवृत्तौतत्कार्यसर्पाद्यनुवर्त्ततइति नचयतोज्ञानमज्ञानस्यैवनिवर्त्तकमित्यवधारणंशास्त्र
कारणामेवंसत्यसमंजसमितिवाच्यंअज्ञानकार्यस्या

इतिएवमित्याद्युपासेइत्यंतोग्रंथःस्पष्टार्थः ननुज्ञानादज्ञाननिवृत्तावपिसंसारःकथंनिवर्त्ततेतस्यकर्मजन्यत्वात्तस्य
चविद्यमानत्वात्इतिशंकतेनन्वितिननुकर्मनोपादानंप्रपंचस्यकिंत्वविद्यासाचज्ञानान्निवृत्तातन्मूलःसंसारोनिवर्त्तिष्यतइत्याशंक्यप्रसिद्धदृष्टांतेनपरिहरतिनचेत्यादिनापूर्वप
समुपसंहरतितस्मादितितत्त्वज्ञानस्याज्ञानवत्कर्मभिरपिविरोधस्याविशेषात्धर्माधर्मरूपंकर्मापितेननिवर्त्ततइतिश्रुतिस्मृतियुक्तिसिद्धत्वादितिपरिहरति मैवमित्यादिनास्पष्टार्थोग्रंथः

1443

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

उक्तयुक्त्यात्मज्ञानात्कृतकृत्यतासंपन्नेति ग्रंथमुपसंहरति तस्मादिति इतिशब्दो ग्रंथसमाप्तौ एवं ग्रंथस्यावांतरप्रयोजनमाह श्रृणुप्रकाशेति तादृक्सिंहदंष्ट्रा अधरीकृता य
येत्यर्थः एतेन वादिविजयार्थिभिरपीयमभ्यसनीयेति भावः शेषमतिरोहितार्थं नानादीक्षितसंज्ञेन विदुषेयं विनिर्मिता सिद्धांतमौक्तिकश्रेणी दीपिकास्मप्रकाशिका ॥१॥ वि
दितसकलवेद्यैर्नप्रशंसंति लोके ग्रथितमपि महद्भिः किंपुनर्मादृशेन इति विफलसमेस्मिन् वाङ्मये हं प्रवृत्तः स्वमतिविमलतायै स्तुमर्हंति संतः ॥२॥ यदज्ञानादिदं भाति यज्ज्ञा

तदभावे तत्सत्त्वानुपलंभात् न चात्र प्रमाणाभावः भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति श्रुतेः न चैतद्ब्रह्मात्त्वं शुभकर्मनि
वृत्तिपरमेवेति वाच्यं कर्मशब्दस्य शुभाशुभसाधारणत्वात् विद्यासामर्थ्यस्य चोभयत्र तुल्यत्वात् ब्रह्मात्मैकत्वविज्ञानं शाब्दं देशिकपूर्वकं बुद्धिपूर्वकृतं पापं कृत्स्नं
दहति वह्निवदित्यत्र बुद्धिपूर्वकृतपापस्यापि ब्रह्मज्ञानेन दाहस्मरणात् यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा इत्य
त्र सर्वशब्देनाशेषपुण्यपापग्रहीतत्वात् तस्य सर्वस्यैव ज्ञानाग्निना दाहस्य भगवताप्युक्तत्वाच्च किंच यस्य दर्शनमात्रादन्येषामपि पापक्षयो जायते का कथा तस्य ब्रह्मीभू
तस्य पापक्षये तदाह भगवान् वशिष्ठः यस्यानुभवपर्यंतं तत्त्वे बुद्धिः प्रवर्तते तद्दृष्टिगोचराः सर्वे मुच्यंते सर्वपातकैः तथा कुलपावित्र्यहेतुत्वमपि ब्रह्मविदः स्मर्यते कुलं प
वित्रं जननी कृतार्था विश्वंभरा पुण्यवती च तेन अपारसंवित्सुखसागरेस्मिन् लीनं परे ब्रह्मणि यस्य चेतः तस्माद्यथोक्तब्रह्मात्मैकत्वविज्ञानेन कृतकृत्यो भवतीति नात्र
विवदितव्यमिति प्रकाशानंदयतिना कृतिना स्वात्मविशुद्ध्यै सिद्धांतमुक्तावल्येषा रचिता रंध्रवर्जिता अद्वैतानंदसंदोहसत्यज्ञानादिलक्षणानारायणसमासक्ता श्रियासा
पत्न्यदूषिता श्रृणु प्रकाश रचितां सद्वैततिमिरापहां वादीभकुंभनिर्भेदसिंहदंष्ट्राधरीकृतां वेदांतसारसर्वस्वमज्ञेयमधुनातनैः अशेषेण मयोक्तं तत्पुरुषोत्तमयत्नतः
स्नातं तेन समस्ततीर्थसलिले सर्वापि दत्तावनिर्यज्ञानां च कृतं सहस्रमखिला देवाश्च संपूजिताः संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योप्यसौ यस्य ब्रह्मवि
चारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥ ॥इति श्रीपरमहंसपरिव्राजकाचार्यश्रीज्ञानानंदपूज्यपादशिष्यश्रीप्रकाशानंदविरचिता सिद्धांतमुक्तावली समाप्ता ॥ ॥

नात्र प्रलीयते ब्रह्मस्यां तदहं नित्यं नित्यसंवित्सुखाद्वयं ॥३॥ अधिकाश्युपविष्टेशमियं सिद्धांतदीपिका निर्मिता राजतां शश्वत्सदानंदप्रदायिनी ॥ ॥इति श्रीमत्परमहंसपरि
व्राजकाचार्यश्रीप्रकाशानंदपूज्यपादशिष्यश्रीनानादीक्षितविरचिता वेदांतसिद्धांतमुक्तावलीटीका सिद्धांतदीपिका समाप्ता ॥ मिति आश्विन शुक्ल १ प्रतिपदा संवत् १९२९ शुभम् ॥

1444

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1445

वे॰ मु॰ ८० एवकारो भिन्नक्रमस्तुच्छत्वपदेन संबध्यते तेन श्रौतं तुच्छत्वमेव विवर्त्तादिवादस्य युक्त्यादिमूलत्वात् इपि विवर्त्ताद्यधिकारिभेदेन न विरुध्यत इत्यर्थः उक्तमर्थं दृढं संमत्या स्पष्ट टी॰
यति तदुक्तमिति वास्तवी परिणामरूपा तस्या वेदांतवादस्य प्रथमसोपानत्वात् एवं प्रपंचस्य तुच्छत्वे श्रुतिमुपपाद्य स्मृतिमपि तत्र संवादयति वशिष्ठोपीति अत्रासत्वमित्युप
जीव्यते यस्माद्वैतं तद्दर्शनं च तुच्छत्वादसत्तस्मादात्मनोऽदृष्टद्वयत्वमुपपन्नतरमित्युपसंहरति तस्मादिति द्वैतस्य विवर्त्तत्वेप्युपपन्नमिदानीं प्रपंचस्य तुच्छत्वउपपन्नतरमित्यर्थः
अदृष्टद्वयमेवात्मतत्वमित्यत्र श्रुतिं प्रमाणयति तथा चेति श्रुतिरात्मनो द्वैतदर्शनशून्यत्वमेवाहेत्यन्वयः निरोधः प्रलयः वैदिककर्मानुष्ठाता साधकः निःकलं निरवयवं निर्विक
ल्पकं विशेषानात्मकं अंजनमविद्यादि तच्छब्दलक्ष्यं ब्रह्माहमिति साक्षात्कृत्य ब्राह्मणः स्वयं ध्रुवमविचालि कूटस्थात्मको भवति अनंत अंतो नाशस्तद्रहितं हेतुवर्जितं स्वयम
तदुक्तं गौडैः तुच्छानिर्वचनी या च वास्तवी चेत्यसौ त्रिधा ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः वशिष्ठोपीममर्थमाश्चर्यवदाह अहो नु चित्रं यत्सत्यं ब्रह्म तत्
द्विस्मृतं नृणां यदसत्यमविद्याख्यं तत्पुरः परिवल्गति तथा अहो नु चित्रं पद्मोत्थैर्बद्धास्तंतुभिरद्रयः अविद्यमानाया विद्यातया विश्वं खिलीकृतं तस्माद्वैततद्दर्शनयोः
स्तुच्छत्वात् स्वतःसिद्धशुद्धबुद्धमुक्तपरिपूर्णानंदात्मनोऽदृष्टद्वयत्वमुपपन्नतरं तथा च श्रुतिः न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता
तदेव निःकलं ब्रह्म निर्विकल्पं निरंजनं तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवं निर्विकल्पमनंतं च हेतुदृष्टांतवर्जितं अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुधः इत्येवमा
दिका आत्मनो द्वैतदर्शनशून्यत्वमाह तस्मात्सत्यं ज्ञानमनंतं च पूर्णमानंदविग्रहं मंत्रवर्णक्रमात्मानं विनिश्चित्य विमुच्यते न चैतादृशमात्मज्ञानं न जायत इति सांप्रतं
श्रि साधनचतुष्टयसंपन्नस्य विविदिषोर्मनननिदिध्यासनाभ्यासपुरस्कृतश्रवणानुष्ठानसमनंतरमेव तदुत्पत्तिदर्शनात् अन्यथा तादृशात्मप्रतिपादकागमाप्रामाण्यप्रसंगः॥
कार्यदृष्टांतवर्जितं अनुपमं स्वतुल्यरहितं एतेन सजातीयभेदः परास्तः कारणत्वं प्रतिषेधति अनादिमिति इति स्वरूपमात्मत्वेन साक्षात्कृत्य मुच्यते अविद्यातत्कार्यरहितो भवतीत्यर्थः
भवत्वेवमात्मतत्वं किं ततस्तत्राह तस्मादिति यस्मादिदं वास्तवं वृत्तं तस्मात्सत्यं ज्ञानमनंतं ब्रह्मेति मंत्रवर्णसिद्धं सत्यादिस्वरूपमात्मानं स्वमभिन्नं विनिश्चित्य साक्षात्कृत्य विमुच्यत
इति तज्ज्ञानफलं स्वस्वरूपप्राप्तिरित्यर्थः नन्वेतादृशात्मज्ञानं यदि भवेत्तदा घटादिज्ञानवदुपलभ्येत साधनाभावान्न ज्ञायत इति चेन्न तत्साधनस्य प्रमाणस्य श्रुतेः सत्वात्ततो न जा
यत एवैतादृशं ज्ञानमिति नेत्याह न चेति न च सांप्रतमिति प्रतिज्ञायां हेतुं वदन्ननुपलंभविरोधं प्रत्याह तदुत्पत्तीति तस्योत्पद्यमानस्य ज्ञानस्योपश्यन् प्रतिपेदे यो यो देवानां प्रत्यबुध्य
त इत्यादिश्रुतिभ्यो दर्शनात् नानुपलंभविरोध इत्यर्थः यत्तु सत्यपि साधने ज्ञानं न जायत इति तदप्ययुक्तमित्याह साधनेति वेदानुवचनादिनोत्पन्नविविदिषोर्नित्यानित्यवस्तुविवेका राम
दिसाधनचतुष्टयेनाथशब्दसूचितेन संपन्नस्याधिकारिणो गुरूपदिष्टमहावाक्यविचारानंतरं ज्ञानोत्पत्तिदर्शनात् कथं तर्हि संसारानुवृत्तिः श्रुतवेदांतानामिति तत्राह मननेति॥ ८०

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1446

स्थूलमस्तीत्यंतः स्पष्टार्थः ग्रंथः ननु जगतोत्यंतासत्त्वं तन्निवर्तकं च शास्त्रं दृश्येतत्तर्कितं ननु प्रमितमिति चोद्यं पराकुर्वन् शास्त्रस्य सार्थकत्वेन प्रामाण्यमुपसंहरति तस्मादि
ति श्रुतेरर्थांतरशंकानिवर्तकं संक्षेपशारीरकवाक्यमुदाहरति नित्यबोधेति बोधपीडितं बोधमहिम्ना तत्रासदित्यर्थः इममेवार्थं स्पष्टयति जगदात्मकस्येति किंच शास्त्रस्यान
र्थक्येनाप्रामाण्यापादनं द्वैतवादिनं प्रति वा अद्वैतवादिनं प्रति वा आद्ये तेषामुपालंभेपि ब्रह्मात्मैक्यवादिनं प्रति तदापादनस्यायोगात् द्वितीये ब्रह्मातिरिक्तं न किंचनापि सदि
ति कुत्राप्रामाण्यमापाद्यं तद्दूष्याह किंचेत्यादिना अनभ्युपगमादित्यंतेन वेदप्रामाण्यानंगीकारे पाखंडत्वापत्तिमुद्धरति नचेति वस्तुतस्तु पाखंडत्वमात्मातिरिक्तमत्यंतास
द्वेतितदापादनमेवाद्वैतवादिनं प्रति न युज्यत इति ननु वेदस्याप्रामाण्यानंगीकारेपि तत्प्रामाण्यमंगीक्रियते नवा आद्ये द्वैतापत्तिः द्वितीये ब्रह्मात्मैक्यासिद्धिः प्रमाणाभावादि

नित्यबोधपरिपीडितं जगद्विभ्रमं नुदति वाक्यजामतिः वासुदेवनिहतं धनंजयो हंति कैरवकुलं यथा पुनरिति स्मृतिरपि जगदात्मकस्य विभ्रमस्य नि
त्यबोधस्वभावस्यात्मनः स्वरूपं पर्यालोच्यात्यंतासत्त्वमेवाह किंच ब्रह्मातिरिक्तं शास्त्रसत्त्वमस्तीति ये मन्यंते तान्प्रति भवतु शास्त्राप्रामाण्यप्रसंगो दोषः
तस्य प्रमाणैकस्वभावत्वात् ये तु मन्यंते सदा द्वैतमेवास्ति द्वैतवार्तानभिज्ञास्तान्प्रति कथमयं दोषः स्यात्तैः शास्त्रस्य वा तत्प्रामाण्यस्य वा ब्रह्मातिरिक्तस्या
नभ्युपगमात् अन्यथा ताभ्यामेवाद्वैतक्षतिः स्यात् न च वेदप्रामाण्यानभ्युपगमे पाखंडत्वप्रसंगः तदप्रामाण्यस्याप्यनभ्युपगमात् न च वेदप्रामाण्यान
भ्युपगमे द्वैतस्याप्रामाणिकत्वप्रसंगो दोषः द्वैतदर्शिनं प्रति प्रमाणाधीनसिद्धिके च तस्य दोषत्वात् ननु द्वैतदर्शित्वं किमात्मनो धर्मः स्वभावो वा नाद्यः द्वै
तापत्तेः ॥१

तिनेत्याह नचेति किमेनच्चोद्यं द्वैतदर्शिनं प्रत्युत द्वैतदर्शिनं प्रति आद्ये किं न श्छिन्नं द्वितीये प्रमाणप्रमेयभावस्यैवासिद्धिः यत्र त्वस्य सर्वमात्मैवाभूदिति
श्रुतेः किंच प्रमाणं किमर्थं मृग्यते प्रतीतये चेत्तन्न स्वप्रकाशत्वेनापि तत्सिद्धेः अज्ञाननिवृत्तये चेत् तथाप्यद्वैतस्य सिद्धत्वेन तत्रानपेक्षणात् न तस्याप्रामाणिकत्वप्रसंग
इत्यर्थः द्वैतदर्शिनं प्रति तस्य दोषत्वादित्युक्तं तदादाय शंकते ननु द्वैतदर्शित्वमिति धर्मपक्षं दूषयति नाद्य इति धर्मः सन्न सन्वा नांत्यः असतो वंध्यापुत्रस्य धर्मत्वादर्शनात्
संश्चेद्द्वैतापत्तिरित्याह द्वैतापत्तेरिति द्वितीये दर्शने द्वैतं विशेषणमेव वाच्यं उपलक्षणत्वे दर्शित्वमेवात्मस्वभावः स्यात्तच्च स्वदर्शित्वेनाप्युपपन्ने द्वैतपदं व्यर्थं स्यात्तथा च द्वैतवि
शिष्टदर्शित्वस्य स्वभावत्वे स्वप्रकाशत्वं द्वैतस्यापि स्यादिति दूषयति ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1447

वं·सु· नेतरद्इत्यादिना द्वैतस्यात्मस्वभावत्वे स्वतःसिद्धिःस्यादित्युक्तं तदनुपपन्नं किमात्मस्वरूपमिति कृत्वा स्वप्रकाशत्वमापाद्यते किं वा स्वातंत्र्येण आद्ये द्रष्टापत्तिरात्मनः स्वप्रका टी॰

७९ शत्वस्य सिद्धत्वात् द्वितीये निरर्त्तं च निवर्त्तते इति श्रुत्यात्मभिन्नस्य तुच्छत्वबोधनात् पूर्णप्रतिपादकवाक्यसिद्धपूर्णात्मस्वरूपानुपपत्त्या च द्वैतस्य तुच्छत्वात् स्वतो वा परतो

वा सिद्ध्यनर्हत्वादिति नेति प्रतिज्ञायां हेतुमाह श्रुतीत्यादिना श्रुतिसिद्धात्मस्वरूपानुरोधेन द्वैतस्य तुच्छत्वमुक्तं तदुपपादयितुं शंकते नन्विति लौकिकाः शास्त्रासंस्कृत

मतयः शास्त्रसंस्कृतमतयः परीक्षकाः एकमत्याभावमुपपादयति सर्वशून्यवादिनेत्यादिना तद्विरुद्धस्य शून्यत्वविरुद्धत्वस्य नित्ये सार्वदिकं सत्त्वमनित्ये कादाचित्कं मि

नेतरः द्वैतजातस्य सर्वस्य स्वतःसिद्धिप्रसंगादिति चेत् न श्रुतिदृष्टात्मस्वरूपानुरोधेन द्वैतजातस्य सर्वस्य तुच्छत्वात् नहि तुच्छस्य स्वतःसिद्धिः संभवति तस्य

निरस्तसमस्तसामर्थ्यस्य स्वतः परतो वा सेद्धुमशक्यत्वात् नन्वात्मभिन्नस्य जगतस्तद्दर्शनस्य च तुच्छत्वं लौकिकानामभिमतं परीक्षकाणां वा नाद्यः

तेषामबाधितत्वबुद्धेस्तत्राव्याहतत्वात् तुच्छत्वस्य दूरनिरस्तत्वात् नेतरः परीक्षकाणां सर्वेषामेकमत्याभावात् सर्वशून्यवादिना निःशेषप्रमाणप्रमे

यापलापिनाः प्रामाणिकेनाशेषस्य तुच्छत्वस्वीकारात् तद्विरुद्धस्य नित्यानित्यविभागेन सार्वदिककादाचित्कत्वस्याक्षचरणकणभुगादिभिः स्वीकारात् त

द्विरुद्धस्य च सर्वदा सर्वसत्त्वस्य सांख्यादिभिरभ्युपगमात् तस्मात् परीक्षकाणां सर्वेषां परस्परविप्रतिपत्तेरात्मातिरिक्तस्य तुच्छत्वमसंप्रतिपन्नमेव

तथा च लौकिकपरीक्षकविरुद्धं जगतस्तुच्छत्वं कथमंगीकारपथमारोहति न च परीक्षकाणां मतमपि प्रत्येकं परस्परविरुद्धतया हेयमेवेति वाच्यं ता

वताप्येकैकांगीकारस्य तत्र तत्राव्याहतत्वात् तुच्छत्वे तदभावात् न चात्रापि ममांगीकारोऽस्त्येवेति वाच्यं तवाप्रामाणिकत्वात् तुच्छत्वग्राहकप्रमाणा

तिविभाग इत्यर्थः द्वैविध्यसत्त्वविरुद्धं सांख्यादिमतमित्याह तद्विरुद्धेति विरुद्धत्वमेवाह सर्वदा सर्वसत्त्वस्येति सत्कार्यवादस्वीकारान्न तावत्प्रागसत्त्वं वर्त्तमानकाले स

त्त्वादेव नासत्त्वं ध्वंसस्य च तिरोधानमात्ररूपत्वात्तस्यामप्यवस्थायां सत्त्वात् सर्वदा सत्त्वमिति सांख्यमतं तथा पातंजलादीनां संग्रहाय आदिपदं तुच्छत्वासंप्रतिपत्तेः फलमाह त राम

था चेति तत्र तत्रेति शून्ये तथा सर्वदासत्त्वकादाचित्कसत्त्वपक्षादौ तदभावादिति एकैकांगीकारस्याप्यभावादित्यर्थः तुच्छेऽपि परीक्षकांगीकाराभावोऽसिद्धः मम परीक्षक ७९

स्य तत्रांगीकारसत्त्वादिति नेत्याह न चात्रापीति परिक्षकत्वासंमत्यापरिहारे हेतुमाह तवेति प्रमाणेन परीक्ष्य व्यवहर्त्ता परीक्षकः न च तुच्छे प्रमाणमस्ति तत्त्वे तु तुच्छत्वक्षतेरिति

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1448

ननुवस्तुनोद्वैरूप्यासंभवात् नसर्वेपक्षाः प्रामाणिकाएवतथासतिपरस्परविगानात्कोवापरीक्षकः किंमतंचोपादेयंकिंवाहेयमितिनियामकाभावादेकस्याप्यनुपादानमि
तिनेत्याह नचेति परीक्षकत्वेपक्षस्यचोपादेयत्वेविनिगमकंशंकते निस्येतिस्ववाक्यंविवृणोति यस्यहीतित्याज्यत्वेसिद्धेत्यभिमतत्वदृष्टांतमाहयथेतितुच्छत्ववादाहहेते
तर्हीति नन्वप्रामाणिकत्वमसिद्धं प्रत्यक्षादिप्रमाणमूलत्वादितरपक्षस्येत्याशंक्यहेत्वंतरमाह श्रुतिविरुद्धत्वादिति तथाचप्रत्यक्षादिश्रुतिविरोधेआभासीभवतीत्य
र्थः ननुनश्रुतिःप्रपंचस्यसाक्षात्तुच्छत्वपरास्तिसमन्वयाधिकरणविरोधात्तत्राह श्रुतिस्त्विति श्रुतिरात्मातिरिक्तस्यसर्वस्यतुच्छत्वमभिमन्यतइत्यतइत्यन्वयः श्रुती
रुदाहरति सदेवेत्यादिना मीयंतइतिमात्राः मात्राभ्योन्योमात्रः अप्रमेयइतियावत् अथवामात्राएकदेशोवयवास्तद्रहितः तेनस्वगतभेदनिषेधसिद्धिः तुर्यएवचतु

नचपरीक्षकाणामपिपरस्परविरुद्धानांमध्येकस्यमतंसमीचीनंकस्यासमीचीनमितिविनिगमकाभावात् एकमपिनग्राह्यमितिवाच्यंनित्यनिर्दुष्ट
वेदमूलकत्वभावाभावाभ्यांविशेषात् यस्यहिमतंवेदमूलंतद्ग्राह्यं यस्यतुतन्नास्तितस्याज्यंयथापाखंडानांमतं इतत्तद्वैततोपिगत्वाश्रुत्यैवविश्वा
सश्चेत् श्रुतिसिद्धमेवमतमदुष्टंग्राह्यमितितदितरद्याह्यमेवाप्रामाणिकत्वात् श्रुतिविरुद्धत्वाच्च श्रुतिस्तुसदेवसोम्येदमग्रआसीत् एकमेवाद्विती
यंसएषनेतिनेत्तीति अथतस्यायमादेशः अमात्रश्चतुर्थोव्यवहार्यः प्रपंचोपशमः शिवोद्वैतइत्येवंप्रकारिकासजातीयविजातीयस्वगतभेदशून्यमा
त्मानंबोधयंतीआत्मातिरिक्तस्यसर्वस्यतुच्छत्वमभिमन्यते तदतिरिक्तस्यकथंचिदपिसत्वेद्वैतव्याघातप्रसंगात् तस्माज्जगतस्तुच्छत्वंश्रुत्यनुमतंमेव

र्थशब्दार्थः अव्यवहार्यः अभिवदनादिव्यापाराविषयइत्यर्थः तस्यपुरुषार्थत्वमाह प्रपंचेति प्रपंचाभावरूपत्वंतदोपपद्यते यदिप्रपंचोसद्रूपोभवेत् असद्भावस्यभावरूप
त्वात् तेनविजातीयभेदनिराकृतिः तस्यसुखरूपतामाह शिवइति सजातीयभेदंनिषेधति अद्वैतइति तेनश्रुतार्थापत्तिः प्रपंचस्यत्रैकालिकाभावंबोधयतीत्यर्थः नचैवं
प्रपंचस्यप्रामाणिकत्वंआभासोपस्थितस्याप्यभावप्रतियोगित्वोपपत्तेः अन्यथानसुरांपिबेदित्यादौसुरापानस्याप्रामाणित्वंकिंनस्यात् अभिमन्यतइतिवदतासमन्वय
विरोधोपिनिरस्तः अन्यथाविवक्षितात्मसिद्धिरेवनस्यादित्यात्मसिद्ध्यर्थमेवप्रपंचतुच्छत्वानुमानमितिनकोपिविरोधगंधइति ननुकिमितितुच्छत्वमेवावेदयतिउक्तात्मस्व
रूपस्यप्रपंचमिथ्यात्वेनापिसिद्ध्युपपत्तेरितिनेत्याह तदतिरिक्तस्येति कथंचिदपिमिथ्यात्वेनवास्तवत्वेनवेत्यर्थः कथंतर्हिविवर्तवादादिस्वीकारइत्याशंकांपरिहरन्नुप

संक्षेपशा॰ टीका ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

पिनारंभइवानस्थिरे २९ श्रीकृष्णगोविंदहरेमुरारेकृष्णहृदंत्यबरादेतिविह्वलाः विसृज्यकर्माणिगृहस्यसर्वंतोयोगीवचानंदग
तानपेक्षर ३० काश्चित्तमर्थोस्तपरस्परंवचः समेत्यराजन्सुगतपन्तस्वीजने ऊचुःस्वलन्नद्दकंठवाचः स्वतः श्रवद्बाष्पकलाव
हृद्दशः ३१ गोप्यऊचुः खहोतिनिर्मोहिजनस्यचित्तंपरंचरित्रंगदितंनयोग्यं श्रुवैनवान्यंहृदिभाव्यमन्यद्देवोनजानातिकुतोम।
तुष्यः ३२ गतेपियद्यत्रहितेननतनहिहायगंतुंसमवस्थितोयं गतेपुरींशाणपतावहोस्मिकिंकिंनकष्टंचततोभविष्यत् ३३
३ इतिश्रीमद्गर्गसंहितायांमथुराखंडेअक्रूरगमनेनामतृतीयोध्यायः २ ॐ श्रीनारदउवाच एवंगदंतीनांराजन्गोपीनां
विरहंपरं विज्ञायभगवान्देवः प्रीतंतान्मांरहस्यन्ययौ १ यावंतीर्योषितोराजंस्तावद्रूपधरोहरिः स्वयंसंबोधयामासवाग्भिःस
र्वाःपृथक्पृथक् २ श्रीराधामंदिरंगत्वाराधायांचमूर्छितो वहिःस्थितासखीसंचेतनांदत्तरलीकले ३ कृत्वावंशीध्वनिंराधासह
सोत्थायचातुरा नेत्रेउन्मील्यददृशेश्रीगोविंदंसमागतं ४ पद्मिनीवगतानंदंपद्मिनीपद्मिनीपतिं वीक्ष्यस्वापागतायासेसाद म
वेणासमनेन्दत्तौ ५ अक्षपूर्णाश्रुवीदीनांराधांकमललोचनां प्रोवाचेनांभगवानाद्दमेघगंभीरयागिरा ६ श्रीभगवानुवाच विनासंबं
कथंभद्रेमाशोचंकुरुराधिके पृथ्वागंतुकामंमांकृत्वासिविरहातुरा ७ भुवोभारावतारायकंसादीनांवधायच ब्रह्मणाप्रा
र्थितःसाक्षाज्जातोहंदेवलयासह ८ मथुरांहिगमिष्यामिहरिष्यामिभुवोभरं शीघ्रमेष्यागमिष्यामिकरिष्यामिशुभंतव ९ नार
दउवाच इत्युक्त्वंतेजगदीश्वरंहरिंराधापतिंप्राहवियोगविह्वला दावाग्निनादावलतेवमूर्छिताप्रकंपरोमांचितभावसंहता १०
श्रीराधोवाच भुवोभारंहरत्वंमत्तेषुरीवजस्थितंपरमेशयथंश्रूणुस्वतः गतेत्वयिप्राणपतेनोचविश्रद्दंकदाचिद्देवनयास्याम्यहं ११
यदाथमेतंशपथंनमन्यसेद्वितीयवारंवदयामिवाकथं प्राणोदरंगंतुमतीवविह्वलाकर्पूरधूलेःकणवद्भविष्यति १२ श्रीभ
गवानुवाच वचनंवेस्वनिगमेहरीकर्तुंतसोस्म्यहं भक्तानांवचनंस्वप्रभुर्हरीकर्तुंनचक्षमः १३ श्रीदामशापात्स्वसान्हिलोकेक
लहान्मम शतवर्षंतेवियोगोभविष्यतिनसंशयः १४ माशोचंकुरुकल्याणिवरंमेस्मरराधिके मासंमासंवियोगंतेदर्शनंमेभ

स

गर्गे॰
म॰
३

विक्ष्यति १५ राधोवाच मासंप्रतिवियोगोमेद्यात्वंसुदर्शनंहरे वेत्रागमिष्यसितदासूनुरङ्गःखोत्संत्यजाम्यहं १६ लोकाभिरामज
नभूषणविश्वदीपक नर्दमोहनजगद्दुर्जनार्तिहारिन् आनंदकंदयदुनंदननंदसूनोप्रयागमेस्वशपथंकुरुमेपुरस्त्वं १७ श्री
भगवानुवाच रंभोरुमासंप्रतितेवियोगोवेत्रागमिष्येशपथंगवांमे निःसंशयंनिकपटंवचस्त्वमवेहिराधेकथितंमयासत् १८
योमित्रतांनिःकपटंकरोतिनिःकारणोधन्यतमःसएव विधायमैत्रींकपटंविदध्यात्नलेपटेहेतुपटेनरंधिक् १९ कर्मेन्द्रियाणी
न्द्रयथारसादीस्तथासकामाप्तनयःस्ववंयत् मनागृज्ञानंतिहिनैरपेक्ष्यंगूढंपरंनिर्गुणलक्षणंतत् २० जानंतिसंतःसमदर्शिनो
येदांतमहांतःकिलनैरपेक्षाः तेनैरपेक्ष्यंपरमंसुखंमेज्ञानेन्द्रियादीनियथारसादीन् २१ सर्वेहिभावेमनसःपरस्यरंनलेकृतो
भामिनिजायतेततः प्रेमैवकर्तव्यमतोमयिस्वतःप्रेम्णासमानंभुविनास्तिकिंचित् २२ यथाहिभांडीरवटेमनोरथोवभूवराधे
हितथाभविष्यति श्रद्धेतकंप्रेमचसद्भिराश्रितंतत्रापिसंतःकिलनिर्गुणंविदुः २३ येराधिकायांमयिकेशवेमयिभेदंनकुर्वंति
तिदुग्धशौक्ल्यवत् तएवमेब्रह्मपदंप्रयांतितदहैतुकंस्फूर्जितभक्तिलक्षणाः २४ येराधिकायांमयिकेशवेमयिपश्यंतिभेदंकु
धियोनराभुवि तेकालसूत्रेप्रपतंतिदुःखिताःरंभोरुयावत्किलचंद्रभास्करौ २५ नारदउवाच एवमाश्वास्यतांराधांसर्वगोपीगणांस्तथा
आययौनंदभवनेभगवान्नयकोविदः २६ अथसूर्योदयेजातेनंदाद्याःशोककातरैर्वलं नीत्वारथान्समारुह्यसर्वेप्यमथुरांययुः २७
आरुह्यरामकृष्णाभ्यांस्वरथंगांदिनीसुतः प्रयाणमकरोद्राजन्मथुरांदुःखतःस्वयं २८ कोटिशःकोटिशोगोप्योमार्गेमार्गेसमास्थिताः
पश्यंत्यस्तान्निर्गमनेक्रोधात्याग्याथमोहविह्वलाः २९ क्रूरक्रूरेतिचाक्रूरंवदंत्यःपरुषंवचः रुरुधुःसर्वतोयानंयथार्कंसरथंघनाः ३०
अक्रूरस्यरथंराजन्निजघ्नुर्यष्टिभिर्भृशं अश्वांस्तथासारथिंचभगवद्विरहातुराः ३१ अश्वास्तत्रसमुत्पेतुस्ताडितास्तरुणस्तनःगोपी॰
हस्तगलिचातेनसारथिःपतितोरथात् ३२ विहायलज्जांलोकस्यसमाकृष्यरथाद्बलात् केकणैस्तेउरक्रूरंपश्यतोःकृष्णरामयोः ३३
गोपीयूथबलेदृष्ट्वासबलोभगवान्हरिः गोपीसंबोधयामाससत्क्लिष्टांगांदिनीसुतः ३४ संध्यायामागमिष्यामिमाशोचंकुरुतांगनाः ३

CC0. Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

1451

पश्यन्नश्रूण्यमहाश्चर्यमाकृष्टस्तेन व्रजौकसः २५ इत्येवमुक्त्वा स्वरथं समागतोऽक्रूरेण कृष्णो बलदेवसंयुतः तं रामसैवं गमये मनोहृ
रैर्ययौ पुरीं यादववृंदमंडितां २६ यावद्रथं केतुकृताश्वरेणुगा लक्ष्येत तावद्व्रजजीवमोहात् स्थिता बभूवुर्व्यथिचित्रवत्ताः स्मता हरे।
र्वीक्ष्य सुतागताशाः २७ ॥ इति श्रीमद्गर्गसंहितायां मथुराखंडे मथुराप्रयाणं नाम चतुर्थोऽध्यायः ४ ॥ नारद उवाच हरिरक्रू
रो रामाभ्यां मथुरोपवनं गतः यमुनानिकटे स्थित्वा वारि पीत्वा रथं ययौ १ अक्रूरस्तावनुज्ञाप्य स्नातुं श्रीयमुनां गतः नित्यनैमित्ति
कं कर्तुं विवेश विमले जले २ जले वाऽगाधगंभीरे महावर्तसमाकुले ददर्श रामकृष्णौ तौ वंदनौ गांदिनीसुतः ३ विस्मितस्तौ रथे पश्य
न्नर्वारि स्थितौ नृप ददर्श तत्र सर्पेंद्रं कुंडलीभूतमास्थितं ४ तस्योत्संगे महालोकं गोलोकं लोकवंदितं गोवर्द्धनादियमुनावृंदा
रण्यं मनोहरं ५ सूर्यकोटिमार्तंडज्योतिषां मंडले प्रभुं परिपूर्णतमं साक्षात् श्रीकृष्णं पुरुषोत्तमं ६ कोटिमन्मथलावण्यं रास
मंडलमध्यगं राधया सहितं देवं तत्राक्रूरो ददर्श ह ७ ज्ञात्वा कृष्णं परं ब्रह्म नत्वा नत्वा पुनः पुनः कृतांजलिपुटोऽक्रूरस्तुतिं चक्रे ति
र्थवित्तः ८ अक्रूर उवाच नमः श्रीकृष्णचंद्राय परिपूर्णतमाय च असंख्यांडाधिपतये गोलोकपतये नमः ९ श्रीराधापतये तुभ्यं व
जाधीशाय ते नमः नमः श्रीनंदपुत्राय यशोदानंदनाय च १० देवकीसुत गोविंद वासुदेव जगत्पते यदूत्तम जगन्नाथ पाहि मां पु
रुषोत्तम ११ वाणी सदा ते गुणवर्णने स्यात् कर्णौ कथायां मम दोश्च कर्मणि मनः सदा त्वच्चरणारविंदयोर्दृशौ स्फुरद्धामविशेषद
र्शने १२ नारद उवाच एवं संस्तुवतस्तस्य पश्यतो विस्मितस्य च अत्रैवांतर्दधे कृष्णः सलोको भगवान्प्रभुः १३ नत्वा तं च ततोऽक्रूरः
कृत्वा नैमित्तिकीं विधिं ज्ञात्वा कृष्णं परं ब्रह्म विस्मितो रथमाययौ १४ दिनात्यये रामकृष्णावनयद्गांदिनीसुतः रथेन वायुवेगेन स्नि
ग्धगंभीरनादिना १५ पुरस्योपवने तत्र वीक्ष्य नंदं यदूत्तमः अक्रूरं प्राह प्रहसन् मेघगंभीरया गिरा १६ श्रीभगवानुवाच मथुरा
यां हि गंतव्यं भवता स्वरथेन वै गोपालैः सहितः पश्चादागमिष्यामि मानद १७ अक्रूर उवाच देवदेव जगन्नाथ गोविंद पुरुषोत्तम
सहाग्रजः सगोपालो गच्छ मे मंदिरं प्रभो १८ पादारविंदरजसा पवित्रीकुरु मद्गृहं त्वां विना न गमिष्यामि मंदिरं स्वं जगत्पते १९

CC0, Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

गर्गः
म॰
४

1452

श्रीभगवानुवाच गृहं त्वागमिष्यामि हत्वा वै यादवाहितं सबलो बांधवैः सार्द्धं करिष्यामि प्रियं तव २० नारद उवाच अथ तत्र
स्थिते कृष्णे सोक्रूरो मथुरां गतः निवेद्य वृत्तं कंसाय ततः स्वभवनं ययौ २१ अथापराह्णे सबलं गोविंदं बालकैः पुरीं द्रष्टुमभ्युदितं
वीक्ष्य नंदो वाक्यमथाब्रवीत् २२ आर्जवे न पुरी वीक्ष्या गंतव्यं भवता किल न गोकुले विहितैर्नो कंसराज्ये महाभये २३ तथास्त्वि
त्युक्त्वा भगवान्हृष्टो नंदप्रणोदितैः गोपालैर्बालकैः सार्द्धं सबलो गतवान्पुरीं २४ प्रासादैर्गगनस्पर्शैर्हेमरत्नखचितैः शोभि
तां दुर्गसंयुक्तां देवधानीमिव स्थितां २५ कालिंदीरत्नसोपानैः स्फुरद्धर्म्यकृतद्धलैः अलकामिव शोभाढ्यां दिव्यनारीनरैर्युतां २६
प्रेक्षन्स मथुरां कृष्णः सौधायतनमंदिराणि च पश्यन् गोपालकैः सार्द्धं राजमार्गं विवेश ह २७ श्रुत्वागतं तं वसुदेवनंदनं व्रजस्थिता वै
मथुरापुरांगनाः त्यक्त्वाथ कर्माणि विसृज्य ताः शिशून् द्रष्टुं व्यधावन्नुदधिं यथापगाः २८ काश्चिद्धर्म्याणि किल जालदेशात्क
द्यात्काश्चित्प्रदीनो गवाक्षात् विनिर्गता द्वारकपाटदेशान्नद्धवराननं ददृशुः पुरंध्र्यः २९ एकं दलत्कुंतलमानने स्वे किमप्यगा
नीतमनांसि हर्तुं पश्चात्कृते मौलितले दधानं किंचिद्गतानां हरणाद्द्वितीयं ३० पीतांबरार्द्धं वलितं स्फुरत्कटावद्धं तदंसे जलदे य
था तडित् पर्यंकरेखां हृदि वैजयंतीं स्रजं दधानं वसुदेवनंदनम् ३१ विलोक्य सर्वाः स्मुमुहुः पुरस्त्रियो विलोलपादीनन नवीनकुं
डले बालार्कहेमांगदबाहुमंडले राजन्नृसंख्यांडपतिं परात्परं ३२ पुरंध्र्युवाच अहो वृंदावनं रम्यं यत्र संनिहितो ह्ययं धन्या गोप
राणाः सर्वे पश्यंत्येनं मनोहरं ३३ धन्या गोपरमण्यस्ता याभिः किं सुमहत्कृतं पिबंति या रसं गोपकृष्णस्याधरामृतं ३४ नारद
उवाच राजमार्गे रंगकारं रजकं यांतमुन्मदं गोपालान् सुमतेनैव याचतं मधुसूदनः ३५ देहि नो मित्र वासांसि रुचिराणि महामते दा
तुस्ते हि परं श्रेयो भविष्यति न संशयः ३६ प्रज्वलन्कंसवाक्येन हूतेनाप्रियं यथाभ्रशं कंसभृत्यो महादुष्टः प्राहेदं पथि माधवं रजक॰
ईदृशान्येव वस्त्राणि पितृभिर्वः पितामहैः धारितानि किमुद्धृत्वा स्नानकौपीनधारकाः ३७ मानागच्छत यान नगरात्सर्वे वै जीवितेच्छया
कारागारे कारयामि युष्मान्सर्वान्दुरात्मनः ३८ नारद उवाच एवं प्रवदतस्तस्य रजकस्य यदूत्तमः जहार मस्तकं तस्य कराग्रेणैव बली ४

CC0, Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

लया ४० नस्योतिः श्रीघनश्यामे लीनं जातं विदेहराट् सयमस्तद्गुणाः सर्वैवासः कोशान्विसृज्यवै ४१ ददृशुः सर्वेनोराजन्नृशस्तकाले।
ग्रथाचनाः गृहीत्वात्मप्रिये वस्त्रे स्थितयो रामकृष्णयोः जगृहुर्वापि वालास्ते राजमार्गे जनाश्चपि ४२ नद्धारत्नाविटो वालो वासांसि हविरा
ितिव ग्रलंव्यस्तपरिदधुः श्रीकृष्णस्य पश्यतः ४३ वीक्ष्य तौ वालकः कश्चित्कृष्णवलदेवयोः विचित्रवर्णैर्वासोभिर्दिव्यवेषं चकार
ह ४४ नत्वान्येषां शिल्पिनां वयथायोग्यं विधानतः राजन्वरमयाभक्त्या पुनःकृष्णं ददर्शह ४५ प्रसन्नो भगवांस्तस्मै प्रादात्सारूप्यमात्मनः
वलं श्रियं तथैश्वर्यं वलदेवो ददौ पुनः ४६ ॐ इति श्रीमद्गर्गाचार्यसंहितायां श्रीमथुराखंडे श्रीकृष्णप्रवेशो नाम पंचमोध्यायः ५
नारदउवाच ग्रथ गोपालकैः सार्द्धं श्रीकृष्णो नंदनंदनः गृहंजगाम सवलः सुदाम्नो नाम मालिनः १ दृष्ट्वा तौ सहसोत्थाय नमस्कृत्य
कृतांजलिः पुष्पसिंहासने स्थाप्य प्राह गद्गदया गिरा २ सुदामोवाच धन्यं कुलं मे भवनं च जन्म त्वय्यागते देवकुलानि सप्त मातुःपि
तुः समस्ताश्च पितृयाया वैकुंठलोकं गतवंति मन्ये ३ भूभारहर्तुं सकलं यदोः कुले जातौ युवां पूर्णतमौ परेश्वरौ नमो युवाभ्यां ममदीन
दीनं रहं गतानंगां जगदीश्वरौ परौ ४ नारदउवाच इत्युक्त्वा पुष्परचनालंकारान्मधुपध्वनीन् निवेद्य मकरंदाढ्यमालाकारो ननाम ह ५
२ धृत्वा तत्पुष्पनिचयं सवलो भगवान्हरिः दत्वा गोपेभ्य आरात्प्राह प्रहसिताननः ६ गतीयसे मम दाने भक्तिर्भूयात्सदा तव मद्भक्ता
नांतसंगः स्यान्मत्सारूप्यमिहैव हि ७ वलदेवो ददौ तस्मै श्रियं चान्वयवर्द्धिनी उत्थाप्य तौ ततो राजन्नृत्यावीथीषु जग्मतुः ८ यांतीं स्त्रि
यं पद्मनेत्रां पाटीरालेपभाजनं विभ्रतीं युवतीं कुब्जां पथि पप्रच्छ माधवः ९ श्रीभगवानुवाच कात्वं कस्य प्रियासुभ्रु कस्यार्थं चंदनं।
विटं देह्यावयोर्येन तव परं श्रेयो भविष्यति १० सैरंध्र्युवाच दासास्मि सुंदरवर कुब्जा नाम महामते मद्दत्ता पेशिपाटीरं जातं भोज
पतेः प्रिये ११ ग्रथापि कंसदासास्मि सांप्रतं तव चाग्रतः हृतं मे सुंदरं दृष्ट्वा समेभुजदंडेस्ति मे मनः युवां विना कोन्यतमो नुलेपं कर्तुमर्हं।
सि युवयोस्तु समं रूपं त्रैलोक्ये नहि विद्यते १२ नारदउवाच उभाभ्यां सादरं तौ सांद्रं हर्षिता ह्यनुलेपनं ग्रथता वंगरागेण रामकृष्णोवि
रेजतः १४ जगद्वंद्यं दत्वे दिव्यं किंचित्किंचिद्विजार्भकाः त्रिवक्रामथतां कृष्णः ऋज्वीकर्तुं मनोदधे १५ आक्रम्य पद्भ्यां प्रपदे द्व्यंगुलिष्टुयं

CC0. Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

गर्गा० श्रीज्ञानुहस्तेन विभुः परेश्वरः प्रगृह्य तन्नाणां विधुके प्रपश्यतां वकांतरं तां प्रदनीन महद्युतिः तदैव सा यष्टिसमानविग्रहा रतिंवरं भोविः

म० पतीवहूपिणी भूत्वा गृहीत्वा हरिं तु वासस्सि भुवि स्मिता ज्ञातमनोजविह्वला १७ श्रीभगवानुवाच गच्छाशु हे सुंदरि त्वं यथामत्र हे त्वत्कृते भवे

५ तंकिलनोस्तहेवयं प्रसीदसर्वज्ञरसज्ञमानद त्वया भृशं शोभ्मयितं मनोमम १८ नारद उवाच तदैव गोपाः जहसुः परस्परं सुहोकि

सेतत्करतालनिस्वनैः प्रहस्य रामस्य हरिः प्रपश्यतस्तया याच्यमानोऽपि वदत्स्वयं वचः १९ श्रीभगवानुवाच सुहोति यस्मान्मधुरापुरीं यव

सेतियत्रैव जनास्त सौम्याः ये ज्ञातपंथान्तरहेन यंति दृष्ट्वा पुरीं या मतवा गमिष्ये २० नारद उवाच एवमुक्त्वा तरीयांते समाकृष्य गि

राईणा राजमार्गं व्रजन्कृष्णो वैश्यपन्नाद्धान्ददर्श ह २१ पुष्पतांबूलगंधाद्यैः फलैर्ईयफलैर्हरिं संपूज्य सायणोस्याप्यने पुरयधियो

विशः २२ वैश्याऊचुः भवेद्देवस्तते राज्यं ताव कान्स्मरतां सदा वयं तव प्रजा देव राज्ये प्राप्ते न कंसरेत २३ पप्रच्छ सस्मितो वैश्यान्को

दंडस्थानमच्युतः नतेन भूवुः सधियः कोदंडे भंगशंकया २४ तद्रूपगुणमाधुर्यमोहिता ये च माथुराः कौमारपश्येहि पञ्चविंसनुः

लदि हतवः २५ तैर्दृष्टेन यथा कृष्णः प्रविष्टो यत्र पुष्पस्थलं मैत्रीकुर्वन्वयस्यैस्म माथुरैः पुरबालकैः २६ यथैं दृहेमचित्राद्धाकोदंडं

सप्ततालकं प्रपुरुषैः पंचसाहस्रैर्नितं यो यं व्रजाद्गृहं २७ सुखपातमयंक्तिं फलललभारसमंपरं बत्तदृश्यपौरजनैरर्चितं यत्र मंडपे १ ८

न भार्गवेप्रदत्तं यद्राजायमाधवः ददर्शा कुंडलीभूतं साक्षाच्छेषमिवस्थितं २८ वार्यमाणो नृभिः कृष्णः प्रसह्य यत्पुरा ददे पश्यतां

तत्रपौराणां सज्यं कृत्वाथ लीलया ३० आकृष्य कर्णपर्यंतं दोर्दंडाभ्यां हरिर्धनुः वभंज मध्यतो राजन्निक्षुदंडं गजो यथा ३१ भज्य

मानस्य धनुषः टंकारोभूत्तडित्स्वनः नादितेन ब्रह्मांडं सप्तलोकैर्बिलैः सह ३२ विचेलुर्दिग्गजास्तारा राजन्भूखंडमंडलं तदैव वा

धिरीभूता पृथिव्योजनमंडली ३३ कंसस्य हृदये शङ्को विददार च वीहृयं तद्रक्षिणाः प्रकुपिता उत्थिता आततायिनः ३४ गृहीतुं

कामां श्रीकृष्णं स्वप्रत्युर्वंधुलामिति स्वयं तानागतान्वीक्ष्य सशस्त्रान्बलकेशवौ कोदंडशकलेनीत्वाजघ्नतुर्ईमदान्मशं शकला ५

तिप्रहारेण केचिद्वीरास्तु मंडले ३७ विचेलुर्माथुराः सर्वे दंडद्रुवल्लहि हतवः पुष्णीकोलाहले जाते नराणां जातं महद्भयं ३८ भोज

1454

CC0, Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

राजसमाजत्रमकस्मान्निपपात ह गोपालैः सबलः कृष्णो यावज्ज्ञापयत्यलं नृप ३९ तावद्ययौ नंदनिकटं संध्याकाले तिमीलितवत् निरी
क्ष्य गोविंदस्वरूपमद्भुतं विमोहिता वै मथुरापुरांगनाः विस्रस्तवासः कवराः स्मरातुराः परस्परं प्राहुरिदं सखीजने ४१ पुरंध्र्यूचुः
कंदर्पकोटिद्युतिमादरस्त्वं त्वं वच्म्यहं वै मथुरापुरे हरिः निरीक्ष्यते काभिरतीव सा सती तां गोपसर्वे ह्यपि नः समाश्रिता ४२ कुशलाः स्युः
कृताः स्त्रियः किं नहि संतिपन्न नेत्रे निरीक्ष्यते याभिरनंगमोहनः व्रजे गोपसर्वे ह्यपि सर्वसुंदरो नास्माभिरानंदमयो निरीक्ष्यते ४३ कस्मै
कदेशे मथुरा त्वमीक्ष्यते न ह्यागमिष्यति ते व्रजपत्तनमनेन गवत् सदैव सर्वांगमनोहरः सखि सुपवने त्रेणा कथं समीक्ष्यते ४४ व्रजे गेहं गोष्ठे
हरे नंदसूनोः प्रातर्यात्रयज्ञापि नेत्रे तस्मात्तस्मान्नाम तद्धन्यसौख्यं लावण्याढ्यो मग्नुरहृज्ज्वचित्तं ४५ नारद उवाच इत्थं हि वै
यैर्व्रजराजनंदने स्वप्नेपि न हृदं दृश्यः पुरस्त्रियः गोप्यः कथं ते मथुरां नमस्तहृर्षाभिकृतं मैथिलरासमंडले ४६ ॥ इति श्री
मद्गर्गाचार्यसंहितायां श्रीमथुराखंडे श्रीमथुरादर्शनं नाम चतुर्थोध्यायः ८ ॥ नारद उवाच रजकस्य शिरश्छेदं कंसो वै र
क्षिणं वधं धनुर्भंगं ततः श्रुत्वा परं त्रासमुपागतः १ तत्क्षणाद्दुर्निमित्तानि नानांगस्फुरणानि च प्रपश्यन्नेव भंगानि न निद्रां प्रा
प दैत्यराट् २ स्वप्ने प्रेतैः समारूढः तैलाभ्यक्तो दिगंबरः जपास्रक् महिषारूढो दक्षिणाशां जगाम सः ३ प्रातःकाले समुत्थाय
नू कार्यभारकरांजनान् आहूय कारयामास मल्लक्रीडामहोत्सवं ४ विशालाजिरसंयुक्ते हेमस्तंभसमन्विते सभामंडपदेशाग्रे
रंगभूमिर्बभूव ह ५ वितानैर्हेमसंकाशैर्मुक्तादामविलंबिभिः सोपानैर्हेमसंयैश्च रंगभूमिर्बभौ नृप ६ राजमंचे रत्नमये म
करंदादिते शुभे शक्रसिंहासने तत्र सोपवर्हणमंगले ७ आतपत्रेण दिव्येन चंद्रमंडलचारुणा हंसाभैर्व्यजनैर्युक्ते चामरैर्वज्र
मुष्टिभिः ८ दशहस्तोच्छ्रितं शश्वच्छिल्पकर्मविनिर्मितं तदारुह्य बभौ कंसो द्रिशृंगं मृगराडिव ९ गोपकाः पुरजनास्तत्र
वीरयोषितः नेदुर्मृदंगपटहतालभेर्यानकादयः १० राजानो मंडलेशाश्च ये राजानः परान्नृप ददृशुर्मल्लयुद्धं ते मंचे मंचे स
मास्थिताः ११ चाणूरो मुष्टिकः कूटः शलस्तोशल एव च व्यायाममकुर्वंते युयुधुस्ते परस्परं बाणासुरजरासंधनरकाणां गुरा

गर्गं॰ मं॰ ५ न्नृप युद्धेषां शुंबरादीनां सकाशान्नृभुजां तथा १४ बलं यस्यास्ति पद्मानां सहस्राणां च यस्य वै कुवलयो नाम कंसो हि मायावी लक्षविग्रही १५
मल्ललीलादर्शनार्थं यथा रंगमंडले गोमूत्रचयसिंदूरकस्तूरीपत्रभृत्स्तवे १६ मुक्तान्वितं महामत्तं स्वर्णकुंडलमंडितं गजं कुव
लयापीडं रंगद्वारमवस्थितं १७ वीक्ष्य कृष्णो महामात्रं प्राह गंभीरया गिरा आकर्षयांगनागेंद्रं मार्गं कुरु ममेच्छया १८ न चेन्मां पा
तयिष्यामि सनागं भूमिमंडले महामात्रस्तदा क्रुद्धो नोदयामास तं गजं १९ वीक्ष्य कारस्मकं दंतिनं कुर्वंतं नंदसूनवे गृहीत्वा तं हरिं
मदः शुंडादंडेन नागराट् २० उज्जहार ततस्तस्मान्निर्गतो भारभृद्धरिः तस्यांघ्रिषु विलीनो भूत्वा भ्रमन्संस्थितस्ततः २१ वृंदावन
निकुंजेषु वृक्षेषु च यथा हरिः करेणाहत्य नागः शुंडादंडेन चांघ्रिषु २२ निष्पीड्य शुंडं हस्ताभ्यां हरिः पश्चाद्विनिर्गतः तिर्यक्स्थितस्थिते
नागे गृहीत्वा पुच्छकं क्रमे २३ मुष्टिना तं ताडयित्वा पुरोद्द्रावमाधवः तमनुधावन्नागेंद्रो मधुरां वविदे हराट् २४ कोलाहलेन दा
जाते हरिस्तस्मात्स्थितो यथौ पुच्छे गृहीत्वा तं नागं बलदेवो महाबलः २५ चकर्ष भुजदंडाभ्यां फणिनं गरुडो यथा श्रुत्वा भगवान्
कृष्णो गृहीत्वा तं करे बलात् चकर्ष भुजदंडाभ्यां कृपरं जय यथा नरः ह्ययोराकर्षणान्नागो विह्वलो भूत्वा पेश्वर २७ महामात्रस्तदा
समाकृष्य दंते गजं बलात् नीता गजास्तथा वान्ये कंसं हंतुं ब्राजकये २८ अंकुशास्फालनाक्रुद्धं मत्तेभं पुनरागतं श्रीकृष्णो भगवा
न्नालाद्बलदेवस्य पश्यतः २९ शुंडादंडे संगृहीत्वा भ्रामयित्वा वितस्ततः पातयामास भूपृष्ठे कमंडलमिवार्भकः ३० द्वारेषु पति
तालस्य महामात्राश्च ततः सत्ताप्रपशुपतां नागः सद्यो वै निपतेगतः ३१ तज्ज्योतिः श्रीघनश्यामे लीनं जातं विदेहराट् दंतावुत्पा
ट्य तस्यापि रामकृष्णौ महाबलौ निजघ्नतुर्महामात्रान्नागान्केसरिणो यथा ३२ द्विपे हते पियेवान्ये महामात्राश्च तत्र तः विद्रुदु उ
र्यथा मेघा वर्षाकाले गते सति ३३ एवं हत्वा द्विपं गोपैः शोभितैः प्रेक्षणोत्सुकैः जयारावे रामकृष्णौ श्रमवारिमदांकितौ ३४ प
रिश्रमा कृष्णाद्यौ रंगे विविशतुस्तदा दंतपाणी महावेगौ यथा ब्रह्मानिलानलौ ३५ मल्लाश्रमल्लं च नरा नरोत्तमं स्त्रियः स्मरं गोपगणा
व्रजेशो पिता स्वं तं दंडधरं खलसंतो मृत्युं च कंसो ऽद्विधा विराजे ३६ हृदि परं योगिवराश्च भोजा दैवं नराः रंगगते बलेन पृथक्पृथक् ८

1457

भावनयात्यवपश्यन्नर्वैजनास्तंपरिपूर्णदेवं ३७ हृतद्विपंवीक्ष्यचतोमहाबलौकंसोमनस्वीभयभावचेतसि मेवस्थितोहर्षितमान
साश्रयेचंडेचकोपाश्वतेस्वयंयथुः ३८ कर्णौचकर्णाविनिधायनागराममहोल्कास्तेत्वरवत्यनरस्परं यतौहिसातात्परमेपरौपरौ
बभूवतुर्वैवसुदेवनंदनौ ३९ अहोतिरम्यंव्रजमंडलंपरंपरैवसाक्षाद्धिवसत्रमाधवः कृत्वाहियद्दर्शनमयद्वर्लभंवयंकृतार्था।
स्तुभवेमसर्वतः ४० नारदउवाच वदत्सुपौरलोकेषुनदत्सुर्येषुमैथिल चाणूरस्तावुपव्रज्यरामकृष्णाववाचह ४१ चाणूरउवा
च हेरामहेकृष्णयुवांमहाबलौराज्ञःपुरोवेऽकृतेमयंबलात् प्रहर्षितेराजनिवेयद्धुतंनमेकिंकिंनभवेद्भवतीहनश्रवः ४२ श्रीभ
गवानुवाच पुरेवभद्रेन्नृपतेःप्रसादतोबालावयंतत्रबलेश्वबालकैः भूयान्मधोमोबलवर्नृयपोचितमधर्मयुद्धंकिलमाभवेदि
ह ४३ चाणूरउवाच भवान्नबालोनचबाकिशोरोबलश्चसाक्षाद्बलिनांबलीयान् सहस्रमत्तेभबलंदधानोद्विपोभवद्योनिहतः
सलीलं ४४ नारदउवाच एवंतस्यवचःश्रुत्वाभगवान्वृजिनार्दनः चाणूरेणापियुयुधेमुष्टिकेनबलोबली ४५ आकर्षणोनोदने
चभुजाभ्यांभुजदंडयोः चक्रतुःपश्यतांनृणांगजाविवजिगीषया ४६ हत्वाभ्यांवपुरुत्थायचाणूरस्यहरिःस्वयं भ्रमोलयद्देहमा
रंपुण्यभारेयथाविधिः ४७ चाणूरस्तेहरिंदेवंकरेणैकेनलीलया उज्जहारमहीवीरोभूखंडेनगराडिव ४८ ग्रीवायांकिलचाणूरं
भुजवेगेनमाधवः कक्षायांचोद्धृत्यसहसापातयामासभूतले ४९ हस्तैश्चजानुभिःपादैर्भुजैरंगुलिमुष्टिभिः जघ्नतुःकृष्णचाणूरौ
तथैवबलमुष्टिकौ ५० भ्रमवातरिपतद्दृष्ट्वामुष्टिकेरामकृष्णयोः मांत्रकंपालखाप्राड्गर्गवानस्थान्नपश्चियः ५१ अहोप्युपर्मस्तु
महान्सभायांजातःपुरोराजनिवर्तमाने कवज्रतत्स्रागकृतोहिमलोकपुष्पतल्पौवतरामकृष्णौ ५२ अहोद्यभाग्यंपहिपुरौकसां
नोयुद्धेतयोर्दर्शनमद्यजातं अहोतिधन्यंवनभूरिभागेवनौकसांरासरसेनजाते ५३ अहोस्थितेराजनिदुष्टचित्तेनकोपिवक्तुंक्षम
एवमत्र्यः तस्माद्धिनःपुण्यबलेनचैनौतौरमध्येवैजयतामरीन्स्वान् ५४ ※ इतिश्रीमद्गर्गीयार्यसंहितायांश्रीमथुराखंडेनारद
बहुलाश्वसंवादेसप्तमोध्यायः ७ ※ नारदउवाच आर्द्रैचिमेनंदराजंवनितानांमनोरथं स्वत्वाशत्रून्हंतकामश्चकेयुद्धंबलाद्धरिः १

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्गं॰ सं॰ ७ गृहीत्वा भुजदंडाभ्यां चाणूरं गगने बलात् चिक्षेप सहसा कृष्णो वातः पद्ममिवोद्धृतं २ आकाशात्पतितः सोपि तारके वल्पयोद्भवः
उत्थाय मुष्टिना कृष्णं ताडयामास वेगतः ३ तस्य मुष्टिप्रहारेण न चचाल पदात्परः सयागृहीत्वा चाणूरं पातयामास भूतले ४ भित्त्वा दं
तस्त्व चाणूरः क्रोधयुक्तो महोत्कटः मुष्टिद्वयेन श्रीकृष्णं ताड हृदि मैथिल ५ गृहीत्वा करयोस्तं वै कराभ्यां भगवान्स्वयं कंस।
स्याग्रे भ्रामयित्वा सर्वेषां पश्यतां नृप पातयामास भूपृष्ठे कमंडलुमिवार्भकः श्रीकृष्णस्य प्रहारेण चाणूरो भिन्नमस्तकः ७ उद्दम
न्रुधिरं राजन्सद्यो वै निधनं गतः तथैव मुष्टिकं मल्लं मुष्टिभिर्युयुधे दुर्गमं ८ नीलाद्रौ भ्रामयित्वा खे बलदेवो महाबलः पातया
मास भूपृष्ठे फणिनं गरुडो यथा मुष्टिको निधनं प्राप्तः प्रोद्वमन्रुधिरं मुखात् ९ कूटं समागतं वीक्ष्य बलदेवो महाबलः मुष्टिना
पातयामास वज्रेणेंद्रो यथा गिरिं १० प्राप्तं शलं नंदसूनुर्लीलया तेन ताडह तीव्रायातं डया राजन्कद्रुजं गरुडो यथा ११ गृहीत्वा
तोशलं कृष्णो मध्यतः संविदार्य्य च शालिपर्कं समं चाग्रे विटपं सिंधुरो यथा १२ एते निपातिता रंगे सद्यो वै निधनं गताः तेषां ज्यो।
तींषि वै कृष्णे विविशुः पश्यतां सतां १३ एवं श्रीरामकृष्णाभ्यां मल्लेषु निहतेषु च शेषाः प्रदुद्रुवुर्मल्ला भयार्ता जीवनेच्छया १४ श्रीदा
मादीन्वयस्यांश्च गोपान्कृष्णः समाधवः तैः सार्द्धं युद्धमारेभे सर्वेषां पश्यतां सतां १५ किरीटकुंडलधरौ रामकृष्णौ सहार्भकैः विह
रंतौ वीक्ष्य रंगे विस्मिताः पुरवासिनः १६ कंसं विना सर्वमुखाज्जयशब्दो विनिर्गतः साधु साध्विति वादोभून्नेदुर्दुंदुभयस्ततः १७ स
स्याः जये वीक्ष्य कंसो महाक्रोधसमाकुलः वर्जयित्वा तूर्यघोषं शब्दं प्रस्फुरिताधरः १८ कंस उवाच दुर्बुद्धिपुत्रौ वसुदेवनंदनौ
प्रसह्य निःसारयतां मे पुरात् हरंतु सर्वं व्रजवासिनां धनं बध्नीत नंदं सहसातिदुर्मतिं अद्यैव देवस्य पितुः कुबुद्धेः शौरेः शिर
श्चाशु छिंधि छिंधि कोपवत आपितयाग्रहसी ज्ञातान्स्वगोशान्किल सूदयध्वं २१ नारद उवाच एवं विकत्थमानस्य कंसस्य
यदुनंदनः सहसोत्पत्य तं मंचमारुरोह क्रोधपूरितः २२ मल्लं समागतं वीक्ष्य मंचादुत्थाय सत्वरं महोद्धतो भर्त्सयंस्तेज गर्हे खड्गच ७
र्मणी २३ अग्रहीत्सहसा कंसं दोर्भ्यां चर्मासिसंयुतं यथा तं ... विभागाभ्यां सविषं फणिनं विराट् २४ एतत्वद्भुतं सर्वं

१४५८

२४२

CC0, Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

1459

५

भुजवंयथाहूलांवली विनिर्ययौतान्सर्वान्तेशतस्तुंडरीकोयथाफली २५ संचेतौबलिनौवेगान्मल्लयुद्धेपरस्परं शैलशृंगेयथासिंहौयुद्ध
भ्रातेयथानयो २६ उत्पतंतंबलात्कंसंशतहस्तंमहाबलं अग्रहीत्वोपतत्कृष्णः श्येनंश्येनोयथाबले २७ गृहीत्वाभुजदंडाभ्यांप्रचंडदैत्य
पुंगवं त्रैलोक्यबलधृक्देवोभ्रामयित्वाशतशस्ततः २८ आकाशात्पातयामासमंचोपरिकृष्णान्वितः भग्नदंडोभवन्मंचस्तुडिंवानायथा
दुमः २९ पतितोपिसवज्रांगः किंचिद्व्याकुलमानसः सहसोत्थाययुयुधे श्रीकृष्णेनमहात्मना ३० नीत्वातेभुजदंडाभ्यां मंचेदिक्ता
पुनःप्रभुः आरुह्यहृदयेतस्यमौलिंजग्राहमाधवः ३१ सद्यःप्रगल्भकेशेषुरंगोपरिहरिःस्वयं मंचात्तेपातयामासशैलाद्गुंडशि।
लामिव ३२ तस्योपरिष्टाच्छ्रीकृष्णः सर्वधारःसनातनः निपपातस्वयंवेगाद्दनेनानेनविक्रमः ३३ इत्थंद्वयोर्निपातेननिष्प्रभूत्वं
डुमंडले स्थालीवसहसाराजन्न्वकंपेचवटिकाद्वयं ३४ संपरेतेभोजराजेभूमौतेविचकर्षह यथामृगेंद्रोनागेंद्रं सर्वेषांपश्यतां।
नृप ३५ हाहाकारस्तदेवासीद्धावलोभूभुजांनृप वैरभावेनदेवेशंभजन्कंसोमहाबलः ३६ जगामतत्स्वसारूप्यंभृंगिणःकी
टकोयथा कंसंप्रपतितंदृष्ट्वाभ्रातरोष्टौमहाबलाः ३७ सुनामासृष्टिन्यग्रोधास्तुष्टिमन्राष्ट्रपालकाः सुहूनाकंकशंकुभ्भा
क्रोधप्रस्फुरिताधराः खड्गचर्मधरायोद्धुंकृष्णोपरिसमाययुः ३८ वीक्ष्यतान्मुद्गरंनीत्वारोहिणीनंदनोबलः आराच्चकारहुंकारं
यथासिंहोमृगान्प्रति ३९ हुंकारेणैवशस्त्राणितेषांहस्तेभ्यआभयात् पेतुराम्रफलानीवचंडवातेनमैथिल ४० निःशस्त्रास्ते·
महावीरामुष्टिभिःसर्वतोबलं तेडुःशैलेयथानागाःशुंडादंडैर्विनस्ततः ४१ सृष्टिंतथासुनामानंमुद्गरेणबलोहनत् न्यग्रोधंभु
जवेगेनकंकंवामकरेणवै ४२ शंकुंसहूंतुष्टिमंतंवामपादेनमाधवः राष्ट्रपालंदक्षिणेनपादेनाभिजघानह ४३ मुष्टेनिपेतुः
सहसावृत्तावातहताइव तेषांज्योतिर्भगवतिलीनंजातंविदेहराट् ४४ देवदुंदुभयोनेदुर्जयध्वनिरभून्तदा सद्योवैववृषुर्देवाः
पुष्पैर्नंदनसंभवैः ४५ विद्याधर्यश्चगंधर्व्योननृतुर्हर्षविह्वलाः विद्याधराश्चगंधर्वाःकिन्नरास्तद्यशोजगुः ४६ ब्रह्माद्यामुन·
यःसिद्धाविमानैर्द्रष्टुमागताः तुष्टुवूरामकृष्णौतौवाग्भिःस्तुतिपरायणाः ४७ ताडयंत्युरोहस्तैरस्तिप्राप्त्याद्यस्त्रियः विनि

CC0, Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

गर्ग॰ तेनास्थाहृदुर्जानवैधव्यदुःखिताः ४८ स्त्रियऊचुः हानाथहेयदुपतेक्वगतोसिमहाबल त्रैलोक्यविजयीसाक्षाद्देवानामपि
सं॰ दुर्जयः ४९ मातमाद्याःस्वसुःपुत्रानिहत्यतेनत्वयाहताः श्रुतिदृष्टानिदृष्टाश्रुपरेपिनिहताबलात् तेनपापेनघोरेणदशामे।
८ नाहदृशींगतः ५० नारदउवाच एवमश्रुमुखीर्दीनारताःसास्तनृपयोषितः विधाययमुनातीरेचितोश्रीविदुरसंयुतौ ५१ हतानां
कारयित्वासौक्रियांवैपारलौकिकीं सर्वान्संबोधयामासभगवान्लोकभावनः ५२ ॥ इतिश्रीमद्गर्गाचार्यसंहितायांश्री।
मथुराखंडेकंसवधोनामाष्टमोध्यायः ८ ॥ नारदउवाच अथदेवौरामकृष्णौदेवकीवसुदेवयोः समीपंजग्मतुःसाक्षा
द्धलिभिःपरिवारितौ १ खनत्स्वयोर्बंधनानियद्गुःशैथिल्यतांनृप तौवंद्यगाढदेपामेनागपाशगुणाययथा २ स्वप्रभावदि
दैवीत्वपितरौसबलोहरिः सद्यस्ततानस्वांमायांजगन्मोहकरींबलात् ३ रामकृष्णौसुतौज्ञात्वाशौरिर्मोहसमाकुलः देवक्या
सहसोत्थायसस्नेहेचाश्रुपूरितः ४ तावाश्वास्यहरिःसद्योहलिभिःपरिवारितः मातामहंतूग्रसेनेचकारमथुराधिपं ५ ग्राहू
टं यथाद्वान्कंसभयाद्देशांतरंगतान् प्रेम्णानिवासयामाससत्कृत्वास्वदोर्बलैः ६ नंदराजंगोपगणैःस्वगृहान्गंतुमुद्यतं नत्वातं
सबलःप्राहमोदयन्निवमामया ७ शैवबासंकुरुनातयुष्याँगंतेयदीच्छामनसोप्यिनतास्मात् पश्चाद्वैदैसबलोयदून्वावि।
धायपार्श्वंतवचागमिष्ये ८ नारदउवाच एवंश्रीरामकृष्णाभ्यांनंदराजःप्रपूजितः शालिंगपशौरिगोपालैर्ययौप्रेमातुरोव्रजं ९
दत्तेश्रीकृष्णजन्मर्क्षेयेनूनांनियुतंपुरा ब्राह्मणेभ्योददौशौरिर्वस्त्रमालाद्यलंकृतं १० शौरिर्गर्गंसमाहूयश्रीकृष्णबलदेवयोः
यज्ञोपवीतंविधिवत्कारयामासधर्मवित् ११ रामकृष्णौसर्वविद्याध्ययनंकर्तुमुद्यतौ गुरोःसांदीपनेःपार्श्वंजग्मतुर्जनवासरौ १२
कृत्वापरांगुरोःसेवांलघुकालेनमाधवौ सर्वविद्यांजगृहतुःसर्वविद्याविदांवरौ १४ गुरवेदक्षिणांदातुमुद्यतौतौकृतांजली
मृतंपुत्रंदक्षिणांताभ्यांवव्रेगुरुर्द्विजः १५ रथमारुह्यतौदांतौशान्तकंभपरिच्छदं प्रभासेचाब्धिनिकटंजग्मतुर्भीमविक्रमौ १५
समुद्रःप्रकंपितःसिंधुरन्तोपायनमुत्तमं नीत्वातच्चरणोपांतेनिपपातकृतांजलिः १६ तमाहभगवान्कृष्णोपुत्रंदेहिगुरोर्ममप्र ६

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1461

वेडोसितदारोयैत्वयानहृतांकृतं १७ समुद्रउवाच भगवन्देवदेवेशनमयावालकोहृतः पुनःपंचजनेनासौशंखरूपासरे
णावे १९ वसन्सदासमुद्रेरवलिष्टोदैत्यपुंगवः ज्ञेनंयोग्यपत्वयादेवदेवानांभयकारकः २० नारदउवाच तेनोक्तोभगवान्सद्यो
वासोवधाकरोदृढं निपपातमहावेगात्समुद्रेभीमनादिनि २१ श्रीकृष्णस्यनिपातेनत्रिलोकीभारहारिणः चकंपेपृथिवीसर्वाशैव
ज्ञेकूटैनवविदेहराट् २२ ततःपंचजनोदैत्योयोद्धुंश्रीकृष्णसन्मुखे आगतेसहसावीरःशूलेनविक्षेपमाधवे २३ हस्तेगृहीत्वातच्छू
लंतेनैवाभिजघानतं तद्घातेनचपतितोमूर्छितोवारिमंडले २४ सहसोत्थायदेवेशंकिंचिद्व्याकुलमानसः मूर्द्धानंतताडपदैः
दैत्यफणेनफणीयथा २५ परिपूर्णतमःसाक्षात्श्रीकृष्णोभगवान्हरिः क्रुद्धोमूर्द्ध्निवेगेनमुष्टिनातमताडयत् २६ कृष्णमुष्टि
प्रहारेणसद्योवैनिधनंगतः तज्ज्योतिःश्रीघनश्यामेलीनंजातंविदेहराट् २७ एवंहत्वापंचजनंशंखंनीत्वातदंगजं महार्णवा
न्निर्गतोसौसहसारथमागमत् २८ वायुवेगेनयानेनरामकृष्णौमनोहरौ जग्मतुःशमनस्यापिदीर्घांसंयमनींपुरीं २९ पांचज
न्यध्वनिंलोकप्रचंडोमेघघोषवत् पूरयामासयत्कृत्वाचकंपेसभोयमः ३० वलराशीनिलक्षेषुनरकेषुनिपातिताः येये
कृत्वाध्वनिंतेतेजग्मुर्मोक्षंतपापिनः ३१ यमःसद्योवलिनीत्वाश्रीकृष्णवलदेवयोः पपातचरणोपांतेधर्षितःसत्कृतांजलिः ३२
यमउवाच हेहरेहेकृपासिंधोरामरामसहावल असंख्यब्रह्मांडपतीपरिपूर्णतमौयुवां देवौपुराणौपुरुषौमहांतौसर्वेश्वरौस
र्वेजगज्जनेशौ अथैवसर्वोपरिवर्तमानौगिरानिजांत्रावदतोपरेशौ ३४ श्रीभगवानुवाच गृहाणपुत्रंलोकपालशासनपरसमहा॰
मते राज्यंकुरुयथान्यायंमदुक्तमानयेंकवित् ३५ नारदउवाच तदैवतेनोपानीतंगुरुपुत्रंहरिःस्वयं गृहीत्वावर्तिकामेत्यद
दौश्रीगुरवेशिष्ठं ३६ गुर्वाशिषासंयुक्तौतौनत्वातंकृतांजली रथमारुह्यमथुरामागतौयदुपूजितौ ३७ एकदासवलःकृ
ष्णःसर्वकारणकारणः योडवान्तेस्मरन्भक्तानक्रूरभवनंययौ ३८ अक्रूरःसहसोत्थायपरिरभ्यमुदान्वितः उपचारैःषोडश
भिःपूजयित्वाथलोन्नृप ३९ कृतांजलिपुटःस्थित्वाजातपूर्णमनोरथः उवाचहानंदजनितांवाष्पकलांनृप ४० अक्रूरउवा

CC0, Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

गर्ग. म ९ व पुत्राभ्यां रामकृष्णाभ्यां नाभ्यां नित्यं नमो नमः याभ्यां मार्गे यदुकुलं मे पूर्णं नद्य कृतं प्रभू ४१ लोकाभिरामौ जनभूषणौ न मौ चाज्ञ वंदि-
सर्वजगत्प्रदीपकौ गोविप्रसाधुक्षतिपर्मदेवतार्थं मयैव यदोः कुले गतौ ४२ कंसादिदैत्येंद्रविनाशहेतवे गोलोकलोका-
त्परिपूर्णतेजसौ समागतौ भारतभूमिमंडले युवां परेशौ सततं नतोस्म्यहं ४३ श्रीभगवानुवाच त्वमार्य हृद्दोष्टनिमानहेतु वसु-
रःशिशुः संतोन स्यात्मनः श्लाघ्यां कुर्वंति हि महामते ४४ पांडवानां हि कुशलं दृष्टुं गच्छ गजाह्वये शीघ्रमागच्छ तान्दृष्ट्वा सर्वोदन न.
पतेर्भवान् ४५ नारद उवाच एवमुक्तस्तदाक्रूरं भगवान्भक्तवत्सलः सबलः शौरिभवनमाययौ सर्वकार्यकृत ४६ कौरवेंद्रपुरंग-
त्वाऽक्रूरो दृष्ट्वा पांडवान् पुनरागत्य कृष्णाय वार्ता सर्वामवर्णयत ४७ अक्रूर उवाच विना युवां कोपि न पांडवानां सहायकृत्कौरव-
त्वाः क्रूरो हृष्ट्वा पांडवान् पुनरागत्य कृष्णाय वार्तां सर्वामवर्णयत् ४७
दुःखकोहत सतेच पांडो भवतोः पदाब्जे विलग्नचित्ता हि पृथात्मजा ये ४८ नारद उवाच इति श्रुत्वा क्रूरमुखात्कृष्णो भगवान्हरिः
स्वर्द्धं राज्यं पांडवेभ्यो कौरवानां बलाहृतो ४९ अथोक्तं वचनं श्रुत्वा तदोद्धव समन्वितः महामंगलसंयुक्तं कुब्जाया भवनं ययौ २
दृष्ट्वा कुब्जी हरिं प्राप्तं कुब्जा रूपवती वरं भक्त्या समर्हयामास पाद्याद्यैः प्राणवल्लभं ५१ हेमरत्नखचित्के ते कुब्जाया भवनोत्तमे वभौ
हरी रूपवत्या वैकुंठे रमया यथा ५२ परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्स्वयं यस्याः पतिरभूद्राजन्स्वहो तस्यास्तपो महत् ५३
तत्र स्थित्वा हरिर्देवो दिनान्यष्टौ विदेहराट् आययौ शौरिभवने लीलामानुषविग्रहः ५४ इति श्रीकृष्णचरितं मथुरायां विदेहराट्
सर्वपापहरं पुण्यं आयुर्वर्द्धनमुत्तमं ५५ चतुःपदार्थदं नृणां श्रीकृष्णवशकारकं मयाते कथितं हृद्यं किं भूयः श्रोतुमिच्छसि ५६
इति श्रीमद्गर्गाचार्यसंहितायां श्रीमथुराखंडे श्रीनारदबहुलाश्वसंवादे यदुसौख्यं नाम नवमोध्यायः ९ ॥ बहुलाश्व उवाच श्रीकृ-
ष्णचरितं पुण्यं मया न वधुखाच्छ्रुतं पुनः श्रोतुं मनश्चो यत्तृषितो वाजलेगतः १ कंसस्य जन्मकर्माणि त्वयोक्तानि श्रुतानि मे केशपा-
दीनां तदेवर्षे पूर्वजन्मकृतं श्रुतं २ कोयं तरजकः पूर्वमत्यधीयेद्धरिः कथं ग्रहो यस्य महज्ज्योतिः कृष्णे लीनं बभूव ह ३ नारद उवाच
त्रेतायुगे तपोध्यायो रामराज्ये विदेहराट् वाराणां मृणवतां कश्चिद्रजको छाव दप्रियो ४ नाहं बिभर्मि त्वां दुष्टां समं तीपरवेश्मगां ९

1463

स्त्रीलोभीबिभृयात्सीतांरामोनाहंभजेपुनः ५ इतिलोकाद्वचःश्रुत्वाह्यकीर्त्यंकृत्वाथराघवः सीतांतत्याजसहसावनेलोकापवाद
तः ६ तस्मैदंडंदत्वानसिद्धांतंनवक्तेराघवोत्तमः मथुरायांद्वापरांतेरजकःसबभूवह ७ कृतापराधदोषशांत्यर्थंतज्ज्ञानहरिःस्वयं त
र्दयित्वाददौमोक्षंतस्मैश्रीकरुणानिधिः ८ दयालोःकृष्णचंद्रस्यचरितंपरमाद्भुतम् एतन्मेकथितंराजन्किंभूयःश्रोतुमिच्छसि ९
बहुलाश्वउवाच पुराचैवाथकःकोयंनितरांमुनिसत्तम यस्मैददौचसारूप्यंश्रीकृष्णोभगवान्हरिः १० नारदउवाच मिथिलान
गरेपूर्वंचायकोहरिभक्तिकृत् श्रीरामोद्वाहसमयेसीरध्वजनृपाज्ञया ११ रामलक्ष्मणवेषार्थंवासांसिरचयन्नयं लघुसूत्रैःप
रिचयन्कुशलोवस्त्रकर्मसु १२ कोटिकंदर्पलावण्यौसुंदरौरामलक्ष्मणौ तौवीक्ष्यचायकोराजन्मोहितोभून्महामनाः १३ गृहं
सुहृदैलैर्वस्त्राणितयोरंगेषुसर्वतः परिधानंकारयामिचक्रेचेत्थंमनोरथं १४ मनसापिवरंरामोददौतस्मैत्वशेषवित् द्वापरांते
भारतेचभविष्यतिमनोरथः १५ श्रीरामस्यवरात्सोयंमथुरायांबभूवह तयोर्वेषंकारयित्वातत्सारूप्यंजगामह १६ बहुलाश्वउ
वाच सुदाम्नामालिनाब्रह्मन्किंकृतंसुकृतंवद यद्गृहेजग्मतुःसाक्षाद्रामकृष्णौमनोहरौ १७ नारदउवाच राजराजवनेरम्ये
नाम्नाचैत्ररथंशुभे तस्मिन्वैपुष्पवटकोहेममालीतिनामभाक् १८ विष्णुभक्तिरतःशांतोदीनःसत्संगकृन्महान् श्रीकृष्णदेव
प्रीत्यर्थंदेवपूजांचकारह १९ समाःपंचसहस्राणिपुष्पाणांचशतत्रयं नित्यंनीत्वाहंजेटेंपपुरोधृत्वाननामह २० एकदातिप्रस
न्नोभूच्छिवकःकरुणानिधिः मालाकारमहादेवोवरंब्रूहीत्युवाचह २१ हेममालीतदादेवंनमस्कृत्यकृतांजलिः प्रदक्षिणीकृ
त्यपुरःस्थित्वाप्राहनतानतः २२ हेममाल्युवाच परिपूर्णतमंकृष्णंकचिन्नोगृहमागतं पश्यामिहृद्यंतंसाक्षात्तद्देवेशभवेदि
दं २३ श्रीमहादेवउवाच द्वापरांतेभारतेचमथुरायांमहामते मनोरथस्तेसफलोभविष्यतिनसंशयः २४ नारदउवाच महेश्वर
वरेणासौहेममालीमहामनाः मालाकारोद्वापरांतेसुदामासंबभूवह २५ तस्मात्तस्यगृहेसाक्षाज्जग्मतूरामकेशवौ शिववाक्य
सनेकर्तुंकिंभूयःश्रोतुमिच्छसि २६ ॥ इतिश्रीमद्गर्गाचार्यसंहितायांश्रीमथुराखंडेनारदबहुलाश्वसंवादेरजकवायकमदा

५

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्गी० मोणाख्यानेनाम दशमोध्यायः १० ॥ बहुलाश्व उवाच सैरंध्या किं कृतं पूर्वं तपः परमदुर्लभं येन प्रसन्नः श्रीकृष्णो देवैरपि सु
म० दुर्लभः १ नारद उवाच पंचवट्यां स्थिते रामे कोटिकंदर्पसन्निभे वीक्ष्य शूर्पणखा नाम राक्षसी मोहिता भृशं २ निर्मोहं राघवं दृ
१० ष्ट्वैकपत्नीव्रतस्थितं क्रोधात्सीतां भक्षयितुं धावती रावणस्वसा ३ खड्गेन शितधारेण लक्ष्मणो राघवानुजः जहार तस्याः क
र्णौ च नासां सद्यो रुषान्वितः ४ छिन्ननासा गता लंकां रावणाय निवेद्य तत् भूयः पुष्करतीर्थे सा जगाम विमना भृशं ५ तपश्चक्रे
सूर्पणखा वर्षाणामयुतं जले ध्यायंती त्र्यंबकं देवं श्रीरामवरमिच्छती ६ ततः प्रसन्नो भगवान्देवदेव उमापतिः प्रत्यगात्पुष्क
रे तीर्थे वरं ब्रूहीत्युवाच ह ७ सूर्पणखोवाच श्रीरामो मे वरो भूयाद्वरं देहि मनोप्रियः त्वं देव परमः सर्वः सर्वात्मा माशिषां प्रभुः ८
शिव उवाच अद्यैव सफलो न स्याद्वरस्ते शूर्पणखे त्वसि द्वापरांते माथुरे च भविष्यति न संशयः ९ नारद उवाच सैव सूर्पणखा ना
म राक्षसी कामरूपिणी अभूत्कुब्जी मथुरायां तु कुब्जा नाम महामते १० महादेववरेणापि श्रीकृष्णस्य प्रिया भवत् इदं मया ते कथि
तं किं भूयः श्रोतुमिच्छसि ११ बहुलाश्व उवाच कोयं कुवलयापीडः पूर्वजन्मनि नारद कथं गजत्वमापन्नः श्रीकृष्णे लीनतां ग
तः १२ नारद उवाच बलिपुत्रो महाकायो नाम्ना मंदगतिर्बली सर्वशास्त्रभृतां श्रेष्ठो लक्षनागसमो बली १३ एकदा निर्गतः सोपि
रंगयात्राजनेष्वत्र मत्तेभो भूजनान्वेगात्कुंजाभ्यां परिमर्दयन् १४ तद्धाद्वेगात्पतितः पथि दृष्ट्वा त्रितो नाम मुनिः क्रुद्धः शशाप तं मत्तं
बलिष्ठं बलिनंदनं १५ त्रित उवाच गजवत्त्वं मदोन्मत्तो भूजनान्परिमर्दयन् विचरन् रंगयात्रायां त्वं गजो भव दुर्मते १६ नार
द उवाच एवं शप्तस्तदा दैत्यो नाम्ना मंदगतिर्बली पतन्कंचुकवद्देहं भ्रष्टतेजा बभूव ह १७ सर्वैः प्रभाववित्सद्यो दैत्यो भूत्वा कृतां
जलिः नत्वा प्रदक्षिणीकृत्य त्रितं मुनिमुवाच ह १८ मंदगतिरुवाच हे मुने हे कृपासिंधो त्वं योगी ब्रह्मवित् द्विजोत्तम गजत्वान्मे कदा न
मुक्तिर्भविष्यति वदाशु मां १९ तादृशानां सतां माभूद्धेलनं मे कदाचिन्मुने तादृशा मुनयो ब्रह्मन्मर्यादारक्षणाय भोः २० नार
उवाच एवं प्रसादितस्तेन त्रितो नाम महामुनिः गतक्रोधोऽब्रवीद्दैत्यं कृपालुर्ब्राह्मणोत्तमः २१ त्रित उवाच वचनं मे सुखानस्या १०

1465

बद्धत्वाद्धर्षितोस्म्यहं तेदास्यामि वरं दिव्यं देवानामपि दुर्लभं २२ मा शोकं कुरु देवेन्द्र मथुरायां हरेः पुरि श्रीकृष्णहस्तान्मे मुक्तिर्भ-
विष्यति न संशयः २३ नारद उवाच सोयं मंदगतिर्दैत्यो गजो भूद्विंध्यपर्वते नाम्ना कुवलयापीडो नागायुतसमो बले २४ गृहीतो
रिष्यामि तदा वालारिष्टेभ्यो विजयी यदा ४७ एकवालेन मे सौख्यं मंगयष्टिरिव प्रभुः वालं नीत्वा गमिष्यामि देशो रोहिणि नि
र्भये ४८ नारदउवाच तदैव विप्रा विद्वांसश्चागता नंदमंदिरं यशोदया च नंदेन पूजिता आसनस्थिताः ४९ ब्राह्मणा ऊचुः ३२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्ग॰ माशोकं कुरु तेनंद हे यशोदे व्रजेश्वरि करिष्यामः शिशो रक्षां चिरजीवी भवेदयं ५० नारद उवाच इत्युक्त्वा द्विजमुख्यास्ते
गो॰ कुशाग्रैर्नवपल्लवैः पवित्रकलशैस्तोयैर्ऋग्यजुःसामजैः स्तवैः ५१ पौरैः स्वस्त्ययनैर्यत्नं कारयित्वा विधानतः अग्निं संपूज्य
३३ विधिवद्रक्षां विदधिरे शिशोः ५२ ब्राह्मणा ऊचुः दामोदरः पातु पादौ जानुनी विष्टरश्रवाः ऊरू पातु हरिर्नाभिं परिपूर्णत
मः स्वयं ५३ कटिं राधापतिः पातु पीतवासास्तवोदरं हृदयं पद्मनाभश्च भुजौ गोवर्द्धनोद्धरः ५४ मुखं च मथुरानाथो द्वारा
केशः शिरोवतु पृष्ठे पातु त्वसुरध्वंसी सर्वतो भगवान्स्वयं ५५ श्लोकत्रयमिदं स्तोत्रं यः पठेन्मानवः सदा महासौख्यं भवेत्त।
स्य न भयं विद्यते क्वचित् ५६ नारद उवाच नंदस्तेभ्यो गवां लक्षं स्वर्णं दशलक्षकं सहस्रं नवरत्नानां वस्त्रलक्षं ददौ पर ५७
गतेषु द्विजमुख्येषु नंदगोपाग्नियमेव भोजयामास संपूज्य वस्त्रैर्भूषैर्मनोहरैः ५८ बहुलाश्व उवाच तृणावर्तः पूर्वकाले
कोयं सुकृतकृन्नरः परिपूर्णतमे साक्षाच्छ्रीकृष्णे लीनतां गतः ५९ पांडुदेशोद्भवो राजा सहस्राक्षः प्रतापवान् हरिभक्तो धर्म
निष्ठो यज्ञकृद्दानकृत्परः ६० रेवातटे महादिव्ये लतावेत्रसमाकुले नारीणां च सहस्रेण रमयन्विचचार ह ६१ दुर्वाससं मु
निं साक्षादागतं न ननाम ह तदा मुनिर्ददौ शापं राक्षसो भव दुर्मते ६२ पुनस्तच्चरणोः पतितो नृपेशापाद्दाह रे मुनिः श्रीकृष्णविग्र
हस्पर्शान्मुक्तिस्ते भविता नृप ६३ नारद उवाच सोपि दुर्वाससः शापात्तृणावर्तो भवद्भुवि श्रीकृष्णविग्रहस्पर्शात्परमोलम
वापदं ६४ ॥ इति श्रीमद्गर्गाचार्यसंहितायां गोलोकखंडे शकटासुरतृणावर्तमोक्षो नाम चतुर्दशोऽध्यायः १४ ॥ नारद
उवाच प्रेंखे वेह्ररित्कनकरत्नमये शयानं श्यामं शिशुं जनमनोहरमंदहासं दृश्यानि हारिमसिबिंदुधरे यशोदा लोकेव का र
पुतकजलपद्मनेत्रे १ पादं पिबंतमतिचंचलमद्भुतांगं वक्रैर्विनीलघनकोमलकेशबंधैः श्रीयंत्रकेशरनखस्फुरदहृदं
चंद्रं तलालयं स्तति कृष्णस्मदमाप गोपी २ बालस्य पीतपयसो न्दपजृंभतः स्यात्तत्ता कृतं च वदने सकलं विराजं माताद्भुतो
दियमुखैः प्रयुतं च सर्वं दृष्ट्वा परं भयमवाप निमीलिताक्षी ३ राजन्परस्य परिपूर्णतमस्य साक्षात्कृष्णस्य विश्वमखिलं कप ३३

1569

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1570

टेन मोही नष्टस्मृती पुनरभूत्स्वस्थस्ते हृतानी किं वर्णयामि सुतपो बहु नंदपत्न्याः ४ बहुलाश्व उवाच नंदो यशोदया सार्द्धं।
किं चकार तपो महत् । येन श्रीकृष्णचंद्रोपि पुत्रीभूतो बभूव ह ५ नारद उवाच अष्टानां वै वसूनां च द्रोणो मुख्योथ रापतिः ध्रुव न
पत्न्यो विष्णुभक्तो देवराज्यं चकार ह एकदा पुत्रकांक्षी च ब्रह्मणा नोदितो नृप मंदराद्रिं गतस्तत्र धरया भार्यया सह ७ वल्मीका
न्निर्गतो द्रोणो धरया भार्यया सह नत्वा विधिं च संपूज्य हर्षितः प्राह तं प्रभुं ८ द्रोण उवाच परिपूर्णतमे कृष्णे पुत्रीभूते जनार्द
ने भक्तिः स्यादावयोः स्फीतां वदंति प्रेमलक्षणां ९ ययांजसा तरंतीह दुस्तरं भवसागरं नान्यं वरं वांछितं स्यादावयोस्तपतोर्वि
धे ११ ब्रह्मोवाच युवाभ्यां याचितं यन्मे दुर्घटं दुर्लभं वरं तथापि भूयात्सफलं युवयोरन्यजन्मनि १३ नारद उवाच द्रोणो नंदो
भवद्भूमौ यशोदासीद्धरा स्मृता कृष्णो ब्रह्मवचः कर्तुं प्राप्तो घोषे पितुः पुरात् १४ सुधारसाढ्यं रमिष्टं श्रीकृष्णचरितं शुभं गंधमा
दनशृंगे वै नारायणमुखाच्छ्रुतं १५ कृपया व कृतार्थोहं नरनारायणस्य च मया तथ्यं च कथितं किं भूयः श्रोतुमिच्छसि १६
बहुलाश्व उवाच नंदगेहे हरिः साक्षाच्छिशुरूपः सनातनः किं चकार बलेनापि तन्मे ब्रूहि महामुने १७ नारद उवाच एकदाशि
ष्यसहितो गर्गाचार्यो महामुनिः शौरिणा नोदितः साक्षादाययौ नंदमंदिरे १८ नंदः संपूज्य विधिवत्पाद्याद्यैर्मुनिसत्तमं ततः प्रदक्षि
णीकृत्य साष्टांगं प्रणनाम ह १९ नंद उवाच अद्य नः पितरो देवाः संतुष्टा अग्नयश्च नः पवित्रं मंदिरं जातं युष्मच्चरणरेणुभिः २०
मत्पुत्रनामकरणं कुरु द्विज महामुने पुण्यैस्तीर्थैः स्फुटं प्राप्यं भवदागमने प्रभो २१ गर्ग उवाच ते पुत्रनामकरणं करिष्यामि
न संशयः पूर्ववार्तां गदिष्यामि गच्छ नंद रहःस्थले २२ नारद उवाच उत्थाय गर्गो नंदेन बालाभ्यां च यशोदया एकांते गोव्रजे ग
त्वा तयोर्नाम चकार ह २३ संपूज्य गणनाथादीन् ग्रहान्संशोध्य यत्नतः नंदं प्राह प्रसन्नांगो गर्गाचार्यो महामुनिः २४ गर्ग उवा
च रोहिणीनंदनस्यास्य नामोच्चारं शृणुष्व नः रमंते योगिनो ह्यस्मिन्सर्वत्र रमतीति वा २५ गुणैश्च रमयन्भक्त्या तेन रामं विदुः प
रे गर्भसंकर्षणात्तस्य संकर्षण इति स्मृतः २६ सर्वावशेषं यं शेषं बलाधिक्याद्बलं विदुः स्वपुत्रस्यापि नामानि शृणु नंद पते व्रतः २७

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्ग॰ अथ श्रीणि पवित्राणि जगतां मंगलानि च ककारः कमलाकांतः ऋकारो राम इत्यपि षकारः षड्गुणपतिः श्वेतद्वीपनिवासकृत्
गो॰ णकारो नारसिंहोयमकारो ह्यक्षरोग्निभुक् १९ विसर्गो च तथा ह्येतौ नरनारायणावृषी संप्रलीना अथ षट् पूर्णो यस्मिन्छुद्धे
३५ महामुनि २० परिपूर्णतमे साक्षात्तेन कृष्णः प्रकीर्तितः शुक्लो रक्तस्तथा पीतो वर्णोस्यानुयुगं धृतः २१ द्वापरांते कलेरादौ वा
लो यं कृष्णतां गतः तस्मात्कृष्ण इति ख्यातो नाम्नायं नंदनंदनः २२ वसवश्चेंद्रियाणीति तद्देवाश्चित एव हि तस्मिन्यश्चेष्टते सो
पि वासुदेव इति स्मृतः २३ वृषभानुसुता राधा या जाता कीर्तिमंदिरे तस्याः पतिरयं साक्षात्तेन राधापतिः स्मृतः २४ परिपूर्णतम
स्साक्षाच्छ्रीकृष्णो भगवान्स्वयं असंख्यब्रह्मांडपतिर्गोलोके धाम्नि राजते २५ सोयं तव शिशुर्जातो भारावतारणाय च कंसा
दीनां वधार्थाय भक्तानां रक्षणाय च अनंतान्यस्य नामानि वेदगुह्यानि संति ते लीलाभिश्च भविष्यंति तत्कर्मसु न विस्मयः २७
अहो भाग्यं तवेनंद साक्षाच्छ्रीपुरुषोत्तमः तव गृहे वर्तमानो येषां शिष्यरूपः परात्परः २८ नारदउवाच इत्युक्त्वाथ गते गर्गे स्वात्मा
नं पूर्णमाशिषं मेने प्रमुदितः पत्न्या नंदराजो महामतिः २९ अथ गर्गो ज्ञानिवरो ज्ञानिदो मुनिसत्तमः कालिंदीतीर शोभाढ्यं
वृषभानपुरं गतः ३० वृक्षैणशोभितं विप्रं द्वितीयमिव वासवं ददृशे नरराजेंद्रं साक्षाद्धर्मराजमिव स्थितं ३१ तेजसा द्योतितदि
शं साक्षात्सूर्यमिवापरं पुलकीमेखलायुक्तं द्वितीयमिव पद्मजं ३२ शोभितं शुक्लवासोभिर्देवं विष्णुमिव स्थितं तं दृष्ट्वा
निशाहृत्ले सहसोत्थाय सादरं ३३ प्रणम्य शिरसा सद्यः सन्मुखो भूत्वा कृतांजलिः मुनिं च पीठके स्थाप्य पाद्याद्यैरुपचारवित् ३४
पूजयामास विधिवच्छ्रीगर्गं ज्ञानिनेवरं ततः प्रदक्षिणीकृत्य वृषभानुवरो महान् ३५ वृषभानुरुवाच संतां पर्यटनं शांतं गृ
हिणां शांतये स्मृतं नृणामंतस्तमोहारी साधुरेव न भास्करः ३६ तीर्थीभूता वयं गोपा ज्ञाना त्वद्दर्शनात्प्रभो तीर्थानि तीर्थी कु
र्वंति त्वादृशाः साधवः क्षितौ ३७ हे प्रभो राधिका नाम कन्या मे मंगलायना कस्मै वराय दातव्या वद त्वं मे सुनिश्चितं ३८ त्वं पश्यसि
त्रिकं च त्रिलोकीं दिव्यदर्शनः वरो नयासमो यो वै तस्मै दास्यामि कन्यकां ३९ नारदउवाच हस्तं गृहीत्वा श्रीगर्गो वृषभानुं ३५

गर्गं. महामुनिः जगाम यमुनातीरं निर्जने सुंदरस्थले ५० कालिंदीजलकल्लोलकोलाहलसमाकुले तत्रोपविश्य गोपेशं शुश्रुवानी
गो. न्दुः शास्त्रधर्मवित् ५१ गर्ग उवाच हे गोपराज नमाख्यातं कथनीयं च न त्वया परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्स्वयं ५२ अ
३९ संख्यब्रह्मांडपतिर्गोलोके शः परात्परः तस्मात्परो वरो नास्ति जातो नंदगृहे पतिः ५३ वृषभानुरुवाच अहो भाग्यमहो भाग्यं।
नंदस्यापि महामुने श्रीकृष्णस्यावतारस्य सर्वं वद कारणं ५४ गर्ग उवाच भुवो भारावतारार्थं कंसादीनां वधाय च ब्रह्म। ना४
णा प्रार्थितः कृष्णो बभूव जगतीतले ५५ श्रीकृष्णपट्टराज्ञी या गोलोके राधिकाभिधा त्वद्गृहे सापि संजाता त्वं न जानासि तां परां ५९
नारद उवाच तदा प्रहर्षितो गोपो वृषभानुः सुविस्मितः कलावतीं समाहूय तया सार्द्धं विचार्य च ५७ राधाकृष्णानुभावं च तत्
त्वा गोपवरः परः आनंदाश्रुकलाकंठः पुनराह महामुनिं ५८ वृषभानुरुवाच अहं दास्यामि हे ब्रह्मन्कन्यां कमललोचनां व
यायं यथा दृष्टा तामेव पात्रार्थं यदूद्वहे ५९ गर्ग उवाच अहं न कारयिष्यामि विवाहमनयोर्नृप तयोर्विवाहो भविता भांडीरे का
रयिष्यति ६० तस्माद्राधां गोपवर विद्धि ह्यर्धांगीं परस्य च लोकचूडामणेः साक्षाद्राज्ञीं गोलोकमंदिरे ६१ यूयं सर्वेऽपि गोपाला
गोलोकादागता भुवि तथा गोप्यो गोलोकात्ता गोलोके राधिकेच्छया ६३ यद्दर्शनं दुर्लभमेव दुर्घटं देवैश्च यज्ञैर्नरजन्मभिः
किमु सविग्रहां तां तव मंदिरांगणे लसंति गुप्तां व्रजगोपगोपिकाः ६४ नारद उवाच तदा च विस्मितो राजन्दंपती हर्षितौ परं
राधाकृष्णप्रभावं तं ज्ञात्वा श्रीगर्गसूक्ततः ६५ दंपती ऊचतुः राधाशब्दस्य हे ब्रह्मन्व्याख्यां न वद तत्त्वतः त्वत्तो न संशयच्छेत्ता।
कोपि भूमौ महामुने ६६ गर्ग उवाच सामवेदस्य भावार्थं गंधमादनपर्वते शिष्येणापि मया तत्र नारायणमुखाच्छ्रुतं ६७ र
मपात रकारः स्यादाकारस्त्वादिगोपिका धकारो धरया साक्षादाकारो विरजा नदी ६८ श्रीकृष्णस्य परस्यापि चतुर्धा तेजसोभवन्
लीलाभूः श्रीश्च विरजा चतस्रः पत्न्य एव हि ६९ संप्रलीनाश्च ताः सर्वा राधायां कुंजमंदिरे परिपूर्णतमां राधां तस्मादाहुर्मनीषि ३९
णः ७० राधाकृष्णेति हे गोप ये जपंति पुनः पुनः चतुः पदार्थं किं तेषां साक्षात्कृष्णोपि लभ्यते ७१ नारद उवाच तदाति विस्मितो रा

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्ग॰ गो॰ ३७

जन्म वृषभानुः प्रियायुतः । राधाकृष्णप्रभावं तं ज्ञात्वा नंदमयो ह्यभूत् ॥ २२ ॥ इत्थं गर्गो ज्ञानिवरः पूजितो वृषभानुना । जगाम स्व
गृहं साक्षान्मुनींद्रः सर्ववित्कविः ॥ २३ ॥ इति श्रीमद्गर्गाचार्यसंहितां गोलोकखंडे नारदबहुलाश्वसंवादे विश्वरूपदर्शनं नंद
पत्न्या श्रीकृष्णनामकरणं पंचदशोऽध्यायः ॥ १५ ॥ नारद उवाच ॥ गाश्चारयन्नंदनमंकदेशे सं
लालयन् दूरतरं सकाशात् । कलिंदजातीरसमीरकंपितं नंदोपि भांडीरवनं जगाम ॥ १ ॥ कृष्णेच्छया वेगतरोथवातो घनैरभू
न्मेदुरमंबरं च । तमालनीपद्रुमपल्लवैश्च पतद्भिरेतद्भिरतीव भीकैः ॥ २ ॥ तदांधकारे महति प्रजाते बाले रुदत्यंकगते तिभीते । नंदो
भयं प्राप शिशुं स बिभ्रद्धरिं परेशं शरणं जगाम ॥ ३ ॥ तदैव कोट्यर्कसमूहदीप्तिरागच्छती वाचलती दिशासु । बभूव तस्यां वृषभानुपु
त्रीं ददर्श राधां नवनंदराजः ॥ ४ ॥ कोटींदुबिंबद्युतिमादधानां नीलांबरं सुंदरमादिवर्णं । मंजीरधीरध्वनिनूपुराणामाबिभ्रतीं शब्दम
तीव मंजु ॥ ५ ॥ कांचीकलाकंकणशब्दमिश्रां हारांगुलीयांगदविस्फुरंतीं । श्रीनासिकामौक्तिकहेमविंदुभिः श्रीकंठचूडामणिकुंड
लाढ्यां ॥ ६ ॥ तत्तेजसा धर्षित आशु नंदो नत्वाथ तामाह कृतांजलिः सन् । अयं तु साक्षात्पुरुषोत्तमस्त्वं प्रियासि मुख्यासि सदैव रा
धे । गुप्तं त्विदं गर्गमुखेन वेद्मि गृहाण राधे निजनाथमंकात् । एनं गृहे प्रापय मेघभीतं वदामि चेत्थं प्रकृतेर्गुणाढ्या ॥ ८ ॥ नमामि
तुभ्यं भुवि रक्ष मां त्वं यथेप्सितं सर्वजनैर्दुरापं । राधोवाच । अहं प्रसन्ना तव भक्तिभावान्मद्दर्शनं दुर्लभमेव नंद ॥ ९ ॥ नंद उवाच । य
दि प्रसन्नासि तदा भवेन्मे भक्तिर्दृढा कौ तु वयोः पदाब्जे । सतां च भक्तिस्तव भक्तिभाजां संगं सदा मे युगुगे युगे च ॥ १० ॥ नारद उवाच ॥
तथास्तु चोक्त्वाथ हरिं कराभ्यां जग्राह राधा निजनाथमंकात् । गते च नंदे प्रणते व्रजेशे तदा हि भांडीरवनं जगाम ॥ ११ ॥ गोलोकलो
काच्च पुरा समागता भूमिर्निजं स्वं वपुरादधाना । या पद्मरागादिविचित्रवर्णा बभूव सा तत्क्षणमेव सर्वं ॥ १२ ॥ वृंदावनं दिव्यवपुर्दधा
नं वृक्षैर्वरैः कामदुघैः सहैव । कलिंदपुत्री च सुवर्णसौधैः श्रीरत्नसोपानमयी बभूव ॥ १३ ॥ गोवर्द्धनो रत्नशिलामयोभूत्स्वर्णशृं
गैः परितः स्फुरद्भिः । मत्तालिभिर्निर्मलसुंदरीभिर्दरीभिरुच्चांगकरी विराजन् ॥ १४ ॥ तदा निकुंजोपि निजं वपुर्दधत्सभायुतं प्रांग । ३७

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्ग॰ णादिव्यमंडपं वसंतमाधुर्यधुरं मधुव्रतैः मयूरपारावतकोकिलध्वनि १५ सुवर्णरत्नादिविचित्रवेदिकं लसत्पतत्पताकावलिभिर्वि
गो॰ राजितं स्फुरत्स्फुरद्भिर्भ्रमरावलीध्वनैर्विचर्चितं कांचनवारुपंकजैः १६ तदैव साक्षात्पुरुषोत्तमोत्तमो बभूव कैशोरवपुर्घनप्रभुः
३८ पीतांबरः कौस्तुभरत्नभूषणो वंशीधरो मन्मथराशिमोहनः १७ भुजेन संगृह्य हसन्प्रियां हरिर्जगाम मध्ये सुविवाहमंडपं वि
वाहसंभारयुतः समेखलं सदर्भमद्वारिघटादिमंडपं १८ तत्रैव सिंहासनउत्तमे वरे परस्परं संमिलितौ विरेजतुः परं ब्रुवंतौ मधुरं
च दंपती स्फुरद्घनौ वै च तडिद्घनाविव २० तदांबराद्देववरो विधिः प्रभुः समागतस्तत्र परस्य सन्मुखे नत्वा तदंघ्री उशती गिरा
भिः कृतांजलिर्ध्यानरुचतुर्मुखो जगौ २१ ब्रह्मोवाच अनादिमाद्यं पुरुषोत्तमोत्तमं श्रीकृष्णचंद्रं निजभक्तवत्सलं स्वयं त्वसंख्यांडप
रात्परं शश्वद्राधापतिं त्वां शरणं व्रजाम्यहं २२ गोलोकलोकस्त्वमतीव लीलो लीलावतीयं निजलोकलीला वैकुंठनाथोसि यदा त
मेव लक्ष्मीस्तदेयं वृषभानुजा हि २३ त्वं रामचंद्रो जनकात्मजेयं भूमौ हरिस्त्वं कमलालयेयं यज्ञावतारोसि यदा तदीयं श्रीर्द
क्षिणा स्त्रीप्रतिपत्निमुख्या २४ त्वं नारसिंहोसि रमा हृदीयं नारायणस्त्वं च नरेण युक्तः तदा त्वियं शांतिरतीव साक्षाच्छायेव याता च तवा
नुरूपा २५ त्वं ब्रह्म चेयं प्रकृतिस्तटस्था कालो यदेमां च विदुः प्रधानं महान्यदा त्वं जगदंकुरोसि राधा तदेयं सगुणा च माया २६ यदां
तरात्मा विदितश्चतुर्भिस्तदा त्वियं लक्षणरूपवृत्तिः यदा विराड्देहधरस्त्वमेवं तदाखिलं वा भुवि धारणेयं २७ श्यामं च गौरं विदितं
द्विधा महस्त्वं वै वसाक्षात्पुरुषोत्तमोत्तम गोलोकधामाधिपतिं परेशं परात्परं त्वां शरणं प्रपद्ये २८ सदा पठेद्यो युगलस्तवं परं गो
लोकधामप्रवरं प्रयाति सः इहैव चौदार्यसमृद्धिसिद्धयो भवंति तस्यापि निसर्गतः पुनः २९ यदा युवां प्रीतियुतौ च दंपती परात्प
रौ तावनुरूपरूपिणौ तथापि लोकव्यवहारसंग्रहाद्विधिं विवाहस्य तु कारयाम्यहं ३० नारद उवाच तदा स उत्थाय विधिर्हुता
शनं प्रज्वाल्य कुंडे स्थितयोस्तयोः पुरः श्रुतेः करग्राहविधिं विधानतो विधाय धाता समवस्थितो भवत् ३१ स वाहयामास हरिं च
राधिकां परं च संस्थाप्य हरेः करं पुनः श्रीराधिकायाः किल पृष्ठदेशके संस्थाप्य मंत्रांश्च विधिः प्रपाठयन् ३२ राधाकराभ्यां प्रददौ ३८

1574

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1575

गर्ग० वनमालिकां किंजल्किनीं कृष्णगले ललिताद्दिनी करे कराभ्यां वृषभानुजा गले ततस्तु वह्निं प्रणमय्य वेदवित् ३४ सुवासयामास
गो० सुपीठयोस्तौ कृतांजली मौनयुतौ पितामहः तौ पाठयामास च पंचमंत्रकं समर्प्य राधां च पितेव कन्यकां ३५ पुष्पाणि देवा ववृषुस्त
३९ दा पुनर्विद्याधरीभिर्ननृतुः सुरांगनाः गंधर्वविद्याधरचारणाः कलं सकिन्नराः कृष्णसुमंगलं जगुः ३६ मृदंगवीणामुरुयष्टिवेणु
वः शंखानकाडुंडुभयः सतालकाः नेदुर्मुहुर्देववरैर्दिविस्थितैर्जयेति भूम्यंगलशब्दयुक्तकैः ३७ उवाच तत्रैव विधिं हरिः स्वयं यथे
प्सितं त्वं वद विप्र दक्षिणां तदा हरिं प्राह विधिः प्रभो मे देहि त्वदंघ्र्योर्निजभक्तिदक्षिणां ३८ तथास्तु वाक्यं वदतो विधेर्हरेः श्रीराधि
कायाश्च पदद्वयं शुभं ननाम कराभ्यां शिरसा पुनः पुनर्जगाम सदेहः प्रणतः प्रहर्षितः ३९ ततो निकुंजेषु चलन्विधात्रे दिव्यं मनोज्ञं प्रिय।
यापदं च जगाम कृष्णः प्रहसन्नात्मा कृष्णो नदन्मत्तक्रमुकं च राधा ४० ततः करेणापि करं प्रियायाः हरिर्गृहीत्वा प्रचचाल कुंजे जगा
म जल्पन्मधुरं प्रपश्यन् वृंदावनं श्रीयमुनालताश्च ४१ श्रीमल्लताकुंजनिकुंजमध्ये विलीयमाने प्रहसंतमेव विलोक्यशान्त्वांतरितं
च राधा जगाद पीतांबरमाव्रजंती ४२ दृष्ट्वा च राधा हरिहस्तपद्मात् कंकारमेवं प्रतिकुर्वती कौ निलीयमाना यमुनानिकुंजेषु नद्रे।
जंती हरिहस्तमाज्ञात् ४३ यथा तमालः कलधौतवल्या घनो यथा चंचलया च कान्तिः नीलोद्रिराजो निकषाश्मखन्या श्रीराधया स।
स्तनपारमाणा ४४ श्रीरासरंगे जनवर्जिते परे रेमे हरो रासरसेन राधया वृंदावने भृंगमयूरकोकिलैर्हंसैश्चरन्सेवरती वरः परं ४५
श्रीराधया कृष्णहरिर्गणात्मा ननर्त गोवर्द्धनकंदरासु मतालिपुष्पद्रुमवल्लिभिः सरोभिर्विराजितासु द्युतिमल्लतासु ४६ चचार कृष्णो
यमुनां समेत्य वरं विहारं वृषभानुपुत्र्या राधाकराकृष्टदलं स्वपद्मं धावन्गृहीत्वा यमुनाजलेषु ४७ राधा हरेः पीतपटं च वंशी
वेत्रं गृहीत्वा सहसा हसंती देहीति वंशीं वदतो हरेश्च जगाद राधा कमलं तु देहि ४८ तस्मै ददौ देवरोपि पद्मं राधा ददौ पीतपटं च वं
शीं वेत्रं च तस्मै हरये तयोः पुनर्बभूव लीला यमुनातटेषु ४९ ततश्च भांडीरवटे प्रियायुतश्चकार शृंगारमलं मनोज्ञं पत्रावलीया।
वककज्जलाद्यैः पुष्पैः स्वरत्नैर्व्रजगोपरत्नैः ५० हरेश्च शृंगारमलं प्रकर्तुं समुद्यता तत्र यदा हि राधा तदैव कृष्णस्तु बभूव बालो वि ३९

व

CC0. Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्ग· हायकैर्यशोरवपुः स्वयंहरिः ५१ नंदेन दत्तं शिशुमेव यावद्यशोभूमौ लुठंतं प्रहदंतमाभयात् हरिंविलोक्याशु गृहोदराधिकाततनोषि
गो· मायां तु कथं हरे मयि ५२ इत्थं हरेर्नी सहसा विषण्णा माकाशवाग्गाह न दैव राधां शोचं तु राधे इहमा कुरु त्वं मनोरथस्ते भविता
५० हि पश्चात् ५३ श्रुत्वाथ राधा हरिमाहरिं गृहीत्वा गता प्रगोहे व्रजराजपत्न्याः दत्वाथ बालं किल नंदपत्न्या सुवाच दत्तं पथि नोच भर्त्रा ५४
उवाच राधां नृपनंदगेहिनी धन्यासि राधे वृषभानुकन्यके त्वया शिशुर्मे पथि रक्षितो भयान्मेघावृते व्योम्नि भयातुरे वने ५५ संपू
जिता सद्गुणश्लाघिता च सा संनंदिता सा वृषभानुपुत्री यदा त्वनुज्ञाप्य यशोमतीं सा शनैः स्वगेहं निजमाजगाम ५६ इत्थं हरेर्गुप्त
कथा च वर्णिता राधाविवाहस्य सुमंगला हृता श्रुत्वा च ये वै पठिता च ध्यायिता तान्स्पृश्यंहो न कदाप्यशंति ५७ ॥ इति श्रीमद्ग
र्गाचार्यसंहितायां गोलोकखंडे श्रीराधिकाविवाहवर्णनं नाम षोडशोऽध्यायः १६ ॥ नारद उवाच शृणु बालौ रामकृष्णौ गौर
श्यामौ मनोहरौ लीलया चक्रतुर्लोके सुंदरं नंदमंदिरे १ रिंगमाणौ च जानुभ्यां पाणिभ्यां सह मैथिल व्रजतास्तेन कालेन व्रजवं
तौ मधुरं व्रजे २ यशोदया च रोहिण्या लालितौ योषितौ शिशू कदा विनिर्गतावंकात्क्वचिदंकं समाश्रितौ ३ मंजीरकिंकिणीराव
कुर्वंतौ ताविनस्ततः त्रिलोकीं मोहयंतौ द्वौ मायाबालकविग्रहौ ४ क्रीडंतमादाय शिशुं यशोदा जिरे लुठंतं व्रजबालकेषु नद्ध।
लिलेपातद्धूतधूसरांगं च केवलं शोभमातलान ५ जानुद्वयाभ्यां च समं कराभ्यां पुनर्व्रजन्त्यांगणमेत्य कृष्णः माङ्कदेशोऽ
नरा व्रजन्सखे व भौ व्रजे के स्फुरि बाललीलः ६ तं सर्वतो हेमनवित्रयुक्तं पीतांबरं कंचुकमादधानं स्फुरत्स्वभं रत्नमयं च मौलिं.
दृष्ट्वा सुतं शायसुदं यशोदा ७ बालमुकुंदमतिसुंदरबालकेलिं दृष्ट्वा परं प्रमदमापुरतीव गोप्यः श्रीनंदराजव्रजमेत्य गृहं विहा
य सर्वास्तु विस्मृतगृहाः सुखविग्रहास्ताः ८ श्रीनंदराजगृहकृत्रिमसिंहरूपं दृष्ट्वा व्रजन्स्खलितरवत्तूपभीरुवाचः नीता च तं निज
सुतं गृहमाव्रजंती गोप्यो व्रजे सहृणया त्व वदन्यशोदां ९ गोप्य ऊचुः क्रीडार्थं चपलेनेमावहिः कारयांगणात् बालकेलिंदु
रथ सुखं कांकपदं तय रंगभे १० ऊहेंदंतद्वयं जातं पूर्वं मातुलदोषदं अस्यापि मातुलो नास्ति ते सुतस्य यशोमति ११ तस्माद्दानं नु ५०

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1577

ग॰गी॰ कर्तव्यं विघ्नानां नाशहेतवे गोविप्रसाधूनां छंदसां पूजनं तथा १२ नारदउवाच तदायशोदारोहिण्यौ सुतकल्याणहेतवे
गो॰ वसुरत्नवान्नानां नित्यं दानं प्रचक्रतुः अथ व्रजे रामकृष्णौ वालसिंहावलोकितौ पद्भ्यां चलंतौ घोषेषु वर्द्धमानौ वभूवतुः १४
४१ श्रीदामसबलाद्यैश्च वयस्यैर्व्रजवालकैः यथा नासिकनेत्राभ्रे लुठंतौ सत्कुतूहलौ १५ कालिंदीपुपवने पुष्पामैस्तमालैः सघनैर्हृते
करंवकुंजशोभाढ्ये चेरतू रामकेशवौ १६ जनयन्तौ गोपीनामानंदं वाललीलया वयस्यैश्चोरयामास नवनीतं हृतं हरिः १७
एकदा सुयनंदस्य पत्नी नाम्ना प्रभावती श्रीनंदमंदिरं प्राप्ता यशोदां प्राह गोपिका १८ प्रभावत्युवाच नवनीतं हृतं तेद्यस्य दधितक्रं
यशोमति श्रावयोर्भेदरहितं तव सुतात् ममभवत् १९ नाहं वदामि वा तेन त्वत्सुतेयं कृतापि शिक्षिते शिक्षां करोषि न सुते नवनीतमु।
क्षिपस्वतः २० यदा मया कृता शिक्षा तदा दृष्टस्तवांगजः गालीप्रदानं दत्वायं द्रवति प्रांगणान्मम २१ व्रजाधीशस्य पुत्रोयं भूत्वा स्तेयं
समाचरेत् न मया कथितं किंचिद्यशोदे तव गौरवात् २२ नारदउवाच श्रुत्वा प्रभावतीवाक्यं यशोदा नंदगेहिनी वालं निर्भर्त्स्य
तामाह सान्त्वप्रेमपरायणा २३ यशोदोवाच गवां कोटिर्गृहे मे स्ति गोरसैराद्दिता वला नजाने दधि महालोनाम्नि सोच कदाचन २४
भ्रनेन मुषितं गव्यं तत्समेतं गृहाण मे तेशिशोर्मेशिशोर्भेदो नास्ति किंचित् प्रभावति २५ नवनीतं मुषं वै नमत्रतौ स्थानयिष्यति त
दाशिक्षां करिष्यामि भर्त्सनं वधनं तथा २६ नारदउवाच श्रुत्वा वाक्यं तदा गोपी प्रसन्ना स्वगृहमागता एकदा दधिचौर्यार्थं कृष्ण।
स्तस्या गृहं गतः २७ वयस्यैर्वालकैः सार्द्धं पार्श्वं कृत्वोरहस्यच हस्तादस्तेत्स गृहीत्वा शनैः कृष्णो विवेश ह २८ शिक्यस्थं गोरसं ह
ष्ट्वा हस्ताग्राह्यो हरिः स्वयं उलूखले पीठके च गोयान् स्थाप्यारुरोह तं ३० भग्नभांडात्स्वयं गव्यं वहद्भूमौ मनोहरं जवात्स सवलो मर्कैः
वालकैः सहमाधवः ३१ भग्नभांडस्वनं श्रुत्वा प्राप्ता गोपी प्रभावती पलायितेषु वालेषु जग्राह श्रीकरं हरेः ३२ नीत्वा करधृतं भी।
रुं च गच्छंती नंदमंदिरं अग्रे नंदं स्थितं दृष्ट्वा मुखे वस्त्रं चकार ह ३३ हरिर्विचिंतयन्निस्थं मानार्दं प्रदास्यति दयारत हाल कृष्णस्वच्छं
दगतिरीश्वरः ३४ सा यशोदां समेत्याशु प्राह गोपी रुषान्विता भांडं भग्नीकृतं सर्वं मुषितं दध्यनेन वै ३५ यशोदोवाच अपवादोप ४१

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1578

गर्ग॰ हादेवोनिर्वासंकुरुमेश्वरात् पुष्पस्पृष्टकृतेवीर्येश्नस्पृष्टकृतंभवेत् ३५ जनलज्जासमायुक्ताहूरीकृत्यमुखांबरं सापिशास्वनिजं
गो॰ बालंवीक्ष्यविस्मितमानसा ३७ निपट्टस्तंकृतःशाम्नोवजसारोसिमेकरे वदंतीत्थंचततेनीतिर्निर्गतानंदमंदिरात् ३८ यशोदारो
५२ हिणीनंदोरामोगोपाश्चगोपिकाः जहसुःकथयंतस्तेहृष्णोन्यायोव्रजेमहान् ३९ भगवांस्तवहिर्वीथ्यांभूत्वाश्रीनंदनंदनः प्रहस
न्गोपिकांशाहप्रहृष्टांगश्चंचलेक्षणाः ४० श्रीभगवानुवाच पुनर्मांयदिगृह्णासिकदाचिद्यदिगोपिके तेभर्तृरूपंतनदाभविष्यामि
नसंशयः ४१ श्रीनारदउवाच श्रुत्वातुविस्मितागोपीगतागेहेषुमैथिल तदासर्वागृहेगोप्योनगृह्णंतिहरिंस्त्रियः ४२ ॥ इतिश्री
मद्गर्गसंहितायांगोलोकखंडेश्रीकृष्णबालचरित्रेदधिस्तेयवर्णनंनामसप्तदशोध्यायः १७ ॥ नारदउवाच गोपीगृहेषु
विचरन्नवनीतचौरः श्यामोमनोहरवपुर्नवकंजनेत्रः श्रीबालवृंदबलवित्रगतोनराणांचित्तंहरंश्चिवबलेनचकारशोभां १ श्रीनंद
नंदनमतीवबलंगृहीत्वारोहंनिधायपुरुहूतनवनंदगोपाः सत्कुंडकेमुसनतंपरिलालयंतःकृष्णेनकूजितसुरवोनजयन्नमंतः १
राजोवाच नवोपनंदनामानिवदंदेवऋषेमम अहोभाग्यंतयेषांवैतेपूर्वकइहागताः २ यथावृषभानूनांकर्माणिमंगलानि
च नारदउवाच गयश्चविमलःश्रीशःश्रीधरोमंगलायनः ४ मंगलोरंगवल्लीशोरंगोजिद्देवतायनः नवनंदाश्चकथितावभूवुर्गो।
कुलेव्रजे ५ धीलदोशोप्रिसुभकृशांवःश्रीकरोगोपतिःश्रुतः व्रजेशःपावनःशांतःउपनंदाःप्रकीर्तिताः ६ नीतिविन्मार्गदःशुक्लः
पतंगोदिव्यवाहनः गोपेष्टश्चव्रजेराजन्ज्ञातेषड्वृषभानवः ७ गोलोककृष्णचंद्रस्यनिकुंजद्वारिमास्थिताः वेत्रहस्ताःश्यामलांगा
नवनंदाश्चतेस्मृताः ८ निकुंजेकोटिशोगावस्तासांपालनतत्पराः वंशीमयूरपत्राढ्याउपनंदाश्चतेस्मृताः ९ निकुंजदुर्गरत्नाद्यां
दंडपाशधराःस्थिताः षड्द्वारमास्थिताःषड्वैकथितावृषभानवः १० श्रीकृष्णस्येच्छयासर्वेगोलोकादागताभुवि तेषांप्रभावंवक्तुं
हिनसमर्थश्चतुर्मुखः ११ अहंकिंतुवदिष्यामितेषांभाग्यंमहोदयं तेषामारोहमास्थायबालकेलिर्विभोर्हरिः १२ एकदायमुनातीरे
रेमत्कृष्णेनावलीढिता यशोदांबालकाःप्राहुरत्तिवालोमृदंतव १३ बलभद्रेवदतितदासानंदगेहिनी करेगृहीत्वातंसुतंभीरू ५२

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्ग॰ नेत्रमुवाच ह १४ यशोदोवाच कस्मात्त्वं दंभक्षितवान्‌ रहोत्र भवान्वयस्याश्च वदंति सत्यात्‌ ज्यायान्बलोयं वदति प्रसिद्धं मायवमर्थेन
गो जहाति नेहं १५ श्रीभगवानुवाच सर्वे मृषावादरता व्रजार्भका मातर्मयाक्तापि न मृत्स्न भक्षिता यदा समीचीनमनेन वाक्यं तदा
४३ मुखं पश्य मदीयमंजसा १६ श्रीनारद उवाच श्रुत्वा गोपी बालकस्य पश्यन्ती सुंदरं शुभं प्रसारितं तद्ददृशे व्रह्माण्डं रचितं गुणैः १७
समुद्रद्वीपान्सनगान्सिंधून्सखंडान्सगिरीन्नृपान्‌ आव्रह्मलोकांस्ती गोपी स्वान्तामिः सव्रजैः सह १८ दृष्ट्वा निमीलिताक्षी सा भूत्वा श्री
यमुनातटे बालो यं मे हरिः साक्षादिति ज्ञानमयी ह्यभूत्‌ १९ तदा जहास श्रीकृष्णो मोहयन्निव मायया यशोदा वै भवं दृष्ट्वा न सस्मार
गतस्मृतिः २० ॥ इति श्रीमद्गर्गाचार्यसंहितायां गोलोकखंडे व्रह्माण्डदर्शनं नामाष्टादशोध्यायः १८ ॥ श्रीनारद उवाच एकदा गो
कुले गोप्यो ममंथुर्दधि सर्वतः गृहे गृहे प्रगायंत्यो गोपालचरितं परं १ यशोदापि समुत्थाय प्रातः श्रीनंदनंदनं भांडे रोप्य विनिक्षि
प्य ममंथ दधि सुंदरी २ मंजीररावं संकुर्वन्बालः पार्श्वमथ भ्रमन्‌ स्तनादि किंकिणीसंघझंकारं कारयन्मृदुः ४ हैयंगवीनं
सततं नवीनं याचन्स मातर्मधुरं ब्रुवन्सः आदाय हस्तेषु मसतं रुषा सधीर्विभेद कृष्णो दधिमंथपात्रं ५ पलायमानं स्वसुतं य
शोदा पृथावती आपतद्धस्तमात्रात्‌ योगीश्वराणामपि यो दुरापः कथं स मातुर्ग्रहणं प्रयाति ६ तथापि भक्तेषु च भक्तवश्यता प्रद ग्रं॰
र्शितुं श्रीहरिणा न पेषर वालं गृहीत्वा स्वसुतं यशोमती बबंध रज्ज्वाथ रुषाप्युलूखले ७ यदादायं यद्बद्धुदाम तत्तु न्यूनं त्र्यंगुलं भूत्‌। ५४
नमसौ यशोदा गुणैर्न बद्धः प्रकृतेः परो यः कथं स बद्धो भवतीह दाम्ना ८ यदा यशोदा गतवेपनेच्छा खिन्नाति खिन्नान्नपरिच्छिन्न:
मानसा आसीत्तदायं कृपया स्ववंधे स्वच्छंदयानः स्ववशोपि कृष्णः ९ एवं प्रसादो न हि वीतकर्मणां न ज्ञानिनां नाकमपि यां कृतं पु
नः मातर्यथाभून्नृप राजपुत्र तस्मात्स भक्तिं व्यधाद्भक्तिमलेन माधवः १० तदैव गोप्यस्तु समागतास्त्वरं दृष्ट्वाथ भग्नं दधिमंथभाजनं
उलूखले बद्धमतीव दामभिर्भीतं शिशुं वीक्ष्य जगुर्हृणातुराः ११ गोप्य ऊचुः भ्रसम हृदेत पात्राणि भिनत्ति सततं शिशुः तदर्थे नं।
नोवदास्यः कारुण्यान्नंदगोहिनि १२ गतव्यथेमं कुरु रोषशोदे दे व्रजेश्वरि यच्छानिर्भर्त्सितो बालस्त्वया वत्सो च हद्रतान्‌ १३ नार ४३

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

दउवाच इत्थंकृत्वायशोदायांगतायांगृहकर्मसु कर्षन्नुलूखलंकृष्णोबालैःश्रीयमुनांययौ १४ तत्रदेवमहावृक्षौपुराणौयमलार्जु
नौ तयोर्मध्येगतःकृष्णोहस्तदामोदरःप्रभुः १५ चकर्षसहसाकृष्णःतिर्यग्गतमुलूखलं कर्षणेनसमूलौद्वौपेततुर्भूमिमंडले १६
पतनेनापिशाखीभूत्वचंडौवज्रपातवत् विनिर्गतौचवृक्षाभ्यांदेवौह्यावायसोग्निवत् १७ दामोदरंपरिक्रम्यपादौस्पृष्ट्वास्वमौलिना
कृतांजलीहरिंनत्वानतौनत्वाग्रतेस्थितौ १८ देवावूचतुः आवांमुक्तौब्रह्मदंडात्त्वयस्तेचमुनदर्शनात् माभूत्तेनिजभक्तानांहेल
नंत्वावयोर्हरे १९ करुणाथिपतन्मयंजगन्मंगलशीलिने दामोदरायकृष्णायगोविंदायनमोनमः २० नारदउवाच इतिनत्वा
हरिंतौद्वौउदीच्यांचदिशंगतौ तदैवआगतःसर्वेनंदाद्याःभयकातराः २१ कथंवृक्षौप्रपतितौविनावातंव्रजार्भकाः वदताशुत।
दावालाऊचुःसर्वेव्रजौकसः २२ अनेनपतितौवृक्षौनाभ्यांद्वौपुरुषौस्थितौ एवंनत्वागतानाश्रुत्वातउदीच्यांस्फुरत्प्रभौ २३ नार
दउवाच इतिश्रुत्वावचस्तेषांनतेश्रद्दधिरेततः मुमोचनंदःस्वंबालंदाम्नाबद्धमुलूखले २४ संलालयन्स्वांकदेशेसमाघ्राय।
शिशुंनृप बहुलाश्वउवाच केनदोषेणवृक्षत्वंप्रापितौयमलार्जुनौ २५ नारदउवाच नलकूबरमणिग्रीवौराजराजसुतौपरौ
जग्मतुर्नंदनवनेमंदाकिन्यास्तटेस्थितौ २६ अप्सरोभिर्गीयमानौचेरतुर्गतवाससौ वारुणीमदिरामत्तौयुवानौद्रव्यदर्पितौ २७
कदाचिद्देवलोनाममुनींद्रोदेवपारगः नग्नौदृष्ट्वाचतावाहदुष्टशीलौगतस्मृती २८ देवलउवाच युवांवृक्षसमौदृष्टौनिर्ल
ज्जौद्रव्यदर्पितौ तस्माद्वृक्षौतुभूयास्तांवर्षाणांशतकंभुवि २९ द्वापरांतेभारतेचमाथुरेव्रजमंडले कलिंदनंदिनीतीरेम·
हावनसमीपतः ३० परिपूर्णतमंसाक्षात्कृष्णंदामोदरंहरिं गोलोकनाथंतेदृष्ट्वापूर्वरूपौभविष्यथ ३१ नारदउवाच इ
त्थंदेवलशापेनवृक्षत्वंप्रापितौनृप नलकूबरमणिग्रीवौश्रीकृष्णेनविमोचितौ ३२ ॐ इतिश्रीमद्गर्गाचार्यसंहितायांगोलो
कखंडेयमलार्जुनभंगोनामचतुर्दशोध्यायः १४ ॐ नारदउवाच एकदाकृष्णवत्सस्पर्शनार्थंपरस्यच दुर्वासामुनिशार्दूल
लव्रजमंडलमाययौ १ कालिंदीनिकटेपुण्येसैकतेरमणस्थले महावनसमीपेचकृष्णमाहददर्शह २ श्रीमन्मदनगो। ४४

CC0. Gurukul Kangri Collection, Haridwar. Digitized by S3 Foundation, USA

1581

गर्ग॰ पालंलुठंतं बालकैः सह परस्परं प्रगृह्णंतं बालकेलिमनोहरं ३ धूलिधूसरसर्वांगं वक्रकेशं दिगंबरं धावंतं बालकैः सार्द्धं
गो॰ हरिं वीक्ष्य सस्मितं ४ मुनिरुवाच यईश्वरोयंभगवान्कथं बालैर्लुठन्भुवि श्रयंतनंदपुत्रोस्तिनश्रीकृष्णः परात्परः ५ ना
४५ रदउवाच इत्थंमोहागतेतत्र दुर्वाससि महामुनौ क्रीडन्कृष्णस्तत्समीपे तदके ह्यागतः स्वयं ६ हसतस्तस्य वक्त्रे प्रविष्टः स्व
सनैर्मुवि ददर्शान्यं महालोकं सारण्यं जनवर्जितं ७ अरण्ये भ्रममेस्तत्र कुतः शामइतिब्रुवन् तदैवाजगरेणापि निगीर्णो भून्म
हामुनिः ८ ब्रह्मांडं तत्र ददृशे सलोकं सकलं परं भ्रमन्द्वीपेषु स मुनिः स्थितो भूत्पर्वते सिते १० ततस्तत्र तपवर्षाणां शतकोटि।
प्रभुं भजन् नैमित्तिकाख्ये प्रलये प्राप्ते विश्वभयंकरे ११ आगच्छंत समुद्रास्ते प्लावयंतो धरातले वहंस्तेषु च दुर्वासा नत्रायांते।
जलस्थ च १२ व्यतीते युगसाहस्रे मग्नोभूद्विगतस्मृतिः पुनर्जलेषु विचरन्नंडमन्यं ददर्श ह १३ तच्छिद्रे च प्रविष्टो सौ दिव्यांस
ष्टिंगतस्ततः तदंडमूर्द्धि लोकेषु विधेरायुः समंचरन् १४ एवं छिद्रं तत्र वीक्ष्य प्रविशन्सहरिं स्मरन् बहिर्विनिर्गतोसौद
दर्शाथ महाजले १५ तस्मिन्जले तरलदंतकोटिशो ह्यंडराशयः ततो मुनिर्जलं पश्यन्ददर्श विरजां नदीं १६ तस्याः पारं प्रगतः सा
क्षाद्गोलोकं प्रविशन्मुनिः वृंदावनं गोवर्द्धनं यमुनां पुलिनं शुभं १७ दृष्ट्वा प्रसन्नः स मुनिर्निकुंजं प्रविवेश ततः गोपगोपीगणैः।
कीर्तिं गवां कोटिभिरन्वितं १८ असंख्यकोटिमार्तंडज्योतिषां मंडले ततः दिव्ये लक्षदले पद्मे स्थितं राधापतिं हरिं १९ परिपूर्ण
तमं साक्षाच्छ्रीकृष्णं पुरुषोत्तमं असंख्यब्रह्मांडपतिं गोलोकं स ददर्श ह २० श्रीकृष्णस्यापि हसतः प्रविष्टस्तन्मुखे मुनिः पुन
र्विनिर्गतः पश्यद्बालं श्रीनंदनंदनं २१ कालिंदीनिकटे पुण्ये सैकते रमणस्थले बालकैः सहितं कृष्णं विचरंतं महावने २२ त
दा मुनिश्च दुर्वासा ज्ञात्वा कृष्णं परात्परं श्रीनंदनंदनं नत्वा नत्वा प्राह कृतांजलिः २३ मुनिरुवाच बालं नवीनशतपत्रविशाल
नेत्रं बिंबाधरं सघनमेघरुचिं मनोज्ञं मंदस्मितं मधुरसुंदरमंदयानं श्रीनंदनंदनमहं मनसा नमामि २४ मंजीरनूपुररणन्न
वरत्नकांचीश्रीहारकेसरिनखप्रतियंत्रसंघं दृष्ट्यार्तिहारिमसिबिंदुविराजमानं वंदे कलिंदतनुजातटबालकेलिं २५ पू ४५

1582

मौलिं दुर्मदराम्भुखोपरि कुंचिताग्राः केशा नवीनघननीलविभाः स्फुरंति गंडं तथावनतशिरः कृतकंपयस्य नंदात्मजाय सबला
यनमो नमस्ते २६ श्रीनंदनंदनस्तोत्रं प्रातरुत्थाय यः पठेत् तन्नेत्रगोचरो याति सानंदं नंदनंदनः २७ इति प्रणम्य श्रीकृष्णं
वीसा मुनिसत्तमः तेध्याय नृ जपन्साम गाहृदर्ण्योश्रमसुत्तमे २८ गर्ग उवाच इत्थं देवर्षिवर्येण नारदेन महात्मना कथितं कृष्ण
चरितं बहुलाश्वाय धीमते २९ मयाते कथितं ब्रह्मन् यशः कलिमलापहं चतुः पदार्थदं दिव्यं किं भूयः श्रोतुमिच्छसि ३० शौ
नक उवाच बहुलाश्वो मैथिलेंद्रः किं पप्रच्छ महामुनिं नारदं ज्ञानदं शांतं तन्मे ब्रूहि तपोधन ३१ गर्ग उवाच नारदं ज्ञानदं नत्वा
मानदो मैथिलो नृपः पुनः पप्रच्छ कृष्णस्य चरित्रं मंगलायनं ३२ बहुलाश्व उवाच श्रीकृष्णो भगवान्साक्षात्परमानंदविग्रहः
श्रुतं च कारं किं चित्रं चरित्रं वद मे प्रभो ३३ पूर्वावतारैश्चरितं कृतं नैव मंगलायनं श्रुपरं किं तत्कृष्णस्य पवित्रं किमतः परं ३४
नारद उवाच साधु साधु त्वया पृष्टं चरित्रं मंगलं हरेः तत्तेहं संप्रवक्ष्यामि हृष्टा राणिपि यच्छ्रुतं ३५ इदं गोलोकखंडं च गुह्यात्परम
मद्भुतं श्रीकृष्णेन प्रकथितं गोलोके रासमंडले ३६ निकुंजे राधिकायै च राधा मह्यं ददाविदं मया तुभ्यं श्रावितं च दत्तं सर्वा
र्थदं परं ३७ इदं पठति विप्रस्तु सर्वशास्त्रार्थगो भवेत् श्रुत्वैतच्चक्रवर्ती स्यात्क्षत्रियश्चंडविक्रमः ३८ वैश्यो निधिपतिर्भूया
च्छूद्रो मुच्येत बंधनात् निष्कलोपोपि जगति जीवन्मुक्तः स जायते ३९ यो नित्यं पठते सम्यक् भक्तिभावसमन्वितः स गच्छेत्
कृष्णचंद्रस्य गोलोकं प्रकृतेः परं ४० ॥ इति श्रीमद्गर्गाचार्यसंहितायां गोलोकखंडे नारदबहुलाश्वसंवादे भगवज्जन्मवर्णि
नं द्विससो महाप्रलयदर्शने श्रीनारदस्तोत्रवर्णनं नाम विंशोध्यायः २० ॥ समाप्तोयं गोलोकखंडः ॥ अतः परं वृंदार
ण्यखंडं भविष्यति ॥ शुभमस्तु लेखकपाठकयोः ॥ छापेखाने मित्रविलास लाहोरमें छपा प्रथमः १

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

श्रीगणेशायनमः कृष्णातीरे कोकिलाकेलिकीरे गुंजापुंजे देवपुष्पादिकुंजे कंतुशोभौ विलसबाहुवलंनौ राधाकृष्णौ मंगलं
मेभवंतौ १ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः १ नारदउवाच एकदापरवं।
वीक्ष्य नंदो नंदान्सहायकान् वृषभानूपनंदांश्च वृषभानुवरांस्तथा २ समाहूय परान्वृद्धान्सहायांस्तानुवाचह श्रीनंदराजउ
वाच किं कर्तव्यं वदतोत्पाताः संति महावने ४ श्रीनारदउवाच तेषां श्रुत्वाथ सनंदो गोपवृद्धोतिमंत्रवित् मेकेनीत्वा राम
कृष्णौ नंदराजमुवाचह ५ श्रीसनंदउवाच उत्थातव्यमितोस्माभिः सर्वैःपरिकरैःसह गंतव्यं चान्यदेशेषु यत्रोत्पाता न संति
हि ६ बालस्ते प्राणवत्कृष्णो जीवनं व्रजवासिनां व्रजेयथनंकुलेदीयो मोहनो बाललीलया ७ हावक्याशकटेनापितृणावर्तं
नवालकः शकोयंद्रुमपाते न घुत्पातः किमतःपरं तस्माद्वृंदावने सर्वैर्गंतव्यं बालकैः सह उत्पातेषु व्यतीतेषु पुनरागमनं।
कुरु ८ श्रीनंदउवाच कतिक्रोशैःविस्तृतं तद्वृंदावनं व्रजे तल्लक्षणं तत्त्वविचवद बुद्धिमतांवर ९ श्रीसनंदउवाच प्राग्
दीच्यां वर्हिषदो दक्षिणस्यां यदोः पुरात् पश्चिमायां शोणपुरात् माथुरं मंडलं विदुः १० विंशद्योजनविस्तीर्णं सार्द्धपयोजनेन।
वै माथुरं मंडलं दिव्यं व्रजमाहुर्मनीषिणः ११ मथुरायां शौरिदेहे गर्गाचार्यमुखात्श्रुतं माथुरं मंडलं दिव्यं तीर्थराजेन पूजि
तं १२ वनेभ्यस्तत्र सर्वेभ्यो वनं वृंदावनं वरं परिपूर्णतमस्यापि लीलाक्रीडं मनोहरं १३ वैकुंठाद्वापरो लोको न भूतो न भविष्य
ति एवं वृंदावनं नाम वैकुंठाद्वापरात्परं १४ यत्र गोवर्द्धनो नाम गिरिराजो विराजते कालिंदीनिकटे यत्र पुलिनं मंगलायनं १५
वृहत्सानुगिरिर्यत्र यत्र नंदीश्वरोगिरिः क्रोशानां च चतुर्विंशद्विस्तृतैः काननैर्वृतं १६ पशव्यं गोपिगोपीनां गवां सेव्यं मनोहरं
लताकुंजवृतं तद्वै वनं वृंदावनं स्मृतं १७ श्रीनंदउवाच कदा व्रजोयं सनंदन तीर्थराजेन पूजितः एतद्वेदितुमिच्छामि परं कौतू
हलं हि मे १८ श्रीसनंदउवाच शंखासुरो महादैत्यः पुरा नैमित्तिके लये स यतो ब्रह्मणः सोपि वेदश्रुत्वैदैत्यपुंगवः १९ जित्वा
देवान्ब्रह्मलोकान्नीत्वा देवानातोर्णवे गतेषु पदिवेदेषु देवानां च महीतले २० तदा साक्षाद्धरिः पूर्णो धृत्वा मात्स्यं वपुः परं नै

1583

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1584

मिलितं कलशं भो यो युयुधे तेन यज्ञराट् २१ शूलं विनिर्दय हरये शंखो दैत्यो महाबलः स चक्रेण हरिः साक्षात्तच्छूलं शतधाकरोत् २२
हरिं तताड शिरसा शंखो विस्फुरत्स्थले तस्य मूर्ध्नि प्रहारेण न चचाल परात्परः २३ तदा गदां समादाय मत्स्यरूपधरो हरिः पृष्ठे
जघान तं दैत्यं शंखरूपं महाबलं २४ गदाप्रहारव्यथितः किंचिद्व्याकुलमानसः पुनरुत्थाय सर्वेशं मुष्टिना संतताड ह २५ त
दा विष्णुः स्वचक्रेण सशृंगं तच्छिरोऽहरत् जहार कुपितः साक्षात्भगवान्कमलेक्षणः २६ जित्वा शंखं देववरैः सार्द्धं विसर्जनेश्वरं
प्रयागमेत्य सह हरिर्वेदांस्तान्ब्रह्मणे ददौ २७ यज्ञं चकार विधिवत्सर्वैर्देवगणैः सह प्रयागे च समाहूय तीर्थराजं चकार ह २८
तस्माताहृदयवदः कृतो लीलानपयवत् मुनिभानुसुते सोमिवामरैः स्तो विरेजतः २९ तदैव सर्वतीर्थानि जंबूद्वीपस्थितानि च
नीत्वा बलिं समाजग्मुस्तीर्थराजाय धीमते ३० तीर्थराजं च संपूज्य नत्वा तीर्थानि सर्वतः स्वधामानि ययुर्नंद हरौ देवे गते सति ३१
तदैव नारदः प्राप्तो मुनीन्द्रः कलहप्रियः सिंहासने राजमानं तीर्थराजमुवाच ह ३२ श्रीनारद उवाच तीर्थैः प्रपूजितस्त्वं वै तीर्थ
राज महातप त्वभ्यं च सर्वतीर्थानि शुभ्यो नीत्वा बलिं ददुः ३३ व्रजाद्वृंदावनादीनि नागतानीह ते पुरः तीर्थानां राजराजस्त्वं प्रथम
तैस्तैस्तिरः कृतः ३४ श्रीनंद उवाच इति प्रभाष्य तं साक्षात् गते देवर्षिसत्तमे तीर्थराजस्तदा क्रुद्धो हरिलोकं जगाम ह ३५ त
ता हरिं परिक्रम्य पुरःस्थितः कृतांजलिः सर्वतीर्थैः परिवृतः श्रीनाथं प्राह तीर्थराट् ३६ तीर्थराज उवाच हे देवदेव शप्तोऽहं ती
र्थराजस्त्वया कृतः बलिं ददुर्मे तीर्थानि माथुरमंडलं विना ३७ प्रथमं नैर्व्रजतीर्थैश्च नारदेन तिरस्कृतः तस्मात्तुभ्यं च कथितं प्र
प्तोऽहं तव मंदिरे ३८ श्रीभगवानुवाच यथा त्वं सर्वतीर्थानां त्वं कृतस्तीर्थराट् मया किं तथा सर्वगृहस्यापि न कृतीराट् त्वमेव हि ३९
किं तमे मंदिरे लिप्स्यसे न तत्र भाषसे कथं तीर्थराज गृहं गच्छ शृणु वाक्यं शुभं च मे ४० मथुरामंडलं साक्षात् मंडलं मे परात्प
रं लोकत्रयात्परं दिव्यं प्रलयेऽपि न संहृतं ४१ श्रीनंद उवाच इति श्रुत्वा तीर्थराजो विस्मितोऽभूत्ततः स्वयं आगत्य नत्वा संपूज्य मा
थुरं व्रजमंडले ४२ ततः प्रदक्षिणीकृत्य स्वधामगतवान्पुनः यथा या मानभंगार्थं हृदं मे तत्प्रदर्शितं ४३ मया तवाग्रे कथितं कि १

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1585

भूयः श्रोतुमिच्छसि श्रीनंदउवाच धराधामानभंगार्थ्यंके नपूर्वंप्रदर्शितं ४४ एतन्मेवदगोपेश माथुरं व्रजमंडलं श्रीसनंदउवाच
आदौ वाराहकल्पेस्मिन् हरिर्वाराहरूपधृक् ४५ रसातलात्समुद्धृत्य गां वभौ दंष्ट्रया प्रभुः गच्छंतं वारिवृंदेषु भगवंतं रमेश्वरं ४६
दंष्ट्राग्रे शोभिता पृथ्वी प्राह देवं जनार्दनं धरोवाच देवकुत्र स्थलेन्वै स्थापनं मे करिष्यसि ४७ जलपूर्णं जगत्सर्वं दृश्यते वद देवप्र
भो श्रीवाराहउवाच यद्राहृताः प्रदृश्याद्रिभवेन्मोहे गयाजले तत्रादेस्थापनं भूयान्न पश्यंती गच्छ भूरुहान् श्रीधरोवाच स्थावरा
लांतरवनाममोपरिसमाश्रिताः ४८ शून्यास्ति किं वा धरणी रहस्ययारण्यमयी श्रीसनंदउवाच वदंतीत्थं ददर्शाग्रे जले हृत्वा मनोह
रान् ५० दीव्यदृष्टीर्हरिं प्राह सर्वतो विगतस्पृहा धरोवाच देवकस्मिन्स्थले हृत्वा संति लेते सपल्लवाः ५१ इदं मनसि मे चित्रं वदयत्र
पतेप्रभो श्रीवाराहउवाच माथुरं मंडलं दिव्यं दृश्यते ग्रेनिनेविनि ५२ गोलोकभूमिसंयुक्तं प्रलयेपि न संहृतं श्रीसनंदउवाच त
तः कृत्वा विस्मिता पृथ्वी गतमाना बभूव ह तस्मान्नंद महावाहो व्रजोयं सर्वतोधिकं ५३ कृतेद व्रजमाहात्म्यं जीवन्मुक्तो भवेन्नरः
तीर्थराजात्परं विद्धि माथुरं व्रजमंडलं ५४ ॥ इति श्रीमद्गर्गाचार्यसंहितायां श्रीवृंदावनखंडे श्रीनंदसनंदसंवादे श्रीवृंदावनोयो
गवर्णनं नाम प्रथमोध्यायः १ ॥ श्रीनंदउवाच हे सनंद महाप्राज्ञ सर्वतोसि वहुश्रुतः व्रजमंडलमाहात्म्यं वदतस्ते शुभोच्छते १
गिरिर्गोवर्द्धनो नाम तस्योत्पत्तिं च मे वद कस्मादेनं गिरिवरं गिरिराजं वदंति ह २ यमुनेयं नदी साक्षात्कस्माल्लोकात्समागता त
माहात्म्यं च वद मे त्वमसि तत्त्वविदां वर ३ सनंदउवाच एकदा हास्तिनपुरे भीष्मं धर्मभृतां वरं पप्रच्छ पांडुरिथ्यं तं जनानां नो नु शृ
ण्वंतो ४ परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्स्वयं असंख्यब्रह्मांडपतिर्गोलोकाधिपतिः प्रभुः ५ भुवो भारावतारायगच्छन्दे।
वो जनार्दनः राधां प्राह प्रिये भीरु गच्छ त्वमपि भूतले ६ श्रीराधोवाच यत्र वृंदावनं नास्ति न यत्र यमुना नदी यत्र गोवर्द्धनो नास्ति
तत्र मे न मनः सुखं ७ श्रीसनंदउवाच वेदनागक्रोशभूमिः स्वधाम्नः श्रीहरिः स्वयं गोवर्द्धनं च यमुनां प्रेषयामास भूपरि ८ वेद
नागक्रोशभूमिः सापि चात्र समागता चतुर्विंशद्वनैर्युक्ता सर्वलोकैश्च वंदिता ९ भारतात्पश्चिमदिशि शाल्मलीद्वीपमध्यतः गोव

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्ग. हि नो जन्म लेभे पत्न्यां द्रोणाचलस्य च ९ गोवर्द्धनोपरि समाः पुष्पवर्षाश्च चक्रिरे हिमालयसुमेर्वाद्याः शैलाः सर्वे समागताः १०
गि. नत्वा प्रदक्षिणीकृत्य पूजां कृत्वा विधानतः गोवर्द्धनस्य परमां स्तुतिं चक्रुर्महाद्रयः ११ शैला ऊचुः त्वं साक्षात्कृष्णचंद्रस्य परिपूर्ण-
२ तमस्य च गोलोके गोगणैर्युक्तो गोपीगोपालसंयुतः १२ त्वं हि गोवर्द्धनो नाम वृंदारण्ये विराजते त्वं नो गिरीणां सर्वेषां गिरिराजोऽसि
सांप्रतं १४ नमो वृंदावनांकाय तुभ्यं गोलोकमौलिने पूर्णब्रह्मातपत्राय नमो गोवर्द्धनाय च १५ श्रीसनंद उवाच इति स्तुत्वाथ
गिरयो जग्मुः स्वं स्वं गृहं ततः शैलो गिरिवरः साक्षाद्गिरिराज इति स्मृतः १६ एकदा तीर्थयायी च पुलस्त्यो मुनिसत्तमः द्रोणाच-
लसुतं श्यामं गिरिं गोवर्द्धनं वरं १७ माधवीलतिकापुष्पफलभारसमन्वितं निर्झरैर्नादितं शांतं कंदरामंगलायनं १८ तपोयो-
ग्यं रत्नमयं शतशृंगं मनोहरं चित्रधातुविचित्रांगं सटंकपदिसंकुलं १९ मृगैः शाखामृगैर्व्याप्तं मयूरध्वनिमंडितं मुक्तिप्रदं
मुमुक्षूणां तं ददर्श महामुनिः २० तल्लिप्सुर्मुनिशार्दूलो द्रोणपार्श्वं समागतः पूजितो द्रोणगिरिणा पुलस्त्यः प्राह तं गिरिं २१ श्रीपु-
लस्त्य उवाच हे द्रोण त्वं गिरीशोऽसि सर्वदेवैश्च पूजितः दिव्यौषधीसमायुक्तः सदा जीवनदो नृणां २२ अर्थी तवांतिके प्राप्तः काशीस्थो
ऽहं महामुनिः गोवर्द्धनं सुतं देहि नान्यैर्मेऽत्र प्रयोजनं २३ विश्वेश्वरस्य देवस्य काशीनाम्नी महापुरी यत्र पापी मृतः सद्यः परं मोक्षं प्र-
याति हि २४ यत्र गंगा गतनासा तत्र विश्वनाथोऽपि पत्रवै तत्रैनं स्थापयिष्यामि यत्रैको न च पर्वतः २५ गोवर्द्धनेन तव सुतेन लताहृदः
समाकुले तस्मिंस्तपः करिष्यामि जातो येन मे मनोरथः २६ श्रीसनंद उवाच पुलस्त्यवचनं श्रुत्वा स्वसुतस्नेहविह्वलः अश्रुपूर्णो
द्रोणगिरिस्तं मुनिं वाक्यमब्रवीत् २७ द्रोण उवाच पुत्रस्नेहाकुलोऽहं वै पुत्रो मेऽयमतिप्रियः त्वच्छापभयभीतोऽहं ददाम्येनं महामु-
ने २८ हे पुत्र गच्छ मुनिना भारते कर्मकौशले चैवायं लभते यत्र नभिर्मोक्षमपि क्षणात् २९ गोवर्द्धन उवाच मुने कथं मां नयसि
लंबितं योजनाष्टकं योजनद्वयमुच्चांगं पंचयोजनविस्तृतं ३० पुलस्त्य उवाच उपविश्य करे मे त्वं गच्छ पुत्र यथासुखं वाहयामि
करेणैव यावत्काशीसमागमः ३१ गोवर्द्धन उवाच मुने यत्र स्थले भूम्यां स्थापनां मे करिष्यसि करिष्यामि न चोत्थानं तद्भूम्यां शपथ २

२

1587

योमम ३१ पुलस्त्यउवाच अहमाशाल्मलीद्वीपात्समेर्थोद्दीक्षयकौशलं तस्यापनांकरिष्यामिशापयस्तेमयापथि ३२ श्रीसनं
दउवाच मुनेःकरतलेतस्मिन्नारुरोहमहाबलः प्रणम्यपितरंद्रोणमश्रुपूर्णाकुलेक्षणः ३४ मुनिस्तद्दक्षिणकरेधृत्वागच्छ
न्शनैःशनैः स्वतेजोदर्शयन्नृणांप्रायाद्भूतव्रजमंडले ३५ जातिस्मरोगिरिस्तत्रप्राहेदंपथिचिंतयन् परिहर्त्तुमनाःसाक्षाच्छ्रीकृ
ष्णोभगवान्स्वयं ३६ असंख्यब्रह्मांडपतिर्व्रजेअवतरिष्यति बाललीलांचकैशोरींचेष्टांगोपालकैःसह ३७ दानलीलांमान
लीलांहरिरत्रकरिष्यति तस्मान्मयानगंतव्यंभूमिश्रेयंकलिंदजा ३८ गोलोकाद्राधयासार्द्धंश्रीकृष्णआगमिष्यति कृतकृत्योभ
विष्यामिकृत्वातद्दर्शनंपरं ३९ इतिविचार्यमनसाभूरिभारंददौकरे तदाश्रुनिश्चयंश्रांतोभूद्भूतपूर्वगतस्मृतिः ४० कराद्धृतायंत
शैलंनिधायव्रजमंडले लघुशंकाजयार्थंहिगतोभूद्भारपीडितः ४१ कृत्वाशौचंजलेस्नात्वापुलस्त्योमुनिसत्तमः उत्तिष्ठेतंमु
निःप्राहगिरिंगोवर्द्धनाचलं ४२ नोत्थितंभूरिभारांतंकराभ्यांतंमहामुनिः स्वतेजसाबलेनापिगृहीतमुपचक्रमे ४३ मुनिना
संगृहीतोपिगिरिराजंगिराद्दया नचचालांगुलींकिंचित्तदपिद्रोणनंदनः ४४ पुलस्त्यउवाच गच्छगच्छगिरिश्रेष्ठभारंमाकुरु
माकुरु मयाज्ञातोसिरुष्टस्त्वंअभिप्रायोवदाशुमे ४५ गोवर्द्धनउवाच मुनेनमेत्रदोषोस्तित्वयामेस्थापनाकृता नकरिष्यामितः
बोध्यानंत्वयामेशपथःकृतः ४६ श्रीसनंदउवाच पुलस्त्योमुनिशार्दूलःक्रोधात्प्रज्वलितेंद्रियः स्फुरदोष्ठोद्रोणपुत्रंशशापविग
तोद्यमः ४७ पुलस्त्यउवाच गिरेत्वयातिधृष्टेनतकृतोमेमनोरथः तस्मात्तुतिलमात्रंहिनित्यंत्वंक्षीणतांव्रज ४८ श्रीसनंदउ
वाच काशींगतेपुलस्त्येवषयंगोवर्द्धनोगिरिः नित्यंसंक्षपतेनंदतिलमात्रंदिनेदिने ४९ यावद्भागीरथीगंगायावद्गोवर्द्धनोगिरिः
तावत्कलेःप्रभावस्तुभविष्यतिनकर्हिचित् ५० गोवर्द्धनस्यप्रकटंचरित्रंनृणांमहापापहरंपवित्रं मयातवाग्रेकथितंविचित्रं
मुमुक्तिदंश्रीरुचिरंनचित्रं ५१ ॥ इतिश्रीमद्गर्गाचार्यसंहितायांश्रीवृंदावनखंडेगोवर्द्धनोत्पत्तिकथनंनामद्वितीयोध्यायः २ ॥
श्रीसनंदउवाच गोलोकेहरिणाप्रोक्ताकालिंदीसरितांवरा कृष्णस्यदक्षिणेकृत्वयांतमध्युदिनाभवत् १ ततोविरजासाक्षात्गं

त

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्ग॰ ब्रह्मद्रवोद्भवा हे नयोयमुनायांतसंप्लवीनेवभूवनः २ परिपूर्णतमं कृष्णं तस्मात्कृष्णस्य नंदनाद् परिपूर्णतमस्यापि परातीती
वृं॰ विद्वुर्बुधाः ३ ततो वेगेन महता कालिंदी सरितां वरा विभेद्य विरजावेगं कुंजद्वारविनिर्गता ४ असंख्यब्रह्मांडचयं स्पृष्ट्वा ब्रह्म
३ द्रवं गता भिंदती जज्जलं दीर्घं स्ववेगेन महानदी ५ वामपादांगुष्ठनखभिन्नब्रह्मांडमस्तके श्रीवामनस्य विवरे ब्रह्मद्रवसमाकु
ले ६ तस्मिन्श्रीगंगायासार्द्धं प्रविष्टाभूत्सरिद्वरा वैकुंठं चाजितपदं संप्राप्य ध्रुवमंडलं ७ ब्रह्मलोकमभिव्याप्य पतंती ब्रह्म॰
मंडलात् ततः सुराणां शतशो लोकालोकं जगाम ह ८ ततः प्रयाणवेगेन सुमेरुगिरिमूर्द्धनि गिरिकूटाननिक्रम्य भित्वा गंड
शिलातटान् ९ सुमेरोर्दक्षिणदिशं गंतुमभ्युदिताभवत् ततः श्रीयमुना साक्षाच्छ्रीगंगाया विनिर्गता १० गंगा तु प्रययौ शैलं हिम
वंतं महानदी कृष्णा तु प्रययौ शैलं कलिंदं प्राप्य सा यदा ११ कालिंदीति समाख्याता कलिंदप्रभवा यदा कलिंदगिरिसंभूतगंड
शैलतटानूर्द्ध्वान् १२ भित्वा लुठंती भूखंडे कृष्णा वेगवती सती देशान्पुनंती कालिंदी प्राप्तवान्खांडवे वने १३ परिपूर्णतमं सा
ताच्छ्रीकृष्णं वरमिच्छती धृत्वा वपुः परं दिव्यं तपस्तेपे कलिंदजा १४ पित्रा विनिर्मिते गेहे जले वापि समाश्रिता ततो वेगेन का
लिंदी प्राप्ताभूद्व्रजमंडले १५ वृंदावनसमीपे च मथुरानिकटे शुभे श्रीमहावनपार्श्वे च सैकते रमणस्थले १६ श्रीगोकुले च य
मुना यूथीभूत्वाति सुंदरी श्रीकृष्णचंद्रप्राप्त्यर्थं निजवासं चकार ह १७ अथो व्रजाद्व्रजंती सा व्रजवियोगविह्वला प्रेमानंदाश्रुसं॰
युक्ता भूत्वा पश्चिमवाहिनी १८ ततस्त्रिवारं वेगेन गत्वा च व्रजमंडले देशान्पुनंती प्रययौ प्रयागं तीर्थसंगमं १९ पुनः श्रीगंगा॰
या सार्द्धं क्षीराब्धिं सा जगाम ह देवाः सर्वे पुष्पाणां चक्रुर्दिविजयध्वनिं २० कृष्णा श्रीयमुना साक्षात्कालिंदी सरितां वरा समुद्रमे
त्य श्रीगंगां प्राह गद्गदया गिरा २१ श्रीयमुनोवाच हे गंगे त्वं तु धन्यासि सर्वब्रह्मांडपावनि कृष्णपादाब्जसंभूता सर्वलोकैकवंदि।
ता २२ ऊर्द्ध्वं यास्यामि हरेर्लोकं गच्छ त्वमपि हे शुभे त्वत्समानं च दिव्यं च न भूतं न भविष्यति २३ सर्वतीर्थमयी गंगा तस्मात्वां प्रणमा।
म्यहं यत्किंचिद्धा प्रकथितं तत्क्षमस्व सुमंगले २४ श्रीगंगोवाच हे कृष्णे त्वं तु धन्यासि सर्वब्रह्मांडपावनी कृष्णवामांगसंभूता प ३

1589

रमानंदस्वरूपिणी २५ परिपूर्णतमा साक्षात्सर्वलोकैकवंदिता परिपूर्णतमस्यापि श्रीकृष्णस्य महात्मनः २६ पट्टराज्ञी परा कृ-
ष्णकृष्णांशा श्यामामयद्रं तीर्थैर्देवैर्दुर्लभा तं गोलोकेपि चद्दर्चिता २७ स्वर्हेया स्यामिया नाले श्रीकृष्णस्याज्ञया शुभे त्वद्वियोगात्व-
राद्वैया नंक तं नवतम्रा २८ द्रवीभूत्वाक्षविष्याम श्रीवृजे रासमंडले यत्किंचिन्मे प्रकथितं तत्त्वमस्व हरिप्रिये २९ संनंदउ-
वाच इत्युक्त्वा परस्परं नत्वाह्वेन यौ पपतद्रुतं लोकान्य विंत्रं कुर्वंती पाताले स्वःसरिद्गता ३० सापि भोगवती नाम्ना च भो भोगवतीव-
ने यज्जलं सत्विनयनः शिवो मूर्ध्नि बिभर्ति हि ३१ अथ कृष्णा स्ववेगेन भित्वा सप्ताब्धिमंडले सप्तद्वीपमहीपृष्ठे लुठंती वेगवत्तरा ३२
गत्वा स्वर्णमयीं भूमिं लोकालोकाचलं गता तस्मात्तु गंडशैलानां तटं भित्वा कलिंदजा ३३ आब्रह्मलोकं लोकांस्तान् भित्वाप्यथ हरेः
पदं ब्रह्मांडरंध्रं श्रीब्रह्मद्रवयुक्तं समेत्य सा ३४ अयुतवर्षं प्रवर्षं तद्देवैः पुष्पगणमल्लव पुनः श्रीकृष्णगोलोकमारुरोह सरिद्वरा ३५
कलिंदगिरिनंदनीतवचरित्रमेतद्दुर्लभं कृतं च परिपदितं भुवितनोति सन्मंगलं ३६ जनोपि यदि धारयेत्किल पदे तु योनिर्यशः
सुधातिपरमं पदं निजनिकुंजलीलाकृतं ३७ ॥ इति श्रीमद्गर्गाचार्यसंहितायां वृंदावनखंडे तृतीयोध्यायः ३ ॥ नारदउवाच
सुनंदस्य वचः श्रुत्वा गंतं नंदः स्वमुद्यतः सर्वैर्गोपगणैः सार्द्धं मुदितो भूत्महामनाः १ यशोदया च रोहिण्या सर्वगोपगणैः सह स्व-
स्रैरथैर्वीरजनैर्मंडितो विप्रमंडलैः २ गोभिश्च शाकटैर्युक्तो हुहुवालैस्तथानुगैः गोपकैः गीयमानैश्च शंखदुंदुभिनिस्वनैः ३ शुभ्रा-
ध्यां कृष्णरामाभ्यां नंदराजो महामतिः रथमारुह्य हे राजन् वनं वृंदावनं ययौ ४ वृषभानुवरो गोपो गजमारुह्य भार्यया श्रीके-
तीत्वा स्वनंतां राधां गीयमानैश्च गायकैः ५ मृदंगतालवीणानां वेणूनां कलनिःस्वनैः गोपालगोगणैः सार्द्धं वृंदारण्यं जगाम ह ६ उ-
पनंदास्तथा नंदास्तथा षड्वृषभानवः सर्वैः परिकरैः सार्द्धं मुदा वृंदावनं ययुः ७ वृंदावने समाविश्य गोपाः सर्वे सहानुगाः गो-
पान्विधाय वसतीः वासं चक्रुरितस्ततः ८ सभामंडपसंयुक्तं मंडपैः परिखायुतं चतुर्योजनविस्तीर्णं पुरं नंदश्चकार ह ९ प्राका-
रपरिखायुक्तं विचित्रभुवनान्वितं योजनत्रयविस्तीर्णं सप्तद्वारसमन्वितं १० सरोवरैः परिवृत्तं राजमार्गमनोहरं सहस्रकुंजं

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1590

गर्गा॰ वृं॰ ४

वपुरं वृषभानुरवीक्षयत् ११ श्रीकृष्णनंदनगरं वृषभानुपुरे र्भकैः चकार क्रीडनपरो गोपीनां प्रीतिमावहन् १२ अथ वृंदाव
ने राजन् सर्वगोपालसंमतौ बभूवतुर्वत्सपालौ रामकृष्णौ मनोहरौ १३ चारयामासतुर्वत्सान् ग्रामसीम्न्यर्भकैः सह कलिंदी
निकटे पुण्ये पुलिने रामकेशवौ १४ प्रचलंतौ निकुंजेषु संप्रलीनाविततस्ततः रिंगमाणौ वक्रुत्रापि नंदंतौ वेरनुर्वने १५ किंकि
णीजालसंयुक्तौ स्रजन्मंजीरनूपुरौ पीतवाससौ परिकरौ हारकेयूरभूषितौ १६ तेपतौः दिपतौ वालैः वंशीवादनतत्परौ मुखेन
किंकिणीशब्दं कुर्वद्भिर्वालकैश्च युतौ १७ धावंतौ पतितिभिः छायां रेजतू रामकेशवौ मयूरपिच्छसंयुक्तौ पुष्पपल्लवभूषितौ १८
एकदा वत्सवृंदेषु प्राप्नवत्सासुरं नृप कंसप्रणोदितं ज्ञात्वा शनैस्तत्र जगाम ह १९ धावन्नो येषु सर्वं च लांगूलं चलपन्मुहुः दै
त्यः पश्चिमपादाभ्यां हरिं मे सेततादूह २० पलापितेषु वालेषु कृष्णस्तं पादयोर्द्वयोः गृहीत्वा भ्रामयित्वाथ पातयामास भूतले २१
पुनर्नीत्वा कराभ्यां तं कपित्थं प्राहिणोद्धरिः तदा मूर्छां गते दैत्ये कपित्थोपि महाद्रुमः २२ कपित्थान् पातयामास तदद्भुतमिवाभ
वत् विस्मितेषु च वालेषु साधु साध्विति वादिषु २३ दिवि देवा जयारावान् पुष्पवर्षं प्रचक्रिरे तद्देहस्य महाज्योतिः कृष्णे लीनं बभू
व ह २४ बहुलाश्व उवाच महो पूर्वं स कृत्यः को यं वत्सासुरो मुने श्रीकृष्णे लीनतां प्राप्तः श्रीप्रपूर्णेय तत्परे २५ नारद उवाच
मुरपुत्रो महादैत्यः प्रमीलो नाम देवजित् वसिष्ठस्याश्रमं प्राप्तो नंदिनीं गां ददर्श ह २६ तल्लिप्सुर्ब्राह्मणो भूत्वा ययाचे गां मनोहरां
गी× तूष्णीं स्थिते गौरुवाच वसिष्ठे दिव्यदर्शने २७ श्रीनंद उवाच मुनीनां गां समादत्ते भूत्वा विप्रः समागतः दैत्यो सि त्वं रजस्तस्माज्जो वत्सो
भवत्वं मते २८ नारद उवाच ततो देव वत्सरूपो भूत्सुरपुत्रो महासुरः वसिष्ठं गां परिक्रम्य नत्वा प्राहीत्सु वाचह २९ गौरुवाच द्वापरांते
महादैत्य वृंदारण्ये यदा तव गोवत्सेषु गतस्यापि तदा मुक्तिर्भविष्यति ३० नारद उवाच परिपूर्णतमे साक्षात्कृष्णे पतितपावने तः
स्मात् वत्सासुरो दैत्यो लीनो भूद्वहि विस्मयः ३१ ॥ इति श्रीमद्गर्गाचार्यसंहितायां वृंदावनखंडे चतुर्थोध्यायः ४ ॥ श्रीनारद उवाच
एकदा चारयन्वत्सान् सरामो वालकैर्हरिः यमुनानिकटे प्राप्तं बकं दैत्यं ददर्श ह १ श्वेतपर्वतसंकाशो वृहत्पादो वनध्वनिः प ध

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

1591

लायितेषु बालेषु वज्रांगेषु महर्षे २ कृष्णं महाबकग्रस्तं दृष्ट्वा ते व्रजवासिनः रुरुदुस्ते बालकाः सर्वे गतप्राणा इवाभवन् हाहाकारं त
दा कृत्वा देवाः सर्वे समागताः ३ इंद्रो वज्रं तदा नीत्वा तेन ताड महाबकं तेन घातेन पतितो मूर्छितो घटिकाद्वयं ४ विधुन्वन् स तनुं वे
गाज्जृंभितः पुनरुत्थितः न ममार तदा दैत्यो जगर्ज घनवद्बली ५ त्रिलोचनं त्रिशूलेन तं जघान महासुरं छिन्नैकपक्षो दैत्योपि
न मृतोपि भयंकरः ६ वायव्यास्त्रेण वायुस्तं संजघान बकं ततः उच्चचाल बकस्तेन पुनस्तत्र स्थितोभवत् ७ यमस्तं यमदंडेन
ताडयामास चाग्रतः तेन दंडेन न मृतो बको वै चंडविक्रमः ८ दंडोपि भग्नतां प्रागात् स ततो नाभवद्बकः तदेव चाग्रतः प्राप्य खड्गं
सुखंडविक्रमः ९ शतघ्नास्त्रे बकं दैत्यं संजघान यमुद्गरः नीतौः पक्षगतैर्बाणैर्न ममार बकस्ततः १० धनदस्तं च खड्गेन स तीक्ष्णे
न जघान ह छिन्नद्वितीयपक्षोभूत् न मृतो दैत्यपुंगवः ११ नीहारास्त्रेण तं सोमः संजघान महाबकं शीतार्तो मूर्छितो दै
त्यो न मृतः पुनरुत्थितः १२ आग्नेयास्त्रेण तं त्वग्निः संजघान महाबकं भस्मीभूतो नाभवद्दैत्यो न ममार महाबलः १३ अपांपतिस्तं
पाशेन बध्वा कोविचकर्ष ह कर्षणात्स महापाशः छिन्नोभून्न मृतस्तु सः १४ तताड गदया तं वै भद्रकाली तरस्विनी मूर्छितस्तत्प्र
हारेण परं कश्मलतां ययौ १५ ततो मूर्छां समुत्थाय विधुन्वन् स्वतनुं पुनः जगर्ज घनवद्धीरो बको दैत्यो महाबलः १६ तदा शक्तिध
रः शक्तिं तस्मै चिक्षेप सत्वरः तदैकपादो भग्नोभून्न मृतः पक्षिणां वरः १७ तदा क्रोधेन महता धावन् दैत्यस्त्वरितस्त्वनः देवान् विद्रा
वयामास तीव्रापातं डयामये १८ अग्रे पलायितान् देवाननुधावद्बकोवरे पुनस्तत्रागमद्दैत्यो नादयन्मंडलं दिशां १९ तदा देव
र्षयः सर्वे सर्वे ब्रह्मर्षयो द्विजाः श्रीनंदनंदनायाशु सफलं चाशिषं ददुः २० तदैव कृष्णस्तन्मध्ये तातानवाद्रज्वलन् वबदंक्र
संतरस्मात्ततकंठो महाबकः २१ पुनः कृष्णं समादातुं तीव्रापातं डयागतः चंचुं गृहीत्वा तं कृष्णः पोथयामास भूतले २२ पुनरु
त्थाय तं तं स्वप्रसार्यावस्थितं बकं ददार तं देहस्ताभ्यां कृष्णोषाणं गजो यथा २३ तदा मृतस्य दैत्यस्य ज्योतिः कृष्णं समाविशत् दे
वतावदुः पुष्पैर्जयारावैः समन्विताः २४ गोपाला विस्मिताः सर्वे कृष्णं संश्लिष्य सर्वतः ऊचुस्ते कुशलीभूतो मुक्तो मृत्युमुखात्स

CC0, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

गर्गं०
वृं
५

खे २५ एवं कृष्णो बकं हत्वा सबलो बालकैः सह गोवत्सैर्हर्षितो गायन्नाययौ राजमंदिरं २६ परिपूर्णतमस्यापि श्रीकृष्णस्य महात्म
नः जगुर्गृहे गते बालाः स्फलेदंनेति विस्मिताः २७ बहुलाश्व उवाच कोयं दैत्यः पूर्वकाले कस्मात्केन बको भवत् हूर्णोंवलाणि सर्वे
शो श्रीकृष्णे लीनतां गतः २८ नारद उवाच हयग्रीवसुतो दैत्य उत्कलो नाम हे नृप रणे मरुत्विनिर्जित्य शक्रछत्रं जहार ह २९ न
यान्तां नृपाणां च राज्यं हृत्वा महाबलः चकार वर्षाणि शतं राज्यं सर्वविभूतिमत् ३० एकदा विचरन्दैत्यः सिंधुसागरसंगमे जा
जलेर्मुनिसिद्धस्य पर्णशालासमीपतः ३१ जले निःक्षिप्य वडिशं मीनानाकर्षयन्मुहुः निषेधितोपि मुनिना नैवामन्यत दुर्मतिः ३२
तस्मै शापं ददौ सिद्धो जाजलिर्मुनिसत्तमः बकवत्वं झषानत्सि त्वं बको भव दुर्मते ३३ तत्क्षणाद्बकरूपोभूद्भ्रष्टतेजा गतस्मयः प न
तितः पादयोस्तस्य नत्वा प्राह कृतांजलिः ३४ उत्कल उवाच न जानं तेन पश्चन्तं मुने मोपाहि जाजले साधूनां भवतां संगो मोक्षद्वा
रं परं विदुः ३५ मित्रे शत्रौ समे माने समाने हेमलोष्ठयोः सुखे दुःखे समा ये वै ब्राह्मणाः साधवश्च ये ३६ किं किं न जातं महतां दर्श
नात्कौ मुने नृणां पारमेष्ठ्यं च साम्राज्यमैंद्रं योगपदं भवेत् ३७ जाजले मुनिशार्दूल त्रैवर्ग्यं किमु भूभुजेः साधूनां कृपया साक्षा
न्मोक्षं ब्रह्माऽवलभ्यते ३८ नारद उवाच तदा प्रसन्नः स मुनिर्जाजलिस्तमुवाच ह षष्टिवर्षसहस्राणि तपस्तप्तं च येन वै ३९ जा
जलिरुवाच वैवस्वतान्तरे प्राप्ते अष्टाविंशतिमे युगे द्वापरान्ते भारते च माथुरे व्रजमंडले ४० परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगा
वान्स्वयं वृंदावने गवां वत्सानूचारयन्विचरिष्यति ४१ तदा तन्मयतां कृष्णे यास्यसि त्वं न संशयः हिरण्याक्षादयो दैत्या वैरेणा
पि परं गताः ४२ नारद उवाच इत्थं बकासुरो दैत्यः उत्कलो जाजलेर्वरात् श्रीकृष्णे लीनतां प्राप्तः सत्संगात्किं न जायते ४३ ॥
इति श्रीमद्गर्गाचार्यसंहितायां वृंदावनखंडे पंचमोध्यायः ५ ॥ नारद उवाच एकदा बालकैः साकं गोवत्सांश्चारयन्हरिः कालिं
दीनिकटे रम्ये बालक्रीडां चकार ह अघासुरो नाम महान्दैत्यस्तत्रास्थितो भवत् क्रोशदीर्घं वपुः कृत्वा प्रसार्य मुखमंडलं १ दृष्ट्वा
तं पर्वताकारं वीक्ष्य वृंदावने वने गोपा जग्मुर्मुखे तस्य वत्सैः कृतांजलिस्थने २ तद्दृष्ट्वा च सबलस्तन्मुखे प्राविशद्धरिः निमीलितेषु ५

सवत्सेषु वालेषु सहितः पिपिणा ४ हाहाशब्दः सुराणां तु दैत्यानां सर्वपर्वहि कृष्णो वत्सैः सर्वैः राजन् तन्नाभ्यो दरेततः ५ ततस्तरोथ
गाः प्राणाः शिरो भित्वा विनिर्गताः तन्मध्ये निर्गतः कृष्णो वालैर्वत्सैश्च मैथिल ६ सवत्सकान् शिशून् दृष्ट्वा जीवयामास माधवः तज्ज्यो
तिः श्रीघनश्यामे लीनं जातं तडित् यथा ७ तदैव ववृषुर्देवाः पुष्पवर्षाणि पार्थिव कोयं दैत्यः पूर्वकाले श्रीकृष्णे लीनतां गतः शुद्धो वै
रानुबंधेन शीघ्रं दैत्याद्धरिं गतः ८ श्रीनारद उवाच शंखासुरसुतो राजन्नघो नाम महाबलः युवाति सुंदरः साक्षात्कामदेव इवापरः
अष्टावक्रं मुनिं यांतं विरूपं मलयाचले दृष्ट्वा जहास तं सद्यः कुरूपोयमिति ब्रुवन् ९ तं शशाप महादुष्टं त्वं सर्पो भव दुर्मते कुरू
पावक्रगा जातिः सर्पाणां भूमिमंडले ११ तस्माद्योनिपतितैर्दैत्यंदीनं गतस्मयं दृष्ट्वा प्रसन्नः सम्मुनिर्वरं तस्मै ददौ पुनः १२ अष्टाव
क्र उवाच कोटिकंदर्पलावण्यः श्रीकृष्णस्तत्तवोदरे यदागतः सर्परूपात्तदा पापान्मुक्तिर्भविष्यति १३ नारद उवाच अष्टावक्रस्य शापे
न सर्पीभूत्वाघासुरः तद्दृशात्परं मोक्षं तं गतो योगिदुर्लभं १४ वत्सान्वकमुखान्मुक्तं ततोऽक्लिष्टवघासुरं हत्वा कतिदिनैः कृ
ष्णयशोदाभूद्यात्वरा १५ कलावती रोहिणी च गोपी गोपाल्वयो धिकान् वृषभानुवरं गोपं नंदराजं व्रजेश्वरः १६ नवोपनंदानन्दौ
श्रीवृषभानून्व्रजेषुषट् समाहूय नन्दगेहे च वचः शाह यशोमती १७ यशोदा उवाच किं करोमि क्व गच्छामि कल्याणं मे कथं भवेत् म
त्सुतेन वदवोरिष्टान्यागच्छंति तत्क्षणात् १८ पूर्वं महावने त्यक्त्वा वृन्दारण्ये गता वयं एतस्मात्क्व यास्यामः देशो वदतु निर्भये १९ वंच
लोयं बालको मे क्रीडन्दूरे प्रयाति हि बालकाश्चंचलाः सर्वे न मन्यंते वचो मम २० बकासुरश्च मे बालं नीत्वा तं जग्रसे ह वली तस्मा
